UNIVERSAL
LIBRARY
OU_184330
UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः

(४२)

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

तत्र षष्ठसप्तमाष्टकद्वयरूपोऽष्टमो भागः (८)

पत्त्यम-रूपकषट्कम् [६]

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No S294·1 V41K Accession No P.G. S2305

Author कृष्णयजुर्वेदीय तैत्तिरीयसंहिता

Title आठवो भाग · १७१ ·

This book should be returned on or before the date last marked below

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४२ ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

तत्र षष्ठसप्तमाष्टकद्वयरूपोऽष्टमो भागः (८) ।

एतत्पुस्तकं

वे. शा. सं. रा. काशीनाथशास्त्री आगाशे, इत्येतैः संशोधितम् ।

तच्च

रावबहादुर इत्युपपदधारिभिः

' गंगाधर बापूराव काळे '

इत्येतैः

पुण्यारूयपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे '

इत्यभिधेयमहाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

द्वितीयेयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८७३ ।

ख्रिस्ताब्दाः १९५१ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यं रूपकषट्कम् (६) ।

(कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरिः ॐ ।

*प्राचीनंव꣡ꣳशं करोति देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीꣳ रुद्रा यत्प्राचीनंव꣡ꣳशं करोति देवलोकमेव तद्यजमान उपावर्तते परि श्रयत्यन्तर्हिता हि देवलोको मनुष्यलोकान्नास्माल्लोकात्स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेति दिक्ष्वंतीकाशान्करोति (१) उभयोर्लोकयोरभिजित्यै केशश्मश्रु वपते नखानि नि कृन्तते मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे तीर्थे स्नाति तीर्थे हि ते तां प्रावेशयन्तीर्थे स्नाति (२) तीर्थमेव समानानां भवत्यपोऽश्नात्यन्तरत एव मेध्यो भवति वाससा दीक्षयति सौम्यं वै क्षौमं देवतया सोममेष देवतामुपैति यो दीक्षते सोमस्य तनूरसि तनुवं मे पाहीत्याह स्वामेव देवतामुपै-

* एतत्काण्डव्याख्यानं भाष्यकृता प्रथमकाण्डव्याख्यानेन सहैव कृतमिति तत्तत्रैव द्रष्टव्यम् । तत्रैतदनुवाकस्य भाष्यम् १९५ पृष्ठे द्रष्टव्यम् ।

(स्रुवकर्मादिसंस्कृतस्य प्राग्वंशप्रवेशाभिधानम्)

त्यर्थो आशिषमेवैतामा शास्तेऽग्नेस्तूष्णीं वायोर्वातपानं पितॄणां नीविरोषधीनां प्रघातः (३) आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतत्सर्वं देवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणां तद्वै (४) एतत्सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतं तस्मान्नवनीतेनाभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन्तस्य कनीनिका परापतत्तदाञ्जनमभवद्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाङ्क्ते (५) सव्यश्हि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवावं रुन्धे परिमितमाङ्क्ते परिमितश हि मनुष्या आञ्जते सतूलयाऽऽङ्क्तेऽपतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदपतूलयाऽऽञ्जीत वज्र इव स्यात्सतूलयाऽङ्क्ते मित्रत्वाय (६) इन्द्रो वृत्रमहन्तसोऽपोऽभ्यस्रियत तासां यन्मेध्यं यज्ञिय

(क्षुरकर्मादिसंस्कृतस्य प्राग्वंशप्रवेशाभिधानम्)

सदैवमासीत्तदपोदक्रामत्ते दर्भा अभवन्यद्दर्भपुञ्जीलैः पवयति या एव मेध्या यज्ञियाः सदेवा आपस्ताभिरेवैनं पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति पञ्चभिः (७) पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दाꣳसि छन्दोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविꣳशत्या पवयति दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविꣳशो यावानेव पुरुषस्तमपरिवर्गम् (८) पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते (९) ॥

(अतीकाशान्करोत्येवंशयन्तीर्थे स्नाति प्रघातो मनुष्याणां तद्वा आऽङ्क्ते मित्रत्वाय पञ्चभिरपरिवर्गमष्टाचत्वारिꣳशच्च ॥ १ ॥)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

यावन्तो वै देवा यज्ञायापुनत त एवाभवन्थ एवं विद्वान्यज्ञाय पुनीते भवत्येव बहिः पवयित्वाऽन्तः प्र पादयति मनुष्यलोक एवैनं पवयित्वा पूतं देवलोकं प्र णयत्यदीक्षित एकयाऽऽहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीं पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आकूत्यै प्रयुजेऽग्नये (१) स्वाहेत्याहाऽऽकूत्या हि पुरुषो यज्ञमभि प्रयङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह मेधया हि मनसा पुरुषो यज्ञमभिगच्छति सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्वै सरस्वती पूषा वाचैव पृथिव्या यज्ञं प्र युङ्क्त आपो देवीर्बृहतीर्विश्वशंभुव इत्याह या वै वर्ष्यास्ताः (२) आपो देवीर्बृहतीर्विश्वशंभुवो यदेतद्यजुर्न ब्रूयाद्दिव्या आपोऽशान्ता इमं लोकमा गच्छेयुरापो देवीर्बृहतीर्विश्वशंभुव इत्याहास्मा एवैना लोकाय शमयति तस्माच्छान्ता इमं लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहान्तरिक्षे हि यज्ञो बृहस्पतिर्नो हविषा वृधातु (३) इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै यज्ञमव रुन्धे यद्ब्रूयाद्विधेरिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर्यज्ञमसृजत सोऽस्मात्सृष्टः पर

(दीक्षाहुत्यभिधानम्)

ऽत्स प्र यजुरव्लीनात्प्र साम तमृगुदयच्छद्यद्दगुदय
च्छत्तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा(४)जुहोति यज्ञ-
स्योद्यत्या अनुष्टुप्छन्दसामुदयच्छदित्याहुस्तस्मादनु-
ष्टुभा जुहोति यज्ञस्योद्यत्यै द्वादश वात्सबन्धान्युद-
यच्छन्नित्याहुस्तस्माद्द्वादशाभिर्वात्सबन्धविदो दीक्ष-
यन्ति सा वा एषर्गनुष्टुग्वागनुष्टुग्यदेतयर्चा दीक्ष-
यति वाचैवैनꣳ सर्वया दीक्षयति विश्वे देवस्य नेतु-
रित्याह सावित्र्येतेन मर्तो वृणीत सख्यम्(५)इत्याह
पितृदेवत्यैतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येतेन
द्युम्नं वृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एष-
कर्सर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनं देवता-
भिर्दीक्षयति सप्ताक्षरं प्रथमं पदमष्टाक्षराणि त्रीणि
यानि त्रीणि तान्यष्टावुपयन्ति यानि चत्वारि
तान्यष्टौ यदष्टाक्षरा तेन (६) गायत्री यदेकादशा-
क्षरा तेन त्रिष्टुग्यद्द्वादशाक्षरा तेन जगती सा
वा एषकर्सर्वाणि छन्दाꣳसि यदेतयर्चा दीक्षयति
सर्वाभिरेवैनं छन्दोभिर्दीक्षयति सप्ताक्षरं प्रथमं पदꣳ
सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्ध
एकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं
तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव
हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यू-
नाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै (७)॥

(अग्नये ता वृधात्वृचा सख्यं तेन
जुहोति पञ्चदश च)॥ २॥

(कृष्णाजिनादिभिर्दीक्षाकरणाभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः) ।

ऋक्सामे वै देवेभ्यो यज्ञायाऽतिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्यातिष्ठतां तेऽमन्यन्त यं वा इमे उपावत्स्यतः स इदं भविष्यतीति ते उपामन्त्रयन्त ते अहोरात्रयोर्महिमानमपनिधाय देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत्कृष्णमृक्सामयोः शिल्पे स्थ इत्याहर्क्सामे एवाव रुन्ध एषः (१) वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत्कृष्णं यदेवैनयोस्तत्र न्यक्तं तदेवाव रुन्धे कृष्णाजिनेन दीक्षयति ब्रह्मणो वा एतद्रूपं यत्कृष्णाजिनं ब्रह्मणैवैनं दीक्षयतीमां धियꣳ शिक्षमाणस्य देवेत्याह यथायजुरेवैतद्भूर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्मात् (२) गर्भाः प्रावृता जायन्ते न पुरा सोमस्य क्रयादपोर्णवीति यत्पुरा सोमस्य क्रयादपोर्णवीति गर्भाः प्रजानां परापातुकाः स्युः क्रीते सोमेऽपोर्णुते जायत एव तदथो यथा वसीयाꣳसं प्रत्यपोर्णुते तादृगेव तदङ्गिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्थ्सुवर्वै शरा यच्छरमयी (३) मेखला भवत्यूर्जमेवाव रुन्धे मध्यतः सं

(कृष्णाजिनादिभिर्दीक्षाकरणाभिधानम्)

नह्यति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जत ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवास्यामेध्यं च व्यावर्तयतीन्द्रो वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयम् (४) यैऽन्तः शरा अशीर्यन्त ते शरा अभवन्तच्छराणाꣳ शरत्वं वज्रो वै शराः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति वज्रेणैव साक्षात्क्षुधं भ्रातृव्यं मध्यतोऽप हते त्रिवृद्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति पृथ्वी भवति रज्जुना व्यावृत्त्यै मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय (५) यज्ञो दक्षिणाभ्यध्यायत्ताꣳ समभवत्तदिन्द्रोऽचायत्सोऽमन्यत यो वा इतो जनिष्यते स इदं भविष्यतीति तां प्राविशत्तस्या इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाऽच्छिनत्सा सूतवशाऽभवत्तत्सूतवशायै जन्म (६) ताꣳ हस्ते न्यवेष्टयत तां मृगेषु न्यदधात्सा कृष्णविषाणाऽभवदिन्द्रस्य योनिरसि मा मा हिꣳसीरितिं कृष्णविषाणां प्र यच्छति सयोनिमेव यज्ञं करोति सयोनिं दक्षिणाꣳ सयोनिमिन्द्रꣳ सयोनित्वाय कृष्णै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते

(दण्डादानादिकरणपूर्वकनियमानुष्ठानविधिः)

सुपिप्पलाभ्यस्त्वौषधीभ्य इत्याह तस्मादोषधयः फलं गृह्णन्ति यद्धस्तेन (७) कण्डूयेत पामनंभावुकाः प्रजाः स्युर्यत्स्मयेत नग्नंभावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां गोपीथाय न पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्यत्पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानां परापातुका स्यान्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति योनिर्वै यज्ञस्य चात्वालं योनिः कृष्णविषाणा योनाविव योनिं दधाति यज्ञस्य सयोनित्वाय (८) ॥

(रुन्ध एष तस्माच्छरमयी यूपस्तृतीयं मिथुनत्वाय जन्म हस्तेनाष्टाचत्वारिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः)।

वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन्प्राविशत्सैषा वाग्वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायां यद्दीक्षितदण्डं प्रयच्छति वाचमेवावरुन्ध औदुम्बरो भवत्यूर्ग्वा उदुम्बर ऊर्जमेवावरुन्धे मुखेन सम्मितो भवति मुखत एवास्मा ऊर्जं दधाति तस्मान्मुखत ऊर्जा भुञ्जते (१) क्रीते सोमे मैत्रावरुणाय दण्डं प्र यच्छति मैत्रावरुणो हि पुरस्ताद्ब्रह्मभ्यो वाचं विभजति

(दण्डादानादिकरणपूर्वकनियमानुष्ठानविधिः)

तामृत्विजो यजमाने प्रति ष्ठापयन्ति स्वाहा यज्ञं मनसेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः स्वाहोरोरन्तरिक्षादित्याहान्तरिक्षे हि यज्ञः स्वाहा यज्ञं वातादा रभ इत्याहायमू (२) वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्या अदीक्षिष्टायं ब्राह्मण इति त्रिरुपाꣳश्वाह देवेभ्य एवैनं प्राऽऽह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राऽऽह न पुरा नक्षत्रेभ्यो वाचं वि सृजेयत्परा नक्षत्रेभ्यो वा ँ विसृज यज्ञं विच्छिन्द्यात् (३)उदितेषु नक्षत्रेषु व्रतं छिनत्ति वाचं वि सृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाभि वाचं वि सृजति यदि विसृजेद्वैष्णवीमृचमनु ब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति दैवीं धियं मनामह इत्याह यज्ञमेव तन्मेदयति सुपारा नो असद्वश इत्याह व्यृष्टिमेवावरुन्धे(४) ब्रह्मवादिनो वदन्ति होतव्यं दीक्षितस्य गृहाꣳइ न होतव्याꣳइमिति हविर्वै दीक्षितो यज्जुहुयाद्यजमानस्यावदायं जुहुयाद्यन्न जुहुयाद्यज्ञपरुरन्तरियाद्ये देवा मनोजाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोक्षं जुहोति तन्नेवं हुतं नेवाहुतꣳस्वपन्तं वै दीक्षितꣳ रक्षाꣳसि जिघाꣳसन्त्यग्निः (५)खलु वै रक्षोहाऽग्ने त्वꣳसु जागृहि वयꣳसु मन्दिषीमहीत्या-

हाग्निमेवाधिपां कृत्वा स्वपिति रक्षसामपहत्या अव-
त्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने
व्रतपा असीत्याहाग्निर्वै देवानां व्रतपतिः स एवैनं
व्रतमा लम्भयति देव आ मर्त्येष्वेत्याह देवः (३)
ह्येष सन्मर्त्येषु त्वं यज्ञेष्वीड्य इत्याहैतꣳ हि यज्ञे
ष्वीडतेऽप वै दीक्षितात्संषुषुषꣳ इन्द्रियं देवताः क्राम-
न्ति विश्वे देवा अभि मामाऽवव्रन्नित्याहेन्द्रियेणै-
वैनं देवताभिः सं नयति यदेतद्यजुर्न ब्रूयाद्यावत एव
पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेयंतू
(४) सोमाऽऽभूयो भरेत्याहापरिमितानेव पशूनव
रुन्धे चन्द्रमसि मम भोगाय भवेत्याह यथादे-
वतमेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वेति
यदेवमेता नानुदिशेदयथादेवतं दक्षिणा गमयदा
देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेव-
तमेव दक्षिणा गमयति न देवताभ्य आ(८)वृश्च्य-
ते देवीरापो अपां नपादित्याह यद्वो मेध्यं यज्ञियꣳ
सदेवं तद्वो माऽवं क्रमिषमिति वावैतदाहाच्छिन्नं
तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽ-
त्येति (९)॥

(भुञ्जतेऽयं छिन्द्याद्रुन्धेऽग्निराह देव इयंदेवताभ्य आ त्रयस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(प्रायणीयाविधानम्)

अथ षष्ठाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः)।

देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्तेऽन्योन्यमुपाधावन्त्वया प्र जानाम त्वयेति तेऽदित्याꣳ समभ्रियन्त त्वया प्र जानामेति साऽब्रवीद्वरं वृणै प्रत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्यै (१) अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पथ्याꣳ स्वस्तिमं यजन्प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदित्योर्ध्वां पथ्याꣳ स्वस्तिं यजति प्राचीमेव तया दिशं प्रजानाति पथ्याꣳ स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवानु पश्यति (२) अग्नीषोमाविष्ट्वा सवितारं यजति सवितृप्रसूत एवानु पश्यति सवितारमिष्ट्वाऽदितिं यजतीयं वा अदितिरस्यामेव प्रतिष्ठायानु पश्यत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै देवानां विशो देवविशं खलु वै कल्पमानं मनुष्यविशमनु कल्पते यन्मारुतीमृचमन्वाह विशां कल्पत्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजं प्रायणीयं कार्यमनूयाजवत् (३ अप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य संततिस्तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत्प्र-

याजानन्तरियादात्मानमन्तरियाद्यदनूयाजानन्तरियात्प्रजामन्तरियाद्यतः खलु वै यज्ञस्य वितंतस्य न क्रियते तदनु यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु (४) परा भवति प्रयाजवद्देवानूयाजवत्प्रायणीयं कार्यं प्रयाजवदनूयाजवदुदयनीयं नाऽऽत्मानमन्तरेति न प्रजां न यज्ञः पराभवति न यजमानः प्रायणीयस्य निष्क्रास उदयनीयमभि निर्वपति सैव सा यज्ञस्य संततिर्याः प्रायणीयस्य याज्या यत्ता उदयनीयस्य याज्याः कुर्यात्परोक्षं लोकमा रोहेत्प्रमायुकः स्याद्याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रति तिष्ठति (५) ॥

(प्रज्ञातै श्वत्वारिंशच्च प्रयाजेषु पुरोनुवाक्याश्चाष्टौ च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

कद्रूश्च वै सुपर्णी चाऽऽत्मन्पयोरस्पर्धेतां सा कद्रूः सुपर्णीमजयत्साऽब्रवीत्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वेतियं वै कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः साऽब्रवीद्स्मै वै पितरौ पुत्रान्बिभृतस्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्व (१) इति

(अरुणया सोमक्रयाभिधानम्)

मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा पशुभिश्च दीक्षया चाऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा तस्मात्पशुमन्तं दीक्षोप नमति त्रिष्टुगुदपतत्त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा दक्षिणाभिश्च (२) तपसा चाऽगच्छत्तस्मात्त्रिष्टुभौ लोके माध्यंदिने सवने दक्षिणा नीयन्त एतत्खलु वाव तप इत्याहुर्यः स्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिष्मत्यस्या अजाऽभ्यरुन्ध तदजाया अजत्वꣳ सा सोमं चाऽहरच्चत्वारि चाक्षराणि साऽष्टाक्षरा सम्पद्यत ब्रह्मवादिनो वदन्ति (३) कस्मात्सत्याद्गायत्री कनिष्ठा छन्दसाꣳ सती यज्ञमुखं परीयायेति यद्देवादः सोममाऽहरत्तस्माद्यज्ञमुखं पर्येत्तस्मात्तेजस्विनीतमा पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं यन्मुखेन समगृह्णात्तदधयत्तस्माद्द्वे सवने शुक्रवती प्रातःसवनं च माध्यंदिनं च तस्मात्तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्ते (४)आशिरमव नयति सशुक्रत्वायाथो सं भरत्येवैनत्तꣳ सोममाहियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्स तिस्रो रात्रीः परिमुषितोऽवसत्तस्मात्तिस्रो रात्रीः क्रीतः सोमो वसति ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामोति ते वाचꣳ स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्त्सा रोहिद्रूपं

कृत्वा गन्धर्वेभ्यः (५) अपक्रम्यातिष्ठद्रोहितो जन्म ते देवा अब्रुवन्नप युष्मदक्रमीन्नास्मानुपावर्तते वि ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन्देवाः सा देवान्गायत उपावर्तत तस्माद्गायन्तꣳ स्त्रियः कामयन्ते कामुका एनꣳ स्त्रियो भवन्ति य एवं वेदाथो य एवं विद्वानपि जन्येषु भवति तेभ्य एव ददात्युत यद्बहुतयाः (६) भवन्त्येकहायन्या क्रीणाति वाचैवैनꣳ सर्वया क्रीणाति तस्मादेकहायना मनुष्या वाचं वदन्त्यकूटयाऽकर्णयाऽकाणयाऽश्लोणयाऽसंहतशफया क्रीणाति सर्वयैवैनं क्रीणाति यच्छ्वेतया क्रीणीयाद्दुश्चर्मा यजमानः स्याद्यत्कृष्णयाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्याद्यद्द्विरूपया वार्त्रघ्नी स्यात्म वाऽन्यं जिनीयात्तं वाऽन्यो जिनीयादरुणया पिङ्गाक्ष्या क्रीणात्येतद्वै सोमस्य रूपꣳ स्वयैवैनं देवतया क्रीणाति (७) ॥

(निष्क्रीणीष्व दक्षिणामिश्च वदन्ति मन्यन्ते गन्धर्वेभ्यो बहुतयाः पिङ्गाक्ष्या दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः) ।

तद्धिरण्यमभवत्तस्माद्ब्रह्मणो हिरण्यं पुनन्ति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादनास्थिकेन प्रजाः

(अरुणया सोमक्रयप्रकाराभिधानम्)

प्रवीयन्तेऽस्थन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽव-धायं जुहोति तस्मादनस्थिकेन प्रजाः प्र वीयन्तेऽ-स्थन्वतीर्जायन्त एतद्वा अग्नेः प्रियं धाम यद्घृतं तेजो हिरण्यमियं ते शुक्र तनूरिदं वर्च इत्याह सतेजसमेवैनꣳ सतनुं (१) करोत्यथो सं भर-त्येवैनं यदबद्धमवदध्याद्भ्राः प्रजानां परापातुकाः स्युर्बद्धमवं दधाति गर्भाणां धृत्यै निष्टक्यं बध्नाति प्रजानां प्रजननाय वाग्वा एषा यत्सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह (२) यज्ञो वै विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमवं रुन्धे काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येष खलु वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च सूर्यस्य चक्षुराऽरुहमग्नेरक्षणः कनीनिकामित्याह य एवा-रक्षोहतः पन्थास्तꣳ समारोहति (३) वाग्वा एषा यत्सोमक्रयणी चिदसि मनाऽसीत्याह शास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजा जायन्ते चिद-सीत्याह यद्धि मनसा चेतयते तद्वाचा वदति मनाऽसीत्याह यद्धि मनसाऽभिगच्छति तत्करोति धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा (४) वदति दक्षिणाऽसीत्याह दक्षिणा ह्येषा यज्ञियाऽसीत्याह यज्ञियामेवैनां करोति क्षत्रि-

याऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतः शीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह यदबद्धा स्यादर्यता स्याद्यत्पदिबद्धाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्यात् (५) यत्कर्णगृहीता वार्त्रघ्नी स्यात्स वाऽन्यं जिनीयात्तं वाऽन्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनां पदि बध्नाति पूषाऽध्वनः पात्वित्याहेयं वै पूषेमामेवास्या अधिपामकः समष्ट्या इन्द्रायाध्यक्षायेत्याहेन्द्रमेवास्या अध्यक्षं करोति (६) अनु त्वा माता मन्यतामनु पितेत्याहानुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आहियते यदेतद्यजुर्न ब्रूयात्परांच्येव सोमक्रयणीयाद्रुद्रस्त्वाऽऽ वर्तयत्वित्याह रुद्रो वै क्रूरः (७) देवानां तमेवास्यै परस्ताद्धात्यावृत्त्यै क्रूरमिव वा एतत्करोति यद्रदस्य कीर्तयति मित्रस्य पथेत्याह शान्त्यै वाचा वा एष विक्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन्वाचं धत्तेऽनुपदासुकाऽस्य वाग्भवति य एवं वेद (८)

(सर्तनु विष्णव इत्याह समारोहति ध्यायति तद्वाचा यजमानः स्यात्करोति क्रूरो वेद) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया षडाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(पदसंग्रहणाभिधानम्)

(अथ षष्ठाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

षट्पदान्यनुनिष्क्रामति षड्वै वाङ्नाति वदत्युत संवत्सरस्यायने यावत्येव वाक्तामवं रुन्धे सप्तमे पदे जुहोति सप्तपदा शाक्करी पशवः शाक्करी पशूनेवावं रुन्धे सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै वस्व्यसि रुद्राऽसीत्याह रूपमेवास्या एतन्महिमानम् (१) व्याचष्टे बृहस्पतिस्त्वा सुम्न रण्वत्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणेवास्मै पशूनव रुन्धे रुद्रो वसुभिरा चिकेत्वित्याहाऽऽवृत्त्यै पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्धा यद्देवयजनमिडायाः पद इत्याहेडायै ह्येतत्पदं यत्सोमक्रयण्यै घृतवति स्वाहा(२)इत्याह यदेवास्यै पदाद्घृतमपीड्यत तस्मादेवमाह यदध्वर्युरनुमावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्यै(३)इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं चवयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पदं यावत्मूतꣳ सं वपति पशूनेवाव रुन्धेऽस्मै राय इति सं वपत्यात्मानमेवाध्वर्युः (४)

पशुभ्यो नान्तरैति त्वे राय इति यजमानाय प्र यच्छति यजमान एव रायिं दधाति तोते राय इति पत्नियै वा अर्धो वा एष आत्मनो यत्पत्नी यथा गृहेषु निधत्ते तादृगेव तत्त्वष्टीमती ते सपेयेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधात्यस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मिँल्लोके पशुमान्स्यादाहवनीयेऽमुष्मिँल्लोके पशुमान्स्यादुभयोरुपावपत्युभयोरेवैनं लोकयोः पशुमन्तं करोति (५) ॥

(महिमानः स्वाहाऽर्पहत्या अध्वर्युर्धीयते चतुर्विꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके प्रथमप्रपाके नवमोऽनुवाकः)।

ब्रह्मवादिनो वदन्ति विचित्यः सोमा३ न विचित्या३ इति सोमो वा ओषधीनाꣳ राजा तस्मिन्यदार्पन्नं ग्रसितमेवास्य तद्यद्विचिनुयाद्यथाऽऽस्याद्ग्रसितं निष्खिदति तादृगेव तद्यन्न विचिनुयाद्यथाऽक्षन्नार्पन्नं विधावति तादृगेव तत्क्षोधुकोऽध्वर्युः स्यात्क्षोधुको यजमानः सोमविक्रयिन्त्सोमꣳ शोधयेत्येव ब्रूयाद्यदीतरम् (१) यदीतरमभयेनैव सोमविक्रयिणमर्पयति तस्मात्सोमविक्रयी क्षोधुकोऽरुणो ह स्माऽऽह्यौपवेशिः सोम-

(सोमोन्मानाभिधानम्)

क्रयेण एवाहं तृतीयसवनमवं रुन्ध इति पशूनां वर्म्मन्मिमीते पशूनेवावं रुन्धे पशवो हि तृतीयꣳ सवनं यं कामयेतापशुः स्यादिरयूक्षतस्तस्य मिमीतर्क्षी वा अपशव्यमपशुरेव भवति यं कामयेत पशुमान्स्यात् (२) इति लोमतस्तस्य मिमीते तद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनं क्रीणात्यमात्योऽसीत्याहामैवैनं कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहो न साऽच्छं याति महिमानमेवास्याच्छं यात्यनसा (३) अच्छं याति तस्मादनोवाह्यꣳ समे जीवनं यत्र खलु वा एतꣳ शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनमभि त्यं देवꣳसवितारमित्यतिच्छन्दसर्चा मिमीतेऽतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वैभिरेवैनं छन्दोभिर्मिमीते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसर्चा मिमीते वर्ष्मैवैनꣳ समानानां करोत्येकयैकयोत्सर्गम् (४) मिमीतेऽयातयाग्नियायातयाग्नियैवैनं मिमीते तस्मान्नानावीर्या अङ्गुलयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्मात्समावद्वीर्योन्याभिरङ्गुलिभिस्तस्मात्सर्वा अनु सं चरति यत्सह सर्वाभिर्मिमीत सꣳश्लिष्टा अङ्गुलयो जायेरन्नेकयैकयोत्सर्गं मिमीते तस्माद्विभक्ता जायन्ते पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवावं रुन्धे पञ्च कृत्वस्तूष्णीम्

(अन्यैः सोमक्रयाभिधानम्)

(५) दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्-
विराजैवान्नाद्यमव रुन्धे यद्यजुषा मिमीते भूतमे-
वाव रुन्धे यत्तूष्णीं भविष्यद्वै तावानिव सोमः
स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदः
स्यानां प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेवान्वा-
भजति वाससोप नह्यति सर्वदेवत्यं वै (६) वासः
सर्वाभिरेवैनं देवताभिः समर्धयति पशवो वै सोमः
प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति
व्यानाय त्वेत्यनु शृन्थति व्यानमेव पशुषु दधाति
तस्मात्स्वपन्तं प्राणा न जहति (७) ॥

(इतरं पशुमान्त्स्यादात्यनसोत्सर्गं तूष्णीः
सर्वदेवत्यं वै त्रयस्त्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके दशमोऽनुवाकः) ।

यत्कलया ते शफेन ते क्रीणानीति पणेतागो-
अर्धꣳ सोमं कुर्यादगोअर्धं यजमानमगोअर्धमध्वर्युं
गोस्तु महिमानं नाव तिरेद्वा ते क्रीणानीत्येव
ब्रूयाद्गोअर्धमेव सोमं करोति गोअर्धं यजमानं
गोअर्धमध्वर्युं न गोर्महिमानमव तिरत्यजया
क्रीणाति सतपसमेवैनं क्रीणाति हिरण्येन क्रीणाति
सशुक्रमेव (१ एनं क्रीणाति धेन्वा क्रीणाति सा-
शिरमेवैनं क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनं

(अन्यैः सोमक्रयाभिधानम्)

क्रीणात्यनड्वाहा क्रीणाति वह्निर्वा अनड्वान्वह्निनैव वह्निं यज्ञस्य क्रीणाति मिथुनाभ्यां क्रीणाति मिथुनस्यावरुद्ध्यै वाससा क्रीणाति सर्वदेवत्यं वै वासः सर्वाभ्य एवैनं देवताभ्यः क्रीणाति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे (२) तपसस्तनूरसि प्रजापतेर्वर्ण इत्याह पशुभ्य एव तदध्वर्युर्नि हनुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद शुक्रं ते शुक्रेण क्रीणामीत्याह यथायजुरेवैतद्वै वै येन हिरण्येन सोममक्रीणन्तदभीषहा पुनराऽददत को हि तेजसा विक्रेष्यत इति येन हिरण्येन (३) सोमं करीणीयात्तदभीषहा पुनरा ददीत तेज एवाऽऽत्मन्धत्तेऽस्मै ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमविक्रयिणमपर्यति यदनुपग्रथ्य हन्याद्दन्दशूकास्ताꣳ समाꣳ सर्पाः स्युरिदमहꣳ सर्पाणां दन्दशूकानां ग्रीवा उप ग्रथ्नामीत्याहादन्दशूकास्ताꣳ समाꣳ सपा भवन्ति तमसा सोमविक्रयिणं विध्यति स्वान (४) भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्तेभ्योऽधि सोममाऽहरन्यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिँल्लोके सोमꣳ रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति

(क्रीतसोमस्य शकटेन नयनाभिधानम्)

क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिँल्लोके सोमꣳ रक्षन्ति (५)

(तनूकृमेव रुन्ध इति येन द्विरण्येन स्वान चतुश्चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः)।

वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह श न्या इन्द्रस्योरुमा विश दक्षिणमित्याह देवा वै यꣳ सोममक्रीणन्तमिन्द्रस्योरौ दक्षिण आऽसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते तस्मादेवमाहोदायुषा स्वायुषेत्याह देवता एवान्वारभ्योतू (१) तिष्ठत्यन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो ह्येतर्हि सोमोऽदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्वि वा एनमेतदर्धयति यद्वारुणꣳ सन्तं मैत्रं करोति वारुण्यर्चाऽऽ सादयति स्वयैवैनं देवतया समर्धयति वाससा पर्यानह्यति सर्वदेवत्यं वै वासः सर्वाभिरेव (२) एनं देवताभिः समर्धयत्यथो रक्षसामपहत्यै वनेषु व्यन्तरिक्षं ततानेत्याह वनेषु हि व्यन्तरिक्षं ततान वाजमर्वत्सित्याह वाजꣳ ह्यर्वत्सु पयो अग्नियास्वित्याह पयो ह्यग्नियासु हृत्सु क्रतुमित्याह हृत्सु हि क्रतं वरुणो विश्वमिमित्याह

(क्रीतसोमस्य शकटेन नयनाभिधानम्)

वरुणो हि विक्ष्वग्निं दिवि सूर्यम् (३) इत्याह दिवि हि सूर्यꣳ सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति यो यजते तस्मा-देवमाहोदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्या उस्रावेतं धूर्षाहा-वित्याह यथायजुरेवैतत्प्र च्यवस्व भुवस्पत इत्याह भूतानाꣳ हि (४) एष पतिर्विश्वान्यभि धामा-नीत्याह विश्वानि ह्येꣳ षोऽभि धामानि प्रच्यवते मा त्वा परिपरी विदादित्याह यदेवादः सोममा-हियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्तस्मादे-वमाहापरिमोषाय यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै वरु-णो वा एष यजमानमभ्यैति यत् (५) क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षस इत्याह शान्त्या आ सोमं वहन्त्यग्निना प्रति तिष्ठते तौ संभवन्तौ यजमानमभि संभवतः परा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षितो यद-ग्नीषोमीयं पशुमालभत आत्मनिष्क्रयण एवास्य स तस्मात्तस्य नाऽऽर्त्यं पुरुषनिष्क्रयण इव ह्यथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाऽऽर्त्यं वारुण्यर्चा परि चरति स्वयैवैनं देवतया परि चरति (६) ॥

(आतिथ्येष्ट्यभिधानम्)

(अन्वारभ्योत्सर्वाभिरेव सूर्यं भूतानाः
होति यदाहुः सप्तविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टकं
प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

प्राचीनवंशं यावन्त ऋक्सामे वै वाग्वै देवेभ्यो देवा वै देवयजनं कदूश्च तद्विरण्यः षट्पदानि ब्रह्मवादिनो विचित्यो यत्कलया ते वारुणो वै कीतः सोम एकादश ॥ ११ ॥

प्राचीनवंशꣳ स्वाहेत्याह यंऽन्तः शरा ह्येष संतपसा
च यत्कर्णगृहीतेति सोमतो वारुणः
षट्सप्ततिः ॥ ७६ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमः प्रपाठकः ॥ १ ॥

(अथ षष्ठाष्टके द्वितीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्यज्ञं विच्छिन्द्याद्यदुभावविमुच्य यथाऽऽनागताया ऽऽतिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान्भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्न्यैवानमतं

(आतिथ्येष्ट्यभिधानम्)

निर्वपति यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्न्यिया एव (१) एष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै यावद्धिर्वै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्यै (२) एवैतेन करोत्यग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवार्ध रुन्धे ब्रह्मवादिनो वदन्ति कस्मात्सत्या-द्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यदेवादः सोममा (३) अहरत्तस्माद्गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चोपरिष्टाच्च शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतं नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवता स्तोमेन संमितास्तेजस्त्रिवृत्तेज एव यज्ञस्य शीर्षन्दधाति नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता प्राणेन संमितास्त्रिवृद्वै(४)प्राणस्त्रिवृतमेव प्राणमभिपूर्वं यज्ञस्य शीर्षन्दधाति प्रजापतेर्वा एतानि प-

कर्माणि यदश्वव ला ऐक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः संभरति देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन्ते देवाः कार्ष्मर्यमपश्यन्कर्मण्यो वै कर्मनेन कुर्वीतेति ते कार्ष्मर्यमयान्परिधीन् (५) अकुर्वत तैर्वै ते रक्षाꣳस्यपाघ्नत यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै सꣳ स्पर्शयति रक्षसामनन्ववचाराय न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहन्त्यूर्ध्वं समिधावा दधात्यु-परिष्टादेव रक्षाꣳस्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्ति (६) अग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यं क्रियते नाग्नय इति यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियतेऽथो खल्वाहुरग्निः सर्वा देवता इति यद्ध-विरासाद्याग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयति (७) ॥

(पत्नियाऽएव जगत्याऽआ त्रिवृद्वै परिधीन्वदन्त्ये-
कचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीय-प्रपाठके प्रथमोऽनुवाकः । १ ॥

———

(तानूनप्त्रेष्ट्यभिधानम्)

(अथ षष्ठाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः)।

देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्ते १ ऽन्योऽन्यस्मै ज्येष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स निर्क्रच्छाद्यः (१) नः प्रथमो १ ऽन्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्च्छति यत्तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवति पञ्च कृत्वोऽवद्यति पञ्चधा हि ते तत्समवद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आपतये त्वा गृह्णामीत्याह प्राणो वै (२) आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवद्यन्त शाक्रायेत्याह शक्त्यै हि ते ताः समवद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठꣳ हि ते तदात्मनः समवद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टꣳ ह्येतदनाधृष्यं देवानामोजः (३) इत्याह देवानाꣳ ह्येतदोजोऽभिशस्तिपा अनभिशस्तेन्यमित्याहाभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षा-

पतिमन्यतामित्याह यथायजुरेवैतद्घृतं वै देवा वज्रं कृत्वा सोममघ्नन्तिकमिव खलु वा अस्यै-तच्चरन्ति यत्तानूनप्त्रेण प्रचरन्त्यश्शुरश्शुस्ते देव सोमाऽऽप्यायतामित्याह यत् (४) एवास्यापु-वायते यन्मीयते तदेवास्यैतेनाऽऽप्याययत्या तुभ्य-मिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोभा-वेवेन्द्रं च सोमं चाऽऽप्याययत्या प्याययं सखी-न्त्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्ता-नेवाऽऽप्याययति स्वस्ति ते देव सोम सुत्यामं-शीय (५) इत्याहाऽऽशिषमेवैतामा शास्ते प्र वा एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्य-न्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्या-स्मिँल्लोके प्रतितिष्ठन्ति देवासुराः संयत्ता आसन्ते देवा बिभ्यतोऽग्निं प्राविशन्तस्मादाहुराग्निः सर्वा देवता इति ते (६) अग्निमेव वरूथं कृत्वाऽसु-रानभ्यभवन्नग्निमिव खलु वा एष प्र विशति योऽवान्तरदीक्षामुपैति भातृव्याभिभूत्यै भवत्या-त्मना पराऽस्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया संतरां मेखलाश् समा-यच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो भवति मदन्तीभिर्मार्जयते निर्ह्यग्निः शीतेन वार्यति समिद्ध्यै या ते अग्ने रुद्रिया तनूरित्याह स्वयैवै-नंदेवतया व्रतयति सयोनित्वाय शान्त्यै (७) ॥

(उपसद्धोमाभिधानम्)

(यो वा ओजं आहुर्यदशीयेति तेऽग्न एकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ षष्ठाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजताऽथ हारिणी ता देवा जेतुं नाशकनुवन्ता उपसदैवाजिगीषन्तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुꣳ सꣳस्कुर्वतामिमनिकिꣳ सोमꣳ शल्यं विष्णुं तेजनं तेऽब्रवन्क इमामंसिष्यतीति (१) रुद्र इत्यब्रुवन्रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिस्ताꣳरुद्रोऽवासृजत्स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान्प्राणुदत यदुपसदं उपसद्यन्ते भ्रातृव्यपराणुत्त्यै नान्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुयात्(२)अन्यन्मुखं कुर्यात्स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यै पराङ्क्रामतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान्प्र णुदते पुनरत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्यान्जित्वा भ्रातृव्यलोकमभ्यारोहति देवा वै याः प्रातरुपसदं उपासींदन्नक्षस्ताभिरसुरान्प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यत्सायंप्रातरुपसदः (३) उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान्प्र णुदते याः प्रातर्याज्याः

स्युस्ताः सायं पुरोनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान्प्रीणाति षट्सं पद्यन्ते षड्वा ऋतव ऋतूनेव प्रीणाति द्वादशाहीने सोम उपैति द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणाति चतुर्विꣳशतिः सम् (४) पद्यन्ते चतुर्विꣳशतिरर्धमासा अर्धमासानेव प्रीणात्यारांग्रामवान्तरदीक्षामुपेयाद्यः कामयेतास्मिन्मे लोकेऽधुंकꣳ स्यादित्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आरांग्राऽवान्तरदीक्षाऽस्मिन्नेवास्मै लोकेऽधुंकं भवति परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन्मे लोकेऽधुंकꣳस्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षाऽमुष्मिन्नेवास्मै लोकेऽधुंकं भवति (५) ॥

(असिष्यतीति जुहुयात्सायंप्रातरुपसदश्चतुर्विꣳशतिः सं चतुरोऽग्रे षोडश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

सुवर्गं वा एते लोकं यन्ति य उपसद उपयन्ति तेषां य उन्नयते हीयत एव स नोदनेषीति सून्नीयमिव यो वै स्वार्थेतां यताꣳश्रान्तो हीयत उत स निष्टचार्य सह वसति तस्मात्सकृद्वन्नीय नापरमन्न-

(वेद्यभिधानम्)

येत दध्नोन्नयेतैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे (१) यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राविशत्तं देवा हस्तान्त्सꣳरभ्यैच्छन्तमिन्द्र उपर्युपर्यत्यक्रामत्सोऽब्रवीत्को माऽयमुपर्युपर्यत्यक्रमीदित्यहं दुर्गे हन्तेत्यथ कस्त्वमित्यहं दुर्गादाहर्तेति सोऽब्रवीद्दुर्गे वै हन्ताऽवोचथा वराहोऽयं वाममोषः (२) सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति तं जहि यदि दुर्गे हन्ताऽसीति स दर्भपुञ्जीलमुद्वृह्य सप्त गिरीन्भित्त्वा तमहन्त्सोऽब्रवीद्दुर्गाद्वा आहर्ताऽवोचथा एतमा हरेति तमेभ्यो यज्ञ एव यज्ञमाऽहरद्यत्तद्वित्तं वेद्यमसुराणामविन्दन्त तदेकं वेद्यै वेदित्वमसुराणाम्(३)वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवानां ते देवा अब्रुवन्नस्त्वेव नोऽस्यामपीति किंवदो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमा त्रिः सर्वतः पर्यक्रामत्तदिमामविन्दन्त यदिमामविन्दन्त तद्वेद्यै वेदित्वꣳ (४)सा वा इयꣳ सर्वैव वेदिरिति शक्ष्यामीति त्वा अवमायं यजन्ते त्रिꣳशत्पदानि पश्चात्तिरश्ची भवति षट्त्रिꣳशत्प्राची चतुर्विꣳशतिः पुरस्तात्तिरश्ची दशदश सं पद्यन्ते दशाक्षरा विराडन्नं विराडविराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवास्या अमेध्यं तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति बर्हिः स्तृणाति तस्मादोष-

धयः पुनरा भवन्त्युत्तरं बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवार्यजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरः (५)

(रुन्धे वाममोषो वेदित्वमसुराणां वेदित्वं भवन्ति पञ्चविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

यद्वा अनींशानो भारमादत्ते वि वै स लिꣳशते यद्वादꣳश साहनस्योपसदः स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साहनस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वत्सस्यैकः स्तनो भागी हि सोऽयैकꣳ स्तनं व्रतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद्वै (१) क्षुरपवि नाम व्रतं येन प्र जाताञ्भ्रातृव्यान्नुदते प्रति जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरोऽग्रे स्तनान्व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्वै सुजघनं नाम व्रतं तपस्यꣳ सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव (२) राजन्यो वज्रस्य रूपꣳ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पष्टये पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पय-

(व्रतनिरूपणम्)

स्तेजसैव तेजः पय आत्मन्धत्तेऽथो पयसा वै गर्भा वर्धन्ते गर्भ इव खलु वा एष यद्दीक्षितो यदस्य पयो व्रतं भवत्यात्मानमेव तद्वर्धयति त्रिव्रतो वै मनुरासीद्द्विव्रता असुरा एकव्रताः (३) देवाः प्रातर्मध्यंदिने सायं तन्मनोर्व्रतमासीत्पाकयज्ञस्य रूपं पुष्ट्यै प्रातश्च सायं चासुराणां निर्मध्यं क्षुधो रूपं ततस्ते पराऽभवन्मध्यंदिने मध्यरात्रे देवानां ततस्तेऽभवन्त्सुवर्गं लोकमायन्यदस्य मध्यंदिने मध्यरात्रे व्रतं भवति मध्यतो वा अन्नेन भुञ्जते मध्यत एव तद्यजँ धत्ते भ्रातृव्याभिभूत्यै भवत्यात्मना (४) पराऽस्य भ्रातृव्यो भवति गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितो दीक्षित-विमितात्प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष वै व्याघ्रः कुलगोपो यदग्निस्तस्माद्यद्दीक्षितः प्रवसेत्स एन-मीश्वरोऽनूत्थाय हन्तोर्न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शाय एतद्वै यजमानस्याऽऽयतनꣳ स्व एवाऽऽयतने शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये ॥ ५ ॥

(एतद्वै क्रूर इवैकव्रता आत्मना यजमानस्य त्रयोदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीय-प्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः)।

पुरोहविषि देवयजने याजयेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदित्येतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यत्युपैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयत्याशे देवयजने याजयेद्धातृव्यवन्तं पन्थां वाऽधिस्पर्शयेत्कर्तं वा यावन्नानंसे यातवै (१) न रथायैतद्वा आशं देवयजनमाप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य आप्नोत्येकोन्नते देवयजने याजयेत्पशुकाममेकोन्नताद्वै देवयजनादङ्गिरसः पशूनसृजन्तान्तरा सदोहाविर्धाने उन्नतꣳ स्यादेतद्वा एकोन्नतं देवयजनं पशुमानेव भवति व्युन्नते देवयजने याजयेत्सुवर्गकामं व्युन्नताद्वै देवयजनादङ्गिरसः सुवर्गं लोकमायन्नन्तराऽऽहवनीयं च हविर्धानं च (२) उन्नतꣳ स्यादन्तरा हविर्धानं च सदश्चान्तरा सदश्च गार्हपत्यं चैतद्वै व्युन्नतं देवयजनꣳ सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत्प्रतिष्ठाकाममेतद्वै प्रतिष्ठितं देवयजनं यत्सर्वतः समं प्रत्येव तिष्ठति यत्रान्याअन्या ओषधयो व्यतिषक्ताः स्युस्तद्याजयेत्पशुकाममेतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशून् (३) अव रुन्धे पशुमानेव भवति निर्ऋतिगृहीते देवयजने याजयेद्यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमित्येतद्वै निर्ऋतिगृहीतं देवयजनं यत्सदृशैः सत्या

(उत्तरवेदिनिरूपणम्)

ऋक्षं निर्ऋत्यैवास्य यज्ञं ग्राहयति व्यावृत्ते देवयजने याजयेद्व्यावृत्कामं यं पात्रे वा तल्पे वा मीमाꣳसेरन्प्राचीनमाहवनीयात्प्रवणꣳ स्यात्प्रतीचीनं गार्हपत्यादेतद्वै व्यावृत्तं देवयजनं वि प्राप्मना भ्रातृव्येणाऽऽ वर्तते नैनं पात्रे न तल्पे मीमाꣳसन्ते कार्यं देवयजने याजयेद्भूतिकामं कार्यो वे पुरुषो भवत्येव (४) ॥

(यातवै हविर्धानं च पशून्नाप्मनाऽष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके सप्तमाऽनुवाकः) ।

तेभ्य उत्तरवेदिः सि ही रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठत्ते देवा अमन्यन्त यत्तरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तामुपामन्त्रयन्त साऽब्रवीद्वरं वृणै सर्वान्मया कामान्व्यश्नवथ पूर्वा तु माऽग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याधारयन्ति वारेवृतꣳ ह्यस्ये शर्म्यया परिमिमीते (१) मात्रैवास्ये साऽथो युक्तेनैव युक्तमवं रुन्धे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत्तिक्तायनी मेऽसीत्याह तिक्तान्ह्येनानावदर्धतान्मा नाथितामित्याह नाथितान्ह्येनानावदर्धतान्मा व्यथितामित्याह व्यथितान्ह्येनानावद्विदेरग्निर्नभो नाम (२) अग्ने अङ्गिर इति त्रिर्हरति य एवैषु लोके-

ष्वन्नयस्तानेवाव रुन्धे तूष्णीं चतुर्थꣳ हरत्यनि-
रुक्तमेवाव रुन्धे सिꣳहीरसि महिषीरसीत्याह
सिꣳहीह्येषा रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठ-
दुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमा-
नमेव प्रजया पशुभिः प्रथयति ध्रुवा (३)
असीति सꣳ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः
शुम्भस्वेत्यव चोक्षति प्र च किरति शुद्ध्या
इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वित्याह दिग्भ्य
एवैनां प्रोक्षति देवाꣳश्चेदुत्तरवेदिरुपावर्तीहैव वि
जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त
तानिन्द्रघोषो वसुभिः पुरस्तादप (४) अनुदत
मनोजवाः पितृभिर्दक्षिणतः प्रचेता रुद्रैः पश्चा-
द्विश्वकर्माऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति
दिग्भ्य एव तद्यजमानो भ्रातृव्यान्प्र णुदत इन्द्रो
यतीन्त्सालावृकेभ्यः प्रायच्छत्तान्दक्षिणत उत्तर-
वेद्या आदन्यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत
उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत्तेन शमयति
यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति (५) ॥

मिमीते नाम ध्रुवाऽर्प शुचा त्रीणि च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सोत्तरवेदिरब्रवीत्सर्वान्मया कामान्व्यश्नवथेति

(व्याघारणविधिः)

ते देवा अकामयन्तासुरान्भ्रातृव्यानभि भवेमेति तेऽजुहवुः सि॒ꣳहीर॑सि सपत्नसा॒ही स्वाहेति तेऽसु॒रान्भ्रातृ॒व्यानभ्यभवन्तेऽसु॒रान्भ्रातृ॒व्यानभिभूयाकामयन्त प्रजां वि॑न्देमहीति तेऽजुहवुः सि॒ꣳहीर॑सि सुप्रजाव॒निः स्वाहेति ते प्रजाम॑विन्दन्त ते प्रजां वित्त्वा (१) अकामयन्त पशून्वि॑न्देमहीति तेऽजुहवुः सि॒ꣳहीर॑सि रायस्पोष॒वनिः स्वाहेति ते पशू॑नविन्दन्त ते पशून्वित्त्वाऽकामयन्त प्रतिष्ठां वि॑न्देमहीति तेऽजुहवुः सि॒ꣳहीर॑स्यादित्यव॒निः स्वाहेति त इमां प्र॑तिष्ठाम॑विन्दन्त त इमां प्र॑तिष्ठां वित्त्वाऽकामयन्त देवता॑ आशिष॒ उपे॑यामेति तेऽजुहवुः सि॒ꣳहीर॑स्या वꣳह देवान्दे॑वय॒ते (२) यज॑मानाय स्वाहेति ते देवता॑ आशिष॒ उपाऽऽय॒न्पञ्च॑ कृत्वो व्याघा॑रयति पञ्चाक्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो य॒ज्ञमे॒वाव॑ रुन्धेऽक्ष॒णया व्याघा॑रयति तस्मा॑दक्ष॒णया प॒शवोऽङ्गा॑नि प्र हर॑न्ति प्रति॑ष्ठित्यै भू॒तेभ्य॒स्त्वेति स्रुच॒मुद्गृ॑ह्णाति य एव देवा भू॒तास्तेषां॑ तद्भा॒गधे॑यं ताने॒व तेन॑ प्रीणाति पौतु॒द्रवा॒न्परि॑धी॒न्परि॑ दधात्ये॒षाम् (३) लो॒कानां॑ वि॒धृत्या अ॒ग्नेस्त्र॒यो ज्याया॑ꣳसो भ्रातर॑ आस॒न्ते दे॒वेभ्यो॑ ह॒व्यं व॑हन्तः प्रामी॑यन्त सो॑ऽग्नि॒र॑बिभेदि॒त्थं वाव स्य आर्ति॑माऽरि॑ष्यतीति स नि॑लाय॒त स यां व॑न॒स्पति॒ष्ववा॑त्सी॒त्तां पू॒तु॒द्रौ यामो॑षधी॒षु ताꣳ सु॑गन्धि॒तेज॑ने॒ यां प॒शुषु॒ तां पेत्वा॑स्यान्तरा शृङ्गे॑ तं देवताः

प्रैषमैच्छन्तमन्वंविन्दन्तमंब्रुवन् (४) उप॑ न आ वर्तस्व हव्यं नो॑ वहेति सोऽब्रवीद्वरं वृणै यदेव गृह्हीतस्याहुतस्य बहिःपरिधि स्कन्दात्तन्मे भ्रातृणां भागधेयंमसदितितस्माद्यद्गृहीतस्याहुतस्य बहिः-परिधिस्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति सोऽमन्यतास्थन्वन्तौ मे पूर्वे भ्रातरः प्रामेषतास्थानिं शातया इति स यानिं (५) अस्थान्यशातयत तत्पूतुंद्रवभवद्यन्माꣳसमुपमृतं तद्गुल्गुलु यदेतान्त्सँभारान्त्सं भरत्यग्निमेव तत्सं भरत्यग्निमेव तत्सं भरत्यग्नेः पुरीषमसीत्याहाग्नेर्ह्येत-त्पुरीषं यत्सँभारा अथो खल्वाहुरेते वावैनं ते भ्रातरः परिं शेरे यत्पौतुंद्रवाः परिधय इतिं (६) ॥

(वित्त्वा देवयत एषामंब्रुवन्यानि चतुंश्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके नवमोऽनवाकः) ।

बद्धमवं स्यति वरुणपाशादेवैनं मुञ्चति प्र णेनेक्ति मेध्यं एवैनं करोति सावित्रियर्चा हुत्वा हंविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुंभयतो बद्धो यदक्षः स यदु-त्सर्जेयजमानस्य गृहान्भ्युत्सर्जेत्सुवाग्देव दुर्याꣳ आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्नीं (१)

(व्याघारणविधिः)

उपानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्वै पत्नीं यज्ञस्य करोति मिथुनं तदथो पत्नियैवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाꣳस्यप हन्ति यदध्वर्यरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युः (२) हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति प्राची प्रेतमध्वरं कल्पयन्ती इत्याह सुवर्गमेवैनं लोकं गमयत्यत्र रमेथां वर्ष्मन्पृथिव्या इत्याह वर्ष्म ह्येतत्पृथिव्या यद्वेवयजनꣳ शिरो वा एतद्यज्ञस्य यद्धविर्धानं दिवो वा विष्णवुत वा पृथिव्याः (३) इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य मेथीं नि हन्ति शीर्षत एव यज्ञस्य यजमान आशिषोऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमच्छिनद्यत्तृतीयं छादिहँविर्धानयोरुदाहियते तृतीयस्य हविर्धानस्यावरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानं विष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतं विष्णोः स्यूरसि विष्णोर्ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात्स विस्रस्यः (४) ॥

(पत्नीं हन्युर्वा पृथिव्या विष्यूतं विष्णोः
षड्विंशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसव इत्याभिमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदाभिराभिरासि नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्यै (१) इदमहꣳरक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात् (२) परस्तादर्वाचीं मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत्करोति यत्खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुम्बर ऊर्जैवोर्जꣳ समर्धयति यजमानेन संमितौदुम्बरी भवति यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति पितृणाꣳ सदनमसीति बर्हिरव स्तृणाति

(सदोभिधानम्)

पितृदेवत्यम् (३) ह्येतद्यन्निखातं यद्बर्हिरन्वस्तीर्यं मिनुयात्पितृदेवत्या निखाता स्याद्बर्हिरन्वस्तीर्यं मिनोत्यस्यामेवैनां मिनोत्यथो स्वारुहमेवैनां करोत्युद्दिवꣳ स्तभानाऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै युतानस्त्वा मारुतो मिनोत्वित्याह युतानो ह स्म वै मारुतो देवानामौदुम्बरीं मिनोति तेनैव (४) एनां मिनोति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतद्घृतेन द्यावापृथिवी आ पृणेत्यामित्यौदुम्बर्यौ जुहोति द्यावापृथिवी एव रसेनानक्त्यान्तमन्ववस्रावयत्यान्तमेव यजमानं तेजसाऽनक्त्यैन्द्रमसीति छदिरधि नि दधात्यैन्द्रꣳ हि देवतया सदो विश्वजनस्य छायेत्याह विश्वजनस्य ह्येषा छाया यत्सदो नवच्छदि (५) तेजस्कामस्य मिनुयात्त्रिवृता स्तोमेन संमितं तेजस्त्रिवृत्तेजस्यैव भवत्येकादशच्छदीन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियान्येव भवति पञ्चदशच्छदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशच्छदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविꣳशतिच्छदि प्रतिष्ठाकामस्यैकविꣳशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या उदरं वै सद ऊर्गौदुम्बरी मध्यत औदुम्बरीं मिनोति मध्यत एव प्रजानामूर्जं दधाति तस्मात् (६) मध्यत ऊर्जा भुञ्जते यजमानलोके

(उपरवाभिधानम्)

वै दक्षिणानि छदींषि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमानमेवार्यजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्वर्तान्करोति व्यावृत्त्यै तस्मादरण्य प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रꣳ हि देवतया सदो यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात्स विस्रꣳस्यः (७) ॥

(अपहत्यै तस्मात्पितृदेवत्यं नैनैव नवच्छदि
तस्मात्सप्तदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके एकादशोऽनुवाकः ।)

शिरो वा एतद्यज्ञस्य यद्ध्रुवाधिनिं प्राणा उपरवा हविर्धानिं खायन्ते तस्माच्छीर्षन्प्राणा अधस्तात्खायन्ते तस्मादधस्ताच्छीर्षणः प्राणा रक्षोहणो वलगहनो वैष्णवान्खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां प्राणेषु वलगान्यखनन्तान्वाहमात्रेऽन्वविन्दन्तस्माद्वाहुमात्राः खायन्त इदमहं तं वलगमुद्वपामि (१) यं नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ

(उपरवाभिधानम्)

वलग निखनंतस्तस्मादेवोद्धपति संतृणत्ति तस्मात्सं-
तृण्णा अन्तरतः प्राणा न सं भिनत्ति तस्मादसं-
भिन्नाः प्राणा अपोऽवं नयति तस्मादार्द्रा अन्तरतः
प्राणा यवमतीरवं नयति (२) ऊर्ग्वै यवः प्राणा
उपरवाः प्राणेष्वेवोर्जं दधाति बहिरवं स्तृणाति
तस्मात्लोमशा अन्तरतः प्राणा आज्येन व्याघा-
रयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव
तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न
सं तृणत्त्यसंतृण्णे हि हनू अथो खलु दीर्घसोमे
संतृत्यै धृत्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानम्
(३) प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म
ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवे-
दिरुदरꣳ सदो यदा खलु वै जिह्वया दर्भानधि
खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथो-
दरं गच्छति तस्माद्धविर्धाने चर्मञ्जधि ग्रावभिर-
भिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि
भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह
एवैनामियं वै विराडक्षस्यै त्वक्चर्मोधोऽधिषवणे
स्तना उपरवा ग्रावाणो वत्सा ऋत्विजो दुहन्ति
सोमः पयो य एवं वेद दुह एवैनाम् (४) ॥

(वपामि यवमतीरवं नयति हविर्धानमेव
त्रयोविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

— — —

(विष्णुयागविधानम्)

यदुभौ देवासुरा मिथस्तेषा॑ꣳ सुवर्गं यद्वा अनीशानः पुरोहविषि तेभ्य उत्त-
रवेदिः सोत्तरवेदिर्वज्रं देवस्याभ्रꣳ शिरो वा एकादश ॥ ११ ॥

यदुभावित्याह देवानां यज्ञो देवेभ्यो न रथाय यजमानाय
परस्तादर्वाचीं नवपञ्चाशत् ॥ ५९ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयः प्रपाठकः ॥ २ ॥

(अथ षष्ठाष्टके तृतीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

चात्वालाद्विष्णियानुप वपति योनिर्वै यज्ञस्य
चात्वालं यज्ञस्य मयोनित्वाय देवा वै यज्ञं परा-
ऽजयन्त तमाग्नीध्रात्पुनरपाजयन्नेतद्वै यज्ञस्यापरा-
जितं यदाग्नीध्रं यदाग्नीध्राद्विष्णियान्विहरति यदेव
यज्ञस्यापराजितं तत एवैनं पुनस्तनुते पराजि-
त्यैव खलु वा एते यन्ति ये बर्हिष्पवमानꣳ
सर्पन्ति बर्हिष्पवमाने स्तुते (१) आहाग्नीदग्नी-
न्वि हर बर्हिः स्तृणाहि पुरोडाशाꣳ अलं कुर्विति
यज्ञमेवापजित्य पुनस्तन्वाना यन्त्यङ्गारैर्द्वे सवने
वि हरति शलाकाभिस्तृतीयꣳ सशुक्त्वायाथो सं
भरत्येवैनद्विष्णिया वा अमुष्मिँल्लोके सोममरक्षन्ते-
भ्योऽधि सोममाऽहरन्तमन्ववायन्तं पर्यविशन्य एवं

(धिष्ण्यायभिधानम्)

वेद विदन्ते (२) परिवेष्टारं ते सोमपीथेन व्यार्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान्देवा अब्रुवन्द्वेद्वे नामनी कुरुध्वमथ प्र वाऽऽप्स्यथ न वेत्यग्नयो वा अथ धिष्ण्यास्तस्माद्द्विनामा ब्राह्मणोऽधुकस्तेषां ये नेदिष्ठं पर्यविशन्ते सोमपीथं प्राऽऽप्नुवन्नाहवनीय आग्नीध्रीयो होत्रीयो मार्जालीयस्तस्मात्तेषु जुह्वत्यतिहाय वषट्करोति वि हि (३) एते सोमपीथेनाऽऽर्ध्यन्त देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्ताꣳस्ताभिः प्राणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्ताꣳस्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङ्ङासीनो धिष्ण्यान्व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्रणुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीः (४) जायन्ते प्राणा वा एते यद्धिष्ण्या यदध्वर्युः प्रत्यङ्धिष्ण्यानातिसर्पेत्प्राणान्त्स कर्षेत्प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङपानो यदध्वर्युः प्रत्यङ्होतारमतिसर्पेदपाने प्राणं दध्यात्प्रमायुकः स्यान्नाध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुपगायेदुद्वात्रे (५) वाचꣳ सं प्र यच्छेदुपदासुकाऽस्य वाक्स्याद्ब्रह्मवादिनो वदन्ति नासꣳस्थिते सोमेऽध्वर्युः प्रत्यङ्सदोऽतीयादथ कथा दक्षिणानि होतुमेति यामो हि स तेषां कस्मा

(अग्नीषोमप्रणयनाभिधानम्)

अहं देवा यामं वाऽयामं वाऽनु ज्ञास्यन्तीत्युत्तरेणाऽऽग्नीध्रं परीत्य जुहोति दाक्षिणानि न प्राणान्त्सं कर्षति न्यन्ये धिष्ण्या उप्यन्ते नान्ये यान्निवपति तेन तान्प्रीणाति यान्न निवपति यदनुदिशति तेन तान् (६) ॥

(स्तुते विन्दते हि वीयन्ते प्रतीचीरुद्वाऽउप्यन्ते चतुर्दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ षष्ठाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः) ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्जनानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत आहवनीये जुहोति सुवर्गमेवैनं लोकं गमयति देवान्वै सुवर्गं लोकं यतो रक्षाꣳस्यजिघाꣳसन्ते सोमेन राज्ञा रक्षाꣳस्यपहत्याप्तमात्मानं कृत्वा सुवर्गं लोकमायन्रक्षसामनुपलाभायाऽऽत्तः सोमो भवत्यथं (१) वैसर्जनानि जुहोति रक्षसामपहत्यै त्वꣳ सोम तनूकृद्भ्य इत्याह तनूकृद्भ्येष द्वेषोभ्योऽन्यकृतेभ्य इत्याहान्यकृतानि हि रक्षाꣳस्युरु यन्ताऽसि वरूथमित्याहोरु णस्कृधीति वावैतदाह जुषाणो अप्तुराज्यस्य वेत्वित्याहाप्तुमेव यजमानं कृत्वा सुवर्गं लोकं गमयति रक्षसामनुपलाभायाऽऽ

(अग्नीषोमप्रणयनाभिधानम्)

सोमं ददते (२) आ ग्राव्ण आ वायव्यान्या द्रोणकलशमुत्पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गं लोकमेति नयंवत्यर्चाऽऽग्नीध्र जुहोति सुवर्गस्य लोकस्याभिनीत्यै ग्राव्णो वायव्यानि द्रोणकलशमाग्नीध्र उप वासयति वि ह्येनं तेनर्द्धुते यत्महोपवासयेदपवाथेतं सौम्यर्चा प्र पादयति स्वया (३) एवैनं देवतया प्र पादयत्यदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्येतत्त्वꣳ सोम देवो देवानुपागा इत्याह देवो ह्येष सन् (४) देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो ह्येष सन्मनुष्यानुपेति यदेतद्यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्यात्सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानाꣳ स्वधा पितृभ्य इत्याह स्वधाकारो हि (५) पितृणामिदमह निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यतेऽग्नेर्बतपत आत्मनः पुर्वा तनूरादेयेत्याहुः को ह तद्वेद यद्बहवोऽन्तस्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवं विद्वान्ग्राव्ण आग्नीध्र उपवासयति नैनं मलिम्लुसेना विन्दति (६) ॥

(अथ ददते स्वया सन्त्स्वधाकारो हि विन्दति)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः)।

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतयाऽच्छैत्यत्यन्यानगां नान्यानुपागामित्याहाति ह्यन्यानेति नान्यानुपैत्यर्वाक्त्वा परैरविदं परोऽवरैरित्याहार्वाग्घ्येनं परैर्विन्दति परोऽवरैस्तं त्वा जुषे (१) वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्त्योषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत्तमप्या हरेत्सतेजसम् (२) एवैनमा हरतीमे वै लोका यूपात्प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीरित्याहैभ्य एवैनं लोकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्याह वनस्पतेर्वा एष वल्शो यद्यूपस्तस्मादाह वनस्पते शतवल्शो वि रोहेति सहस्रवल्शा वि वयꣳ रुहेमेत्याहाऽऽशिषमेवैतामा शास्तेऽनक्षसक्तम् (३) वृश्चेदक्षसक्तं वृश्चेदधर्षं यजमानस्य प्रमायुकꣳ स्यां यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै

(यूपखण्डनाभिधानम्)

वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोऽप्रतिष्ठित एव भवति यं कामयेतापशुः स्यादित्यपर्णं तस्मै शुष्काग्रं वृश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति बहुपर्णं तस्मै बहुशाखं वृश्चेदेष वै (४) वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत्प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाधोनै रूढः प्रत्येव तिष्ठति यः प्रत्यङ्नतस्त वृश्चेत्स हि मेध्यु-भ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्यं कामयेतापनमु त्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञः (५) नमति षडरत्निं प्रति-ष्ठाकामस्य षडवा ऋतवः ऋतुष्वेव प्रति तिष्ठति सप्तारत्निं पशुकामस्य सप्तपदा शक्करी पशवः शाक्वरी पशूनेवाव रुन्धे नवारत्निं तेजस्कामस्य त्रिवृता स्तोमेन संमितं तेजस्त्रिवृत्तेजस्व्येव भवत्ये-कादशारत्निमिन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिं-न्द्रियं त्रिष्टुगिन्द्रियाण्येव भवति पञ्चदशारत्निं भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्त-दशारत्निं प्रजाकामस्य सप्तदशः प्रजापतिः प्रजा-पतेरप्त्या एकविंशत्यरत्निं प्रतिष्ठाकामस्यैक-विंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर्भ-वत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञ-मुखं तेजसैव गायत्रिया यज्ञमुखेन संमितः (६)॥

(यूपस्थापनाभिधानम्)

(जुषे सतेनसमनक्षसङ्गं बहुशास्त्रं वृष्णेदेव वै यज्ञ उपैनमुत्तरो यज्ञ आप्त्या एकान्नविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीय-प्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति परांश्चं प्रोक्षति परांङिव हि सुवर्गो लोकः क्रूरमिव वा एतत्करोति यत्खनत्यपोऽवं नयति शान्त्यै यवमतीरवं नयत्यूर्ग्वै यवो यजमानेन यूपः संमितो यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति (१) पितृणाꣳ सदनमसीति बर्हिरवं स्तृणाति पितृदेवत्या१ꣳ ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्यं मिनुयात्पितृदेवत्यो निखातः स्याद्बर्हिरवस्तीर्यं मिनोत्यस्यामेवैनं मिनोति यूपशकलमवास्यति सतेजसमेवैनं मिनोति देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति षषालं प्रति (२) मुञ्चति तस्मात्छीर्षत ओषधयः फलं गृह्णन्त्यनक्ति तेजो वा आज्यं यजमानेनाग्निष्ठाऽग्निः संमिता यदग्निष्ठामग्निमनक्ति यजमानमेव तेजसाऽनक्त्यान्तमनक्त्यान्तमेव यजमानं तेजसाऽनक्ति सर्वतः परि मृशत्यपरिवर्गमेवास्मिन्तेजो दधात्युद्दिवꣳ स्तभानाऽन्तरिक्षं पृणेत्याहैषां लोकानां धृत्यै

(यूपस्थापनाभिधानम्)

वैष्णव्यर्चा (३) कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति द्विपाद्यजमानः प्रतिष्ठित्यै यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठां तस्याश्रीमाहवनीयादित्थं वेत्थं वाऽतिं नावयेत्तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यं कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्धयेयमिति (४) अग्निष्ठां तस्याश्रीमाहवनीयेन सं मिनुयात्तेजसैवैनं देवताभिरिन्द्रियेण समर्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत्परिं व्ययत्यूर्ग्वै रशना यजमानेन यूपः संमितो यजमानमेवोर्जा समर्धयति नाभिदघ्ने परिं व्ययति नाभिदघ्न एवास्मा ऊर्जं दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनम् (५) व्यर्धयेयमित्यूर्ध्वां वा तस्यावाचीं वाऽवोहेदूर्जैवैनं व्यर्धयति यदिं कामयेत वर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेद्वृष्टिमेव नियच्छति यदिं कामयेतावर्षुकः स्यादित्यूर्ध्वामुदूहेद्वृष्टिमेवोद्यच्छति पितृणां निखातं मनुष्याणामूर्ध्वं निखातादा रशनाया ओषधीनाꣳ रशना विश्वेषाम् (६) देवानामूर्ध्वꣳ रशनाया आ चषालादिन्द्रस्य चषालꣳ साध्यानामतिरिक्तꣳ स वा एष सर्वदेवत्यो यद्यूपो यद्यूपं मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त

(अग्निमन्थनाभिधानम्)

मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं लोकमायन्तमृषयो यूपेनैवानु प्राजानन्तद्यूपस्य यूपत्वम् (७) यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान्मिनोति पुरस्ताद्धि यज्ञस्य प्रज्ञायते प्रज्ञातꣳ हि तद्यदतिपन्न आहुरिदं कार्यमासीदिति साध्या वै देवा यज्ञमत्यमन्यन्त तान्यज्ञो नास्पृशत्तान्यद्यज्ञस्यातिरिक्तमासीत्तदस्पृशदतिरिक्तं वा एतद्यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेतत् (८) यूपस्य यदूर्ध्वं चषालात्तेषां तद्भागधेयं तानेव तेन प्रीणाति देवा वै सꣳस्थिते सोमे प्र स्रुचोऽहरन्प्र यूपं तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरꣳ स्रुचां निष्कर्यणमपश्यन्स्वरुं यूपस्य सꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति स्वरुमेव यज्ञवेशसाय (९) ॥

(दधाति पत्युचा समर्धयेयामित्युर्जैनं विश्वेषां यूपत्वमतिरिक्तमेतद्द्वि-चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः) ।

साध्या वै देवा अस्मिँल्लोक आसन्नान्यत्किंचन मिषत्तेऽग्निमेवाग्नये मेधायाऽलभन्त न ह्यन्यदालम्भ्यमविन्दन्ततो वा इमाः प्रजाः प्राजायन्त

(अग्निमन्थनाभिधानम्)

यद्ग्रावभिं मंथित्वा प्रहरंति प्रजानां प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत्पशुमालभ्याग्निं मन्थेद्रुद्राय यजमानम् (१) अपि दध्यात्प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता हविरेतद्यत्पशुरिति यत्पशुमालभ्याग्निं मन्थति हव्यायैवाऽऽत्मन्नाय सर्वा देवता जनयत्युपाकृत्यैव मन्थ्यस्तन्नेवाऽऽलब्धं नेवानालब्धमग्नेर्जनित्रमसीत्याहाग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ (२) ह्येतावूर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं दधाथामित्याह वृषणश्च ह्येते दधाते ये अग्निं गायत्रं छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्यग्नये मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायानु ब्रूहि (३) प्रहियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा अन्वाह गायत्रछंन्दा वा अग्निः स्वेनैवैनं छन्दसा समर्धयत्यग्निः परा भवत्यग्निं मथित्वा प्र हरति तौ संभवन्तौ यजमानमभि सं भवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवास्मा अन्नमपि दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा (४) ॥

(यजमानमाह वृषणौ जातायानु ब्रूहष्य-
ष्टादश च)।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
तृतीयाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः)।

इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजत उपवीरसीत्याहोप ह्येनानाकरोत्युपो देवान्दैवीर्विशः प्रागुरित्याह दैवीर्ह्येता विशः सतीर्देवानुपयन्ति वह्निरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह बृहस्पते धारया वसूनीति (१) आह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनवरुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान्देव त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः प्रसव इति (२) रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्या ऋतस्य त्वा देवहविः पाशेनाऽऽरभ इत्याह सत्यं वा ऋतꣳ सत्येनैवैनमृतेनाऽऽ रभतेऽक्षण्या परि हरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा मानुषानिति नि युनक्ति धृत्या अद्भ्यः (३) त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत्पशुरपां पेरुरसीत्याहैष ह्यषां पाता यो मेध्यायाऽऽ रभ्यते स्वात्तं चित्सदेवꣳ हव्यमापो देवीः

(सामिधेन्याद्यभिधानम्)

स्वदतैनमित्याह स्वदयत्येवैनमुपरिष्टात्प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्तरत एवैनं मेध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यं करोति (४)॥

(वसूनीति प्रसव इत्यद्भ्योऽन्तरत एवैनं दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ षष्ठाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः)।

अग्निना वै होत्रा देवा असुरानभ्यभवन्नग्नये समिध्यमानायानु ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरं प्रजा अनु प्र जायन्ते प्रजानां प्रजननाय देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्स प्रजापतिस्तूष्णीमाधारम् (१) आऽधारयत्ततो वै देवा यज्ञमन्वपश्यन्यत्तूष्णीमाधारमाधारयति यज्ञस्यानुरूपात्या असुरेषु वै यज्ञ आसीत्ते देवास्तूष्णीꣳ होमेनावृञ्जत यत्तूष्णीमाधारमाधारयति भ्रातृव्यस्यैव तद्यज्ञं वृङ्क्ते परिधीन्त्सं मार्ष्टि पुनात्येवैनान्त्रिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै द्वादश सं पद्यन्ते द्वादश(२)मासाः संवत्सरः संवत्सरमेव प्रीणात्यथो

(सामिधेन्याद्यभिधानम्)

संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै शिरो वा एतद्यज्ञस्य यदाधारोऽग्निः सर्वा देवता यदाधारमाधारयति शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद्यज्ञस्य यदाधार आत्मा पशुराधारमाधार्य पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य (३) शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावेवास्य प्राणं जुहोति सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्याह यज्ञपतिमेवास्याऽऽशिषं गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात्पशुमभ्यवमीत्तस्मादुपरिष्टात्पशोर्नावं, द्यन्ति यदुपरिष्टात्पशुꣳ समनक्ति मेध्यमेव (४) एनं करोत्यृत्विजो वृणीते छन्दाꣳस्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्या एकादश प्रयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानं परि शये वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्घृतेनाक्तौ पशुं त्रायेयामित्याह वज्रेणैवैनं वशे कृत्वाऽऽ लभते (५) ॥

(आधारं पञ्चन्ते द्वादशाऽऽत्मैवेव यज्ञस्य

मेध्यमेव खलु वा अष्टादश च) ।

(पशुहिंसनाभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः)।

पर्यग्नि करोति सर्वहुतमेवैनं करोत्यस्कन्दाया-स्कन्नꣳ हि तद्यदध्रुतस्य स्कन्दति त्रिः पर्यग्नि क-रोति त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशूꣳर्नान्वारभ्याꣳ इति मृत्यवे वा एष नीयते यत्पशुस्तं यदन्वारभेत प्रमायुको यजमानः स्यादथो खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत् (१) पशुरिति यन्नान्वारभेत सुवर्गाल्लोकाद्यजमानो हीयेत वपाश्रपणीभ्याम-न्वारभते तन्नेवान्वारब्धं नेवानन्वारब्धमुप प्रेष्य होतर्हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते रेवतीर्यज्ञपतिं प्रियधाऽऽ विशतेत्याह यथायजुरेवैत-दग्निना पुरस्तादिति रक्षसामपहत्यै पृथिव्याः संपृचः पाहीति बर्हिः (२) उपास्यत्यस्कन्दायास्कन्नꣳ हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवनं करोति पराङ्ङा वर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्पशुभ्य एव तन्नि ह्नुत आत्मनोऽनावस्काय गच्छति श्रियं प्र पशूना-प्नोति य एवं वेद पश्चाल्लोका वा एषा प्राच्युदानी-यते यत्पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मयः (३) आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै घृतस्य

कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाऽऽ-
शिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्या-
ह यथायजुरेवैतत् (४) ॥

(लोकार्थं नीयते यद्धवीं रश्मयः
सप्तविंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीय-
प्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके नवमोऽनुवाक.) ।

पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक्त
आ प्यायतां प्राणस्त आ प्यायतामित्याह प्राणेभ्य
एवास्य शुचꣳ शमयति सा प्राणेभ्योऽधि पृथिवीꣳ
शुक्र्प्र विशति शमहोभ्यामिति नि नयत्यहोरात्रा-
भ्यामेव पृथिव्यै शुचꣳ शमयत्योषधे त्रायस्वैनꣳ
स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः
(१) शान्त्यै पार्श्वत आ च्छ्यति मध्यतो हि
मनुष्या आ च्छ्यन्ति तिरश्चीनमा च्छ्यत्यनूची-
नꣳ हि मनुष्या आच्छ्यन्ति व्यावृत्त्यै रक्षसां
भागोऽसीति स्थविमतो बहिर्धा रक्त्वाऽपास्यत्यस्नैव
रक्षाꣳसि निरवदयत इदमहꣳ रक्षोऽधमं तमो
नयामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ
वाव पुरुषौ यं चैव (२) द्वेष्टि यश्चैनं द्वेष्टि तद्ध-
भावयन्नमं तमो नयतीषे त्वोर्ति वपामुत्खिदतीच्छत

(वपाहोमाभिधानम्)

इव खेष यो यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून्घातुकः स्याद्यन्नोपतृन्द्यादयता स्यादन्ययोपतृणत्त्यन्यया न धृत्यै घृतेन द्यावापृथिवी प्रोर्णोत्यापमित्याह द्यावापृथिवी एव रसेनानक्त्यच्छिन्नः (३) रायः सुवीर इत्याह यथायजुरेवैतत्कुरुमिव वा एतत्करोति यद्वपामुत्खिदत्यूर्वन्तरिक्षमन्विहीत्याह शान्त्यै प्र वा एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्यग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येन (४) अन्वेति नान्तमगारमति हरेद्यदन्तमगारमतिहरेद्देवता अति मन्येत वायो वीहि स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अवं पद्यन्तेऽग्रं वा एतत्पशूनां यद्वपाऽग्रमोषधीनां बर्हिरग्रेणैवाग्रꣳ समर्धयत्यथो ओषधीष्वेव पशून्प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह (५) यज्ञस्य समिष्टय्यै प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्ध्वनभसं मारुतं गच्छतमित्याहोर्ध्वनभा ह स्म वै मारुतो देवानां वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद्विष्वञ्चौ प्राणापानौ (६)॥

(स्वर्धितिश्चैवाच्छिन्नो हव्येनेष्येत्याह षट्चत्वारिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके दशमोऽनुवाकः)।

पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन न चरत्यूर्ग्वै पुरोडाश ऊर्जमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः पृच्छति शृतꣳहवीꣳः शमितरिति त्रिर्वपत्या हि देवा योऽशृतꣳशृतमाह स एनसा प्राणापानौ वा एतौ पशूनाम् (१) यत्पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति यत्पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति पशुना वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राक्षारयन्त्स प्रक्षोऽभवत्तत्प्रक्षस्य प्रक्षत्वं यत्प्लक्षशाखोत्तरबर्हिर्भवति समेधस्यैव (२) पशोरवं द्यति पशुं वै ह्रियमाणꣳ रक्षाꣳस्यनु सचन्तेऽन्तरा यूपं चाऽऽहवनीयं च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोऽप क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह मन एवास्यावरुन्ध एकादशावदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तस्यावं (३) द्यति

(अवदानाभिधानम्)

हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसो यद्वै हृदयेनाभिगच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर्वदत्येतद्वै पशोर्यथापूर्वं यस्यैवमवदाय यथाकामयुत्तरेषामवद्यति यथापूर्वमेवास्य पशोरवत्तं भवति मध्यतो गुदस्यावद्यति मध्यतो हि प्राण उत्तमस्यावद्यति (४) उत्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवावद्यते तदवदानानामवदानत्वं देवासुराः संयत्ता आसन्ते देवा अग्निमब्रुवन्त्वया वीरेणासुरानभि भवामेति (५) सोऽब्रवीद्वरं वृणे पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्धस्य गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन्पराऽसुरा यत्र्यङ्गाणाꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवत्यक्ष्णयाऽवद्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै (६) ॥

(एतौ पंशूनाꣳ समेधस्यैव तस्यावोत्तमस्यावद्यतीति पञ्चचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अनूयाजकथनम्)

(अथ षष्ठाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ।)

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधाति पार्श्वेन वसाहोमं प्रयौति मध्यं वा एतत्पशूनां यत्पार्श्वं रसं एष पशूनां यद्वसा यत्पार्श्वेन वसाहोमं प्रयौति मध्यत एव पशूनाꣳ रसं दधाति भ्रन्ति (१) वा एतत्पशुं यत्संज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि देध्यदित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर्भूरि ते सꣳ समेत्वित्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यत्सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्त सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्तम् (२) अवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहानुमतमेवैनं मात्रा पित्रा सुवर्गं लोकं गमयत्यर्धर्चं वसाहोमं जुहोत्यसो वा अर्धर्चं इयमर्धर्चं इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्जꣳ रसमव रुन्धे प्राणापानौ वा एतौ पशूनां यत्पृदाज्यं वानस्पत्याः खलु (३) वै देवतया पशवो यत्पृषदाज्यस्योपहत्याऽऽह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्यन्यस्यान्यस्य समवत्तꣳ समवयति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधातीडामुप ह्वयते

(अनूयाजकथनम्)

पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते (४) चतुष्पादो हि पशवो यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति मेदस्वत्तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यम् (५) पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात्तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिव पश्चात्सृष्टꣳ ह्येकादशानूयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत्पशुं यत्संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां यत्पृषदाज्यं यत्पृषदाज्येनानूयाजान्यजति प्राणापानावेव पशुषु दधाति (६) ॥

(घ्नन्ति यन्तं खलु चतुरुप ह्वयत आज्यं यत्पृषदाज्येन षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

चात्वालात्सुवर्गाय वैसर्जनानि वैष्णव्यर्चा पृथिव्यै साध्या इषे त्वेत्यग्निना पर्यग्नि पशोः पशुमालभ्य मेदसा स्रुचावेकादश ॥ ११ ॥

चात्वालादेवानुषैति मुञ्चति महियमाभ्याम पर्यग्नि पशुमालभ्य चतुष्पादो द्विषष्टिः ॥ ६२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयः प्रपाठकः ॥ ३ ॥

(अथ षष्ठाष्टके चतुर्थः प्रपाठकः)

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भि-
रेवासृजत यदुपयजं उपयजंति प्रजा एव तद्यज-
मानः सृजते जघनार्धादवं यंति जघनार्धाद्धि प्रजाः
प्रजायन्ते स्थविमतोऽवं यंति स्थविमतो हि प्रजाः
प्रजायन्तेऽसंभिन्दन्नवं यंति प्राणानामसंभेदाय न
पर्यावर्तयति यत्पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः
स्यात्समुद्रं गच्छ स्वाहेत्याह रेतः (१) एव
तद्दधात्यन्तरिक्षं गच्छ स्वाहेत्याहान्तरिक्षेणैवास्मै
प्रजाः प्र जनयत्यन्तरिक्षꣳ ह्यनु प्रजाः प्रजायन्ते
देवꣳ सवितारं गच्छ स्वाहेत्याह सवितृप्रसूत ए-
वास्मै प्रजाः प्र जनयत्यहोरात्रे गच्छ स्वाहेत्या-
हाहोरात्राभ्यामेवास्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु
प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहा (२)
इत्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति
सोमं गच्छ स्वाहेत्याह सौम्या हि देवतया प्रजा
यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति
छन्दाꣳसि गच्छ स्वाहेत्याह पशवो वै छन्दाꣳसि

(वसतीवरीर्त्यभिधानम्)

पशूनेवाव रुन्धे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परि गृह्णाति नभः (३) दिव्यं गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नियच्छत्यग्निं वैश्वानरं गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रतिष्ठापयति प्राणानां वा एषोऽवयाति योऽवयाति गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुपह्वयते पशोर्वा आलब्धस्य हृदयꣳ शुगृच्छति सा हृदयशूलम् (४) अभि समेति यत्पृथिव्याꣳ हृदयशूलमुद्वासयेत्पृथिवीꣳ शुचार्पयेद्यद्दुष्वपः शुचार्पयेच्छुष्कस्य चार्द्रस्य च संधावुद्वासयत्युभयस्य शान्त्यै यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति (५) ॥

(रेतो मित्रावरुणो गच्छ स्वाहा नमो हृदयशूलं द्वात्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः) ।

देवा वै यज्ञमाभीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन्वसतु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वं तस्मिन्प्रातर्न समशक्नुवन्तदुप्सु प्रावेशयन्ता वसतीवरीरभवन्वसतीवरीर्गृह्णाति

यज्ञो वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप वसति यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्यात् (१) यज्ञं वि च्छिन्द्याज्ज्योतिष्या वा गृह्णीयाद्धिरण्यं वाऽवधाय सङ्क्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुम्भ्यानां गृह्णीयात्स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यदन्वीपं तिष्ठन्गृह्णीयान्निर्मार्गुका अस्मात्पशवः स्युः प्रतीपं तिष्ठन्गृह्णाति प्रतिरुध्यैवास्मै पशून्गृह्णातीन्द्रः (२) वृत्रमहन्त्सोऽऽपोऽऽभ्यश्रियत तासां यन्मेध्यं यज्ञिय२ सदेवमासीत्तदत्यमुच्यत ता वहन्तीरभवन्वहन्तीनां गृह्णाति या एव मेध्या यज्ञिया: सदेवा आपस्तासामेव गृह्णाति नान्तमा वहन्तीरतीयाद्यदन्तमा वहन्तीरतीयाद्यज्ञमतिं मन्येत न स्थावराणां गृह्णीयाद्वरुणगृहीता वै स्थावरा यत्स्थावराणां गृह्णीयात् (३) वरुणेनास्य यज्ञं ग्राहयेद्यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात्ताम्रा आपो दिवा ददृश्रे यन्नक्तं भवत्यपोऽहः प्र विशति तस्मात्सन्द्रा आपो नक्तं ददृश्रे छायायै चाऽऽतपतश्च संधौ गृह्णात्यहोरात्रयोरेवास्मै वर्ण गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्मा२ अस्तु (४) सूर्य इत्याह सङ्क्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा अनुष्टुग्वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा

(सोमोपावहरणकथनम्)

गृह्णाति त्रिः सादयति सप्त सं पद्यन्ते सप्तपदा शाक्करी पशवः शाक्करी पशूनेवाव रुन्धेऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्वार्हपत्य उपसादयेदस्मिँल्लोके पशुमान्त्स्याद्यदा-हवनीयेऽमुष्मिन् (५) लोके पशुमान्त्स्यादुभ-योरुप सादयत्युभयो रेवैनं लोकयोः पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नि-योर्भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीध उप वासयत्येतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदेव यज्ञस्यापराजितं तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यद्वर्हन्तीनां गृह्णाति क्रियमा-णमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय न ह्येता ईलयन्त्या तृतीयमवनात्परि शेरे यज्ञस्य संतत्यै (६)

(स्यादिन्द्रो गृह्णीयादस्त्वमुष्मिन्क्रियते

षड्विꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः) ।

ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्त्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह

पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावहरति पुरा वाचः (१) प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक्तामव रुन्धेऽपोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाभि वाचं वि सृजति सर्वाणि छन्दाꣳस्यन्वाह पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे गायत्रिया तेजस्कामस्य परि दध्यात्त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्यानुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजाऽन्नकामस्य शृणोत्वग्निः समिधा हवम् (२) म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापोऽच्छैत्यप इष्य होतरित्याहेषितꣳ हि कर्म क्रियते मैत्रावरुणस्य चमसाध्वर्यवा द्रवेत्याह मित्रावरुणौ वा अपां नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपां नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो ह्यविष्कृतानामेवाभिघृतानां गृह्णाति (३) कार्षिरसीत्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य वोऽक्षित्या उन्नय इत्याह तस्मादुद्यमानाः पीयमाना आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं यज्ञो वसतीवरीर्होतृचमसं च मैत्रावरुणचमसं च सꣳस्पृशँ वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्यध्वर्योऽवेरपाꣳ इत्याहोतेमन्नमुरुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्यूक्थ्यः परिधौ नि मार्ष्टि

(सोमोन्मानकथनम्)

यथातिरात्रो यजुर्वदन्प्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै (४) ॥

(वाचो हवमभिधृतानां गृहमात्युत पञ्चविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाꣳशुसवनो यदुपाꣳशुसवनमभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आहियते पञ्च कृत्वो यजुषा मिमीते (१) पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीं दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाꣳ सोमपीथो य एवं वेद नाप्स्वार्तिमार्च्छति यत्ते सोम दिवि ज्योतिरित्याहैभ्य एवैनम् (२) लोकेभ्यः सं भरति सोमो वै राजा दिशोऽभ्यक्ष्यायत्स दिशोऽनु प्राविꣳशत्प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ सं भरत्यथो दिश एवास्मा अव रुन्धेऽम्ब नि ष्वरेत्याह कामुका एनꣳ स्त्रियो भवन्ति य एवं वेद यस्ते सोमादाभ्यं नाम जागृवीति

(उपांशुग्रहकथनम्)

(३) आहैष वै सोमस्य सोमपीथो य एवं वेद न सौम्यामार्तिमार्च्छति घ्नन्ति वा एतत्सोमं यदभिषुण्वन्त्यꣳशूनप गृह्णाति त्रायत एवैनं प्राणा वा अꣳशवः पशवः सोमोऽꣳशून्पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद्द्वौद्वौ प्राणाः (४)

(यजुषा मिमीत एनं जागृवीति चतुश्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳश्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्त्यरुणो ह स्माऽऽह्यौपवेशिः प्रातःसवन एवाहं यज्ञꣳ सꣳ स्थापयामि तेन ततः सꣳस्थितेन चरामीत्यष्टौ कृत्वोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव तेनाऽऽप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनं (१) सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयं द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोत्येताꣳह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दायास्कन्नꣳ हि तद्यज्ञस्य सꣳस्थितस्य

(उपांशुग्रहकथनम्)

स्कन्दत्यथो खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इत्यनतिवादुक एनं भ्रातृव्यो भवति य एवं वेद तस्मादृष्टावेष्टौ (२) कृत्वोऽभिषुत्य ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किंपवित्र उपांशुरिति वाक्पवित्र इति ब्रूयाद्बृहस्पतये पवस्व वाजिन्नित्याह वाचैवैनं पवयति वृष्णो अꣳशुभ्यामित्याह वृष्णो ह्येतावꣳशू यौ सोमस्य गर्भस्तिपूत इत्याह गर्भस्तिना ह्येनं पवयति देवो देवानां पवित्रमसीत्याह देवो ह्येषः (३) सन्देवानां पवित्रं येषां भागोऽसि तेभ्यस्त्वेत्याह येषाꣳ ह्येष भागस्तेभ्य एनं गृह्णाति स्वांक्तोऽसीत्याह प्राणमेव स्वमंक्त मधुमतीर्न इषस्कृधीत्याह सर्वमेवास्मा इदꣳ स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान्दधाति मनस्त्वा (४) अष्टवित्याह मन एवाश्नुत उर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो हि प्राणः स्वाहा त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभंवसो देवास्तेष्वेव परोक्षं जुहोति देवेभ्यस्त्वा मरीचिपेभ्य इत्याहाऽऽदित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद्भागधेयं तानेव तेन प्रीणाति यदि कामयेत वर्षुकः पर्जन्यः (५)स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति यदि

कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टि-
मेवोद्यच्छति यद्यभिचरेदमुं जह्यथं त्वा होष्यामीति
ब्रूयादाहुतिमेवैनं प्रेप्सन्हन्ति यद्दूरे स्यादा त-
मितोस्तिष्ठेत्प्राणमेवास्यानुगत्य हन्ति यद्यभिचरे-
दमुष्यं (६) त्वा प्राणे सादयामीति सादयेदसंशो
वै प्राणः प्राणमेवास्य सादयति षड्भिरृशुभिः
पवयति षडवा ऋतव ऋतुभिरेवैनं पवयति त्रिः
पवयति त्रय इमे लोका एभिरेवैनं लोकैः
पवयति ब्रह्मवादिनो वदन्ति कस्मात्सत्यात्रयः
पशूनाꣳ हस्तादाना इति यत्त्रिरुपाꣳशु हस्तेन
विगृह्णाति तस्मात्त्रयः पशूनाꣳ हस्तादानाः पुरुषो
हस्ती मर्कटः (७) ॥

(माध्यंदिनमष्टावेष मनस्त्वा पर्जन्योऽमुष्य पुरुषो द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः) ।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा
उपाꣳशौ यज्ञꣳ सꣳस्थाप्यमपश्यन्तमुपाꣳशौ सम-
स्थापयन्तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा
बिभ्यत इन्द्रमुपाधावन्तानिन्द्रोऽन्तर्यामेणान्तरधत्त
तदन्तर्यामस्यान्तर्यामत्वं यदन्तर्यामो गृह्यते भ्रातृ-
व्यानेव तद्यजमानोऽन्तर्धत्तेऽन्तस्तं (१) दधामि
द्यावापृथिवी अन्तरुर्वन्तरिक्षमित्यहिभिरेव लोकैर्य-

(ऐन्द्रवायवग्रहकथनम्)

जमानो भ्रातृव्यानन्तर्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूदद्वय॰ स्म इति तेऽब्रुवन्मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चावरे तानुभयान् (२) अन्वाभजत्सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे तानुभयानन्वाभजत्यन्तर्यामे मघवन्मादयस्वेत्याह यज्ञादेव यजमानं नान्तरेत्युपयामगृहीतोऽसीत्याहापानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानोऽनु न्यूच्छेत्प्रमायुकः स्यात्पवित्रवानन्तर्यामो गृह्यते (३) प्राणापानयोर्विधृत्यै प्राणापानौ वा एतौ यदुपा॰श्वन्तर्यामौ व्यान उपा॰शुसवनो यं कामयेत प्रमायुकः स्यादित्य॰स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ वि च्छिनत्ति ताजक्प्र मीयते यं कामयेत सर्वमायुरियादिति स॰स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ सं तनोति सर्वमायुरेति (४) ॥

(त उभयान्गृह्यते चतुश्चत्वारि॰शच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाक.)।

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा अग्रा गृह्यन्ते वाचमेवानु प्र यन्ति वायुं देवा अब्रुवन्त्सोम॰ राजान॰ हनामेति सोऽब्रवीद्वरं वृणै

(ऐन्द्रवायवग्रहकथनम्)

मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवा-
यवाग्रा ग्रहा गृह्यन्ते तमग्रन्त्सोऽपूयत्तं देवा नोपा
धृष्णुवन्ते वायुमब्रुवन्निमं नः स्वदय (१) इति
सोऽब्रवीद्वरं वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता
इति तस्मान्नानादेवत्यानि सन्ति वायव्यान्युच्यन्ते
तमेभ्यो वायुरेवास्वदयत्तस्माद्यत्पूयति तत्प्रवाते वि
षजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य
विग्रहणं नाविन्दन्त्साऽदितिरब्रवीद्वरं वृणा अथ
मया वि गृह्णीध्वं मद्देवत्या एव वः सोमाः (२)
सन्ना असन्नित्युपयामगृहीतोऽसीत्याहादितिर्दैवे-
त्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यैतानि
योनेः संभूतानि यानि मृन्मयानि साक्षात्तान्यस्यै
तस्मादेवमाह वाग्वै पराच्यव्याकृताऽवदत्ते देवा
इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं
वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मा-
दैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य
व्याकरोत्तस्मादियं व्याकृता वागुद्यते तस्मात्सकृ-
दिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वरा-
ववृणीत (३)।

(स्वदय सोमाः सहाष्टाविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(मैत्रावरुणग्रहकथनम्)

अथ षष्ठाष्टके चतुर्थप्रपाष्टकेऽष्टमोऽनुवाकः)।

मित्रं देवा अब्रुवन्त्सोमꣳ राजानꣳ हनामेति सोऽब्रवीन्नाहꣳ सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन् हनामैवेति सोऽब्रवीद्वरं वृणै पयसैव मे सोमꣳ श्रीणन्निति तस्मान्मैत्रावरुणं पयसा श्रीणन्ति तस्मात्पशवोऽपाक्रामन्मित्रः सन्क्रूरमकरिति क्रूरमिव खलु वा एषः (१) करोति यः सोमेन यजते तस्मात्पशवोऽपक्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रꣳ समर्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रोऽवेदप मत्क्रूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन्त्वयाऽꣳशुवा सोमꣳ राजानꣳ हनामेति सोऽब्रवीद्वरं वृणै मह्यं च (२) एवैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद्राज्ञा राजानमꣳशुवा घ्नन्ति वैश्येन वैश्यꣳ शूद्रेण शूद्रं न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा मित्रावरुणावब्रुवन्निदं नो वि वासयतमिति तावब्रूतां वरं वृणावहा एकं एवाऽऽवत्पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपाꣳश्वन्तर्यामौ मित्रोऽहरजनयद्वरुणो रात्रिं ततो वा इदं व्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्टयै (३) ॥

(एष चैन्द्रवायवो द्वाविꣳशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः)

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुव-
न्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रति धत्तमिति
तावब्रूतां वरं वृणावहै ग्रहं एव नावत्रापि गृह्यता-
मिति ताभ्यामेतमाश्विनमगृह्णन्ततो वै तौ यज्ञस्य
शिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्क्रीत्यै
तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ (१)
भिषजाविति तस्माद्ब्राह्मणेन भेषजं न कार्यमपूतो
ह्येष योऽमेध्यो यो भिषक्तौ बर्हिष्पवमानेन प्व-
यित्वा ताभ्यामेतमाश्विनमगृह्णन्तस्माद्बर्हिष्पमाने
स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बर्हिष्प-
वमान उपसद्यः पवित्रं वै बर्हिष्पवमान आत्मान-
मेव पवयते तयोस्त्रेधा भैषज्यं वि न्यदधुरग्नौ तृतीं-
यमप्सु तृतीयं ब्राह्मणे तृतीयं तस्मादुदपात्रम् (२)
उपनिधायं ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्या-
द्यावदेव भेषजं तेन करोति समधुकमस्य हुतं
भवति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादेकपात्रा
द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा
गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते
तस्माद्बहिर्द्वौ बहिर्धात्प्राणाः प्राणा वा एते यद्विदे-
वत्याः पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उप-

(शुक्रामन्थिग्रहकथनम्)

ह्वयेत (३) पञ्चभिः प्राणानन्तर्दधीत प्रमायुकः स्याद्दिदेवत्यान्भक्षयित्वेडामुप ह्वयते प्राणानेवाऽऽत्मन्धित्वा पशूनुप ह्वयते वायवा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ताच्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्मात्सर्वतः श्रोत्रेण शृणोति प्राणा वा एते यद्दिदेवत्याः (४) अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य वितंतस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयति वाच्येव वाचं दधात्या तृतीयसवनात्परि शेरे यज्ञस्य संतत्यै (५) ॥

(मनुष्यचरावुदपात्रमुपह्वयेत द्विदेवत्याः षट्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः) ।

बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्कावसुराणां ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्ते ऽन्योऽन्यं नाशकनुवन्नभिभवितुं ते देवाः शण्डा-

मक्रामुपावम्त्रयन्त तावब्रूतां वरं वृणावहै ग्रहा-
देव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थि-
नावगृह्णन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषः
शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा (१)
अस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन
इन्द्रायाजुह्वुरपनुत्तौ शण्डामर्कौ सहामुनेति रू-
पाणि द्विष्याद्यमेव द्वेष्टि तेनैनौ सहाप नुदते स
प्रथमः संस्कृतिर्विश्वकर्मेत्येवैनावात्मन इन्द्रायाजु-
ह्वुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा
आदित्यः शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ निः
(२) क्रामतस्तस्मात्प्राञ्चौ यन्तौ न पश्यन्ति
प्रत्यञ्चावावृत्य जुहुतस्तस्मात्प्रत्यञ्चौ यन्तौ पश्यन्ति
चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासि-
कोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो
नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते
सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै याः
प्राचीराहुतीरजुह्वुर्ये पुरस्तादसुरा आसन्ताꣳस्ता-
भिः प्र (३) अनुदन्त याः प्रतीचीर्ये पश्चादसुरा
आसन्ताꣳस्ताभिरपानुदन्त प्राचीरन्या आहुतयो
हूयन्त प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव पुरस्ताच्च
यजमानो भ्रातृव्यान्प्र णुदते तस्मात्पराचीः प्रजाः
प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु
प्रजाः प्र जायन्तेऽग्नीश्चाऽऽधाश्च सुवीराः प्रजाः

(आग्रयणग्रहकथनम्)

प्रजनयन्परीहि शुक्रः शुक्रशोचिषा (४) सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्याहैता वै सुवीरा या अत्रीरेताः सुप्रजा या आद्या य एवं वेदाऽत्र्यस्य प्रजा जायते नाऽऽद्यां प्रजापतेरक्ष्यश्वयत्तत्परांऽपतत्तद्विकङ्कतं प्राविशत्तद्विकङ्कते नारमत तद्यवं प्राविशत्तद्यवेऽरमत तद्यवस्य (५) यवत्वं यद्वैकङ्कतं मन्थिपात्रं भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सं भरति ब्रह्मवादिनो वदन्ति कस्मात्सत्यान्मन्थिपात्रꣳ सदो नाश्नुत इत्यार्तपात्रꣳ हीति ब्रूयाद्यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमार्छेत्तस्मान्नाश्नुते (६) ॥

(आत्मना परा निष्प शुक्रशोचिषा यवस्य सप्तविꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः)।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान्ग्रहानपश्यन्तानगृह्णत ततो वै तेऽग्रं पर्यायन्यस्यैवं विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाऽग्रꣳ समानानां पर्येति ये देवा दिव्येकादश स्थेत्याह (१) एतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वेभ्यो गृह्णात्येष ते योनि-

विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत साऽमन्यत वागन्तर्यन्ति वै मेति साऽऽग्रयणं प्रत्याऽगच्छत्तदाग्रयणस्याऽऽग्रयणत्वम् (२) तस्मादाग्रयणे वाग्वि मृज्यते यत्तूष्णीं पूर्वे ग्रहा गृह्यन्ते यथा त्सारीयति म आख इयति नाप रात्स्यामीत्युपावसृजत्येवमेव तदध्वर्युरांग्रयणं गृहीत्वा यज्ञमारभ्य वाचं वि सृजते त्रिर्हि करोत्युद्धातृनेव तद्वृणीते प्रजापतिर्वा एष यदाग्रयणो यदाग्रयणं गृहीत्वा हिं करोति प्रजापतिरेव (३) तत्प्रजा अभि जिघ्रति तस्माद्वत्सं जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदाग्रयणः सवनेसवनेऽभि गृह्णात्यात्मन्नेव यज्ञꣳ सं तनोत्युपरिष्टादा नयति रेत एव तद्दधात्यधस्तादुप गृह्णाति प्रजनयत्येव तद्ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्गायत्री कनिष्ठा छन्दसाꣳ सती सर्वाणि सवनानि वहतीत्येष वै गायत्रियै वत्सो यदाग्रयणस्तमेव तदभिनिवर्तꣳ सर्वाणि सवनानि वहति तस्माद्वत्समपाकृतं गौरभि नि वर्तते (४) ॥

(आहाऽऽग्रयणत्वं प्रजापतिरेवेति विꣳशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(उक्थ्यग्रहकथनम्)

यज्ञेन ता उपयद्भिर्देवा वै यज्ञमाग्नीध्रे ब्रह्मवादिनः स त्वै देवस्य ग्रावाणं माणो वा उपाश्वंशा देवा वा उपाश्शौ वाग्वै पित्रं यज्ञस्य शिरो बृहस्पतिर्दे-वा वा आग्रयणाग्रानेकादश ॥ ११ ॥

यज्ञेन लोके पशुमान्त्स्यात्सर्वनं माध्यंदिनं वाग्वा अरिंकानि तत्प्रजा एकंपञ्चाशत् ॥ ५१ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ षष्ठाष्टके पञ्चमः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

इन्द्रो वृत्राय वज्रमुदयच्छत्स वृत्रो वज्रादुद्यता-दबिभेत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छ-त्तस्मै द्वितीयमुदयच्छत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति (१) तस्मा उक्थ्यमेव प्रायच्छत्तस्मै तृतीयमुदयच्छत्तं विष्णुर-न्वतिष्ठत जहीति सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्य-मेव प्रायच्छत्तं निर्मायं भूतमहन्यज्ञो हि तस्य मायाऽऽसीयदुक्थ्यो गृह्यते इन्द्रियमेव (२) तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते इन्द्राय त्वा

(ध्रुवग्रहकथनम्)

बृहद्वते वयस्वत इत्याहेन्द्राय हि स तं प्रायच्छ-त्तस्मै त्वा विष्णवे त्वेत्याह यदेव विष्णुरन्वातिष्ठत जहीति तस्माद्विष्णुमन्वाभजाति त्रिर्निर्गृह्णाति त्रिर्हि स तं तस्मै प्रायच्छदेष ते योनिः पुनर्हविरसीत्याह पुनः पुनः (३) ह्यस्मान्निर्गृह्णाति चक्षुर्वा एत-द्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यꣳ हुतꣳ सोमा अन्वायन्ति तस्मादात्मा चक्षुरन्वेति तस्मादेकं यन्तं बहवोऽनु यन्ति तस्मादेको बहूनां भद्रो भवति तस्मादेको बह्वीर्जाया विन्दते यदि कामयेताध्वर्यु-रात्मानं यज्ञयज्ञसेनार्पयेयमित्यन्तराऽऽहवनीयं च हविर्धानं च तिष्ठन्नव नयेत् (४) आत्मानमेव यज्ञयज्ञसेनार्पयति यदि कामयेत यजमानं यज्ञ-यज्ञसेनार्पयेयमित्यन्तरा सदोहविर्धाने तिष्ठन्नव नये-द्यजमानमेव यज्ञयज्ञसेनार्पयति यदि कामयेत सदस्यान्यज्ञयज्ञसेनार्पयेयमिति सदं आलभ्याव नयेत्सदस्यानेव यज्ञयज्ञसेनार्पयति (५) ॥

इतीन्द्रियमेव पुनःपुनर्नयेन्नर्पयिष्यंश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः) ।

आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायुः प्राणानामुत्तमं मर्धानं दिवो

(ऋतुग्रहकथनम्)

अरतिं पृथिव्या इत्याह मूर्धानमेवैनꣳ समानानाँ करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरꣳ हि देवतयाऽऽयुरुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ताच्चोपरिष्टाच्चार्धिनोऽन्ये ग्रहा गृह्यन्तेऽर्धी ध्रुवस्तस्मात् (१) अर्ध्यवाङ्प्राणोऽन्येषाँ प्राणानामुपोत्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोत्ते ध्रुवस्मादस्थनाऽन्याः प्रजाः प्रतितिष्ठन्ति माꣳसेनान्या असुरा वा उत्तरतः पृथिवीं पर्याचिकीर्षन्तां देवा ध्रुवेणादृꣳहन्तद्ध्रुवस्य ध्रुवत्वं यद्ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्यज्ञस्य यद्ध्रुव आत्मा होता यद्धोतृचमसे ध्रुवमवनयत्यात्मन्नेव यज्ञस्य (२) आयुर्दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते मध्यतोऽवनीय इत्याहुर्मध्यमेन ह्यायुषो भुङ्क्त उत्तरार्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानायामवं नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर्दधाति ३) ॥

(अर्धी ध्रुवस्तस्मादेव यज्ञस्यैकान्नचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते संवत्सरेण योप

(ऋतुग्रहकथनम्)

यित्वा सुवर्गं लोकमायन्तमृषय ऋतुग्रहैरेवानु प्राजानन्यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः संवत्सरः संवत्सरस्य प्रज्ञात्यै सह प्रथमौ गृह्येते सहोत्तमौ तस्माद्वौद्वावृतू उभवतोमुखमृतुपात्रं भवति कः (१) हि तद्वेद यत ऋतूनां मुखमृतुना प्रेष्येति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून्प्रीणाति द्विः पुनर्ऋतुनाऽऽह द्विपद एव प्रीणात्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुस्तस्माच्चतुष्पादः पशव ऋतूनुप जीवन्ति द्विः (२) पुनर्ऋतुनाऽऽह तस्माद्द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुर्द्विः पुनर्ऋतुनाऽऽहाऽऽक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै नान्योऽन्यमनु प्रपद्येत यदन्योऽन्यमनुप्रपद्येतर्तुर्ऋतुमनु प्र पद्येतर्तवो मोहुकाः स्युः (३) प्रसिद्धमेवाध्वर्युर्दक्षिणेन प्र पद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेण तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणोपयामगृहीतोऽसि स॒सर्पोऽस्य॒हस्पत्याय त्वेत्याहास्ति त्रयोदशो मास इत्याहुस्तमेव तत्प्रीणाति (४) ॥

(को जीवन्ति द्विः स्यथर्तवस्त्रि॒शच्च) ।

(मरुत्वतीयमाहेन्द्रग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः)

सुवर्गाय वा एते लोकाय गृह्यन्ते यद्दृतुग्रहा ज्योतिरिन्द्राग्नी यदैन्द्राग्नमृतुपात्रेण गृह्णाति ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्या ओजोभृतौ वा एतौ देवानां यदिन्द्राग्नी यदैन्द्राग्नो गृह्यत ओज एवाव रुन्धे वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजा असावादित्यः शुक्रो यदैश्वदेवꣳ शुक्रपात्रेण गृह्णाति तस्मादसावादित्यः (१) सर्वाः प्रजाः प्रत्यङ्ङेति तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजास्तेजः शुक्रो यद्वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति प्रजास्वेव तेजो दधाति (२) ॥

(तस्मादसावादित्यास्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां षष्ठाष्टके
पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

इन्द्रो मरुद्भिः सांविद्येन माध्यंदिने सवने वृत्रमहन्यन्माध्यंदिने सवने मारुत्वतीया गृह्यन्ते वार्त्रघ्ना एव ते यजमानस्य गृह्यन्ते तस्य वृत्रं

(मरुत्वतीयमाहेन्द्रग्रहकथनम्)

जघ्नुषꣳ ऋतवोऽमुह्यन्त्स ऋतुपात्रेण मरुत्वतीयानगृ-
हणात्ततो वै स ऋतून्प्राजानाद्यदृतुपात्रेण मरुत्व-
तीया गृह्यन्ते ऋतूनां प्रज्ञात्यै वज्रं वा एतं यज-
मानो भ्रातृव्याय प्र हरति यन्मरुत्वतीया उदेव
प्रथमेन (१) यच्छति प्र हरति द्वितीयेन
स्तृणुते तृतीयेनाऽऽयुधं वा एतद्यजमानः सꣳ
स्कुरुते यन्मरुत्वतीया धनुरेव प्रथमो ज्या द्वितीय
इषुस्तृतीयः प्रत्येव प्रथमेन धत्ते वि सृजति द्वितीय-
येन विध्यति तृतीयेनेन्द्रो वृत्रꣳ हत्वा परां परावर्त-
मगच्छदपाराधमिति मन्यमानः स हरितोऽभवत्स
एतान्मरुत्वतीयानात्मस्परणानपश्यत्तानगृह्णीत(२)
प्राणमेव प्रथमेनास्पृणुतापानं द्वितीयेनाऽऽत्मानं
तृतीयेनाऽऽत्मस्परणा वा एते यजमानस्य गृह्यन्ते
यन्मरुत्वतीयाः प्राणमेव प्रथमेन स्पृणुतेऽपानं
द्वितीयेनाऽऽत्मानं तृतीयेनेन्द्रो वृत्रमहन्तं देवा
अब्रुवन्महान्वा अयमभूद्यो वृत्रमवधीदिति तन्म-
हेन्द्रस्य महेन्द्रत्वꣳ स एतं माहेन्द्रमुद्धारमुदहरत
वृत्रꣳ हत्वाऽन्यासु देवतास्वधि यन्माहेन्द्रो गृह्यत
उद्धारमेव तं यजमान उद्धरतेऽन्यासु प्रजास्वधि
शुक्रपात्रेण गृह्णाति यजमानदेवत्यो वै माहेन्द्र-
स्तेजः शुक्रो यन्माहेन्द्रꣳ शुक्रपात्रेण गृह्णाति
यजमान एव तेजो दधाति (३) ॥

(प्रथमेनागृह्णीत देवतास्वष्टाविꣳशतिश्च) ।

(आदित्यग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः)।

अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्तस्या उच्छेषणमददुस्तत्प्राश्नात्सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचत्साऽमन्यतोच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयाꣳसो जनिष्यन्त इति साऽग्रे प्राश्नात्सा रेतोऽधत्त तस्यै वृद्धमाण्डमजायत साऽऽदित्येभ्य एव (१) तृतीयमपचद्भोगाय म इदꣳ श्रान्तमस्त्विति तेऽब्रुवन्वरं वृणामहै योऽतो जायाता अस्माकꣳ स एकोऽसद्योऽस्य प्रजायामुध्याता अस्माकं भोगाय भवादिति ततो विवस्वानादित्योऽजायत तस्य वा इयं प्रजा यन्मनुष्यास्तास्वेक एवर्धो यो यजते स देवानां भोगाय भवति देवा वै यज्ञात् (२) रुद्रमन्तरायन्त आदित्यानन्वाक्रमत ते द्विदेवत्यान्प्रापद्यन्त तान्न प्रति प्रायच्छन्तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति तस्माद्द्विदेवत्येभ्य आदित्यो निर्गृह्यते यदुच्छेषणादजायन्त तस्मादुच्छेषणादगृह्यते तिसृभिर्ऋग्भिर्गृह्णाति माता पिता पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव तत् (३) मिथुनं पशवो वा एते यदादित्य उर्ग्दधिं दृष्ट्वा मन्यतः

(सावित्रवैश्वदेवग्रहकथनम्)

श्रीणात्यूर्जमेव पशूनां मध्यतो दधाति शृतात्-
इकयेन मेध्यत्वाय तस्मादामा पक्वं दुहे पशवो वा
एते यदादित्यः परिश्रित्य गृह्णाति प्रतिरुध्यैवास्मै
पशून्गृह्णाति पशवो वा एते यदादित्य एष रुद्रो
यदग्निः परिश्रित्य गृह्णाति रुद्रादेव पशूनन्तर्दधाति
(४) एष वै विवस्वानादित्यो यदुपाꣳशुसवनः
स एतमेव सोमपीथं परि शय आ तृतीयसवना-
द्विवस्व आदित्यैष ते सोमपीथ इत्याह विवस्वन्त-
मेवाऽऽदित्यꣳ सोमपीथेन समर्धयति या दिव्या
वृष्टिस्तया त्वा श्रीणामीति वृष्टिकामस्य श्रीणी-
याद्वृष्टिमेवाव रुन्धे यदि ताजक्प्रस्कन्देद्वर्षुकः
पर्जन्यः स्याद्यदि चिरमवर्षुको न सादयत्यसन्नाद्धि
प्रजाः प्रजायन्ते नानु वषट्करोति यदनुवषट्कु-
र्याद्वृद्धं प्रजा अन्ववसृजेन्न हुत्वाऽन्वीक्षेत यदन्वी-
क्षेत चक्षुरस्य प्रमायुकꣳ स्यात्तस्मान्नान्वीक्ष्यः
(५) ॥

(एष यज्ञाज्जरायु तदेव तदन्तर्दधाति न
सप्तविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

अन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति प्र-
जापतिर्वा एष यदाग्रयणः प्रजानां प्रजननाय न
सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्क-

(सावित्रवैश्वदेवग्रहकथनम्)

रोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेदेष वै गायत्रो देवानां यत्सवितैष गायत्रियै लोके गृह्यते यदाग्रयणो यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति स्वादेवैनं योनेर्निगृह्णाति विश्वे (१) देवास्तृतीयꣳ सवनं नोदयच्छन्ते सवितारं प्रातःसवनभागꣳ सन्तं तृतीयसवनमभि पर्यणयन्ततो वै ते तृतीयꣳ सवनमुदयच्छन्यत्तृतीयसवने सावित्रो गृह्यते तृतीयस्य सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः सविता प्रसवानामीशे यत्सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति सवितृप्रसूत एवास्मै प्रजाः प्र (२) जनयति सोमे सोममभि गृह्णाति रेत एव तद्दधाति सुशर्माऽसि सुप्रतिष्ठान इत्याह सोमे हि सोममभिगृह्णाति प्रतिष्ठित्या एतस्मिन्वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते सुशर्माऽसि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन करोति नम इत्याह पितृभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः (३) ॥

(विश्वे प पितृभ्य एवैतेन करोत्येकान्नविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳशुपात्रेण प्रथमश्चोत्तमश्च ग्रहो गृह्यते प्राणमेवानु प्रयन्ति प्राणमनूद्यन्ति प्रजापतिर्वा एष यदाग्रयणः प्राण उपाꣳशुः पत्नीः प्रजाः प्रजनयन्ति यदुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाति प्रजानां प्रजननाय तस्मात्प्राणं प्रजा अनु प्र जायन्ते देवा वा इतश्चितः पत्नीः सुवर्गम् (१) लोकमजिगाꣳसन्त सुवर्गं लोकं न प्राजानन्त एतं पात्नीवतमपश्यन्तमगृह्णत ततो वै सुवर्गं लोकं प्राजानन्यत्पात्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाऽघ्नन्निरिन्द्रियं भूतमगृह्णन्तस्मात्स्त्रियो निरिन्द्रिया अदायादीरपि पापात्पुꣳस उपस्तितरम् (२) वदन्ति यदघृतेन पात्नीवतꣳ श्रीणाति वज्रेणैवैनं वशे कृत्वा गृह्णात्युपयामगृहीतोऽसीत्याहेयं वा उपयामस्तस्मादिमां प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयतीन्दो इत्याह रेतो वा इन्दू रेत एव तद्दधातीन्द्रियाव इति (३) आह प्रजा वा इन्द्रियं प्रजा एवास्मै प्र जनयत्यग्ना इत्याहाग्निर्वै रेतोधाः पत्नीव इत्याह मिथुनत्वाय सजूर्देवेन त्वष्ट्रा सोमं पिबेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति देवा वै

(हारियोजनग्रहकथनम्)

त्वष्टारमजिघा꣡꣡सन्त्स पत्नी꣡ः प्रापद्यत꣡ तं न प्रति प्रायच्छन्तस्मादपि (४) वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्मात्पात्नीवते त्वष्ट्रेऽपि गृह्यते न सादयत्यासन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्क-रोति यदनुवषट्कुर्याद्विदं प्रजा अन्ववसृजेद्यन्नानु-वषट्कुर्यादशान्तमग्नौत्सोमै꣡ भक्षयेदुपा꣡꣡श्वनु वष-ट्करोति न रुद्रं प्रजा अन्ववसृजति शान्तमग्नौ-त्सोमै꣡ भक्षयत्यग्नीन्नेष्टुरुपस्थमा सी꣡द (५) नेष्टः पत्नी꣡मुदानयत्याहाग्नादेव नेष्टारे रेतो दधाति नेष्टा पत्नि꣡यामुद्गात्रा सं रय्यांपयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननायाप उप प्र वर्त-यति रेत एव तत्सिञ्चत्यूरुणोप प्र वर्तयत्यूरुण हि रेतः सिच्यते नग्नंकृत्योरुप प्र वर्तयति यदा हि नग्न ऊरुर्भवत्यथ मिथुनी भवतोऽथ रेतः सिच्यतेऽथ प्रजाः प्र जायन्ते (६) ॥

(पत्नी꣡ः सुवर्गमुपस्तितरमिन्द्रियाव इत्यपि सी꣡द मिथुन्यष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः) ।

इन्द्रो वृत्रमहन्तस्य शीर्षकपालमुदौब्जत्स द्रौणकलशोऽभवत्तस्मात्सोमः समस्रवत्स हारियो-जनोऽभवत्तं व्यचिकित्सज्जुहवानी ३ मा हौषा ३-मिति सोऽमन्यत यद्धोष्याम्याम꣡ होष्यामि यन्न

(हारियोजनग्रहकथनम्)

होष्यामि यज्ञवेशसं करिष्यामीति तमभ्रियत होतुः सोऽग्निरब्रवीन्न मय्यामः होष्यसीति तं धानाभिरश्रीणात् (१) तः शृतं भूतमजुहो-द्यद्धानाभिर्हारियोजनः श्रीणाति शृतत्वाय शृत-मेवैनं भूतं जुहोति बह्वीभिः श्रीणात्येवावतीरेवा-स्यामुष्मिल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्नयः कामदुघा यद्धारियोजनीरिति तस्माद्बह्वीभिः श्रीणीयादक्षन्नामे वा इन्द्रस्य हरी सोमपानौ तयोः परिधयं आधानं यदप्रहृत्य परिधीञ्जुहुयादन्तराधानाभ्याम् (२) घासं प्र यं-च्छेत्प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो यदध्वर्युर्जुहुयाद्यथा विमुक्तं पुनर्युनक्ति तादृगेव तच्छीर्षन्नधिनिधायं जुहोति शीर्षतो हि स समभवद्विक्रम्यं जुहोति विक्रम्य हीन्द्रो वृत्र-महन्त्समृद्ध्यै पशवो वै हारियोजनीर्यत्संभि-न्द्यादल्पाः (३) एनं पशवो भुञ्जन्त उप तिष्ठे-रन्यन्न संभिन्द्याद्बहव एनं पशवोऽभुञ्जन्त उप तिष्ठेरन्मनसा सं बाधत उभयं करोति बहव एवैनं पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवावं रुन्धत उत्तरवेद्यां नि वपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून्प्रति ष्ठापयन्ति (४) ॥

(अश्रीणादन्तराधानाभ्यामल्पाः स्थापयन्ति) ।

(आग्रयणादीनां पुनर्ग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः)।

ग्रहान्वा अनु प्रजाः पशवः प्र जायन्त उपाꣳश्व-न्तर्यामावजावयः शुक्रामन्थिनौ पुरुषा ऋतुग्रहा नेकशफा आदित्यग्रहं गावं आदित्यग्रहो भूयिष्ठाभिर्ऋग्भिर्गृह्यते तस्माद्गावः पशूनां भूयिष्ठा यत्त्रिरुपाꣳशु ꣳ हस्तेन विगृह्णाति तस्माद्द्वौ त्रीनजा जनयत्यथावयो भूयसीः पिता वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत्कलशाद्गृहणीयाद्यथा पिता (१) पुत्रं क्षित उपधावति तादृगेव तद्यत्कलशं उपदस्येदाग्रयणाद्गृहणीयाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदात्मा वा एष यज्ञस्य यदाग्रयणो यद्ग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृहणीयादात्मन एवाधिं यज्ञं निष्करोत्यविज्ञातो वा एष गृह्यते यदाग्रयणः स्थाल्या गृहणाति वायव्येन जुहोति तस्मात् (२) गर्भेणाविज्ञातेन ब्रह्महाऽवभृथमव यन्ति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्ति तस्मात्स्त्रियै जातां पराऽस्यन्त्युत्पुमाꣳसꣳ हरन्ति यत्पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्यद्ग्रहं गृहणाति यथा वस्यस आहृत्य प्राऽऽह तादृगेव तद्यत्सादयति

(सोमपात्रस्तुति)

यथा वस्यस उपनिधायापक्रामति तादृगेव तद्यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढं पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामा ऋचा यज्ञस्य धृत्यै (३) ॥

(यथा पिता तस्मादपक्रामति तादृगेव तद्यदृष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

प्राण्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्तेऽमुमेव तैर्लोकमभि जयति परोऽक्ष्व ह्यमौ लोको यानि पुनः प्रयुज्यन्त इममेव तैर्लोकमभि जयति पुनः पुनरिव ह्ययं लोकः प्राण्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति यानि पुनः (१) प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्राण्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवोऽरण्यमप यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति यो वै ग्रहाणां निदानं वेद निदानवान्भवत्याज्यमित्युक्थं तद्वै ग्रहाणां निदानं यदुपाꣳशु शꣳसति तत् (२) उपाꣳश्वन्तर्यामयोर्यदुच्चैस्तदितरेषां ग्रहाणामेतद्वै

(सोमपात्रस्तुतिः)

ग्रहाणां निदानं य एवं वेद निदानवान्भवति यो वै ग्रहाणां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य एतद्वै ग्रहाणां मिथुनं य एवं वेद प्र प्रजया पशुभिर्मिथुनैर्जायत इन्द्रस्त्वष्टुः सोममभीषहाऽपिबत्स विष्वङ् (३) व्यार्च्छत्स आत्मन्नारमणं नाविन्दत्स एताननुसवनं पुरोडाशानपश्यत्तान्निरवपत्तैर्वै स आत्मन्नारमणमकुरुत तस्मादनुसवनं पुरोडाशा निरुप्यन्ते तस्मादनुसवनं पुरोडाशानां प्राश्नीयादात्मन्नेवाऽऽरमणं कुरुते नेन्द्र सोमोऽतिपवते ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं यज्ञस्य पाङ्क्तत्वमिति धानाः करम्भः परिवाप पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् (४) ॥

(भवन्ति यानि पुनः शꣳसंति तद्विष्वङ्किं चतुर्दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

इन्द्रो वृत्रायाऽऽर्षभेण यज्ञेन सुवर्गायन्द्रो मरुद्भिरतिरन्तर्यामपात्रेण प्राण उपाꣳशुपात्रेणेन्द्रो वृत्रमहन्तस्य ग्रहान्वै प्रान्यानि पात्राण्येकादश ॥ ११ ॥

इन्द्रो वृत्राय पुनर्हन्तुमाऽऽह मिथुनं पशवो नेष्टः पत्नीमुपाꣳशवन्तर्यामयोर्द्वे चत्वारिꣳशत् ॥ ४२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ षष्ठाष्टके षष्टः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दक्षिणानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमते सदोऽभ्यैति सुवर्गमेवैनं लोकं गमयति सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्यमुमेवैनं लोकꣳ समारोहयति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै दिवं गच्छ सुवः पतेति हिरण्यम् (१) हुत्वोद्गृह्णाति सुवर्गमेवैनं लोकं गमयति रूपेण वो रूपमभ्यैमीत्याह रूपेण ह्यासाꣳ रूपमभ्यैति यद्धिरण्येन तुथो वो विश्ववेदा वि भजात्वित्याह तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा वि भजति तेनैवैना वि भजत्येतत्ते अग्ने राधः (२) ऐति सोमꣳच्युतमित्याह सोमꣳच्युतꣳ ह्यस्य राध ऐति तन्मित्रस्य पथा नयेत्याह शान्त्या ऋतस्य पथा प्रेत चन्द्रदक्षिणा इत्याह सत्यं वा ऋतꣳ सत्येनैवैना ऋतेन वि भजति यज्ञस्य पथा सुविता नयन्तीरित्याह यज्ञस्य ह्येताः पथा यन्ति यद्दक्षिणा ब्राह्मणमध्य राध्यासम् (३) ऋषिमार्षेयमित्याहैष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्तस्मादेवमाह वि सुवः पश्य व्यन्तरिक्षमित्याह सुवर्गमेवैनं लोकं गमयति यतस्व सदस्यैरित्याह मित्र-

(समिष्टयजुर्होमिकथनम्)

त्वायास्मद्धोत्रा देवत्रा गंच्छत मधुमतीः प्रदातारमा विंशतेत्याह वयमिह प्रदातारः स्मोऽमानमत्र मधुमतीरा विंशतेति (४) वावैतदाह हिरंण्यं ददाति ज्योतिर्वै हिरंण्यं ज्योतिं रेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्या अग्नीधेंददात्यग्निमुंखानेवर्तून्प्रीणाति ब्रह्मणे ददाति प्रसूत्यै होत्रें ददात्यात्मा वा एष यज्ञस्य यद्धोताऽऽत्मानमेव यज्ञस्य दक्षिणाभिः समर्धयति (५) ॥

[हिरंण्यꣳ राधो रा॒ध्यासं मधुमतीरा विंशतेत्यष्टाविꣳशच्च] ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः)

समिष्टयजूꣳषिं जुहोति यज्ञस्य समिंष्टचै यद्वै यज्ञस्यं क्रूरं यद्विलिंष्टं यदत्येति यन्नात्येति यदंतिकरोति यन्नापिं करोति तदेव तैः प्रीणाति नवं जुहोति नव वै पुरुषे प्राणाः पुरुषेण यज्ञः संमितो यावानेव यज्ञस्तं प्रीणाति षडृग्भिर्याणि जुहोति षड्वा ऋतवं ऋतूनेव प्रीणाति त्रीणि यजूꣳषि (१ त्रय इमे लोका इमानेव लोकान्प्रीणाति यज्ञं यज्ञं गंच्छ यज्ञपतिं गच्छेत्याह यज्ञपतिमेवैनं गमयति स्वां योनिं गच्छेत्याह स्वामेवेनं योनिं गमयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर इत्याह यजमान एव वीर्यं

दधाति वासिष्ठो ह सात्यहव्यो दैवभागं पप्रच्छ यत्सप्तऋंयान्बहुयाजिनोऽर्यायजो यज्ञे (२) यज्ञं प्रत्यतिष्ठिपा ३ यज्ञपता ३ विति स होवाच यज्ञ पतावितिं सत्याद्वै सप्तऋंयाः परां बभूवुरितिं होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्यं आसीद्यजमानस्यापरा-भावायेति देवा गातुविदो गातुं वित्त्वा गातु मित्येत्याह यज्ञ एव यज्ञं प्रतिं ष्ठापयति यजमान-स्यापराभावाय (३)॥

(यजूंषि यज्ञ एकंचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ षष्ठाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः)।

अवभृथयजूंषिं जुहोति यदेवार्वाचीनमेकंहा-यनादेनः करोति तदेव तेरवं यजतेऽपोऽवभृथमवैं-त्यप्सु वै वरुणः साक्षादेव वरुणमवं यजते वर्त्मना वा अन्वित्यं यज्ञं रक्षाःसि जिघाःसन्ति साम्ना प्रस्तोताऽन्ववैति साम वै रक्षोहा रक्षसामपहत्यै त्रिर्निधनमुपैति त्रयं इमे लोका एभ्य एव लोकेभ्यो रक्षाःसि (१) अप हन्ति पुरुषः पुरुषो निधन-मुपैति पुरुषःपुरुषो हि रक्षस्वी रक्षसामपहत्या उरुं हि राजा वरुणश्चकारेत्याह प्रतिष्ठित्यै शतं तें राजन्भिषजः सहस्रमित्याह भेषजमेवास्मै करोत्य-भिष्टितो वरुणस्य पाश इत्याह वरुणप[illegible]भि

(अवभृथयजहोमकथनम्)

तिष्ठति बर्हिराभि जुहोत्याहुतीनां प्रतिष्ठित्या अथो अग्निवत्येव जुहोत्यपबर्हिषः प्रयाजान् (२) यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चत्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेति वरुणं यजति वरुणपाशादेवैनं मुञ्चत्यग्नीवरुणौ यजति साक्षादेवैनं वरुणपाशान्मुञ्चत्यपबर्हिषावनूयाजौ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चति चतुरः प्रयाजान्यजति द्वावनूयाजौ षट्सं पद्यन्ते षड्वा ऋतवः (३) ऋतुष्वेव प्रति तिष्ठत्यवभृथ निचङ्कुणेत्याह यथादितमेव वरुणमव यजते समुद्रे ते हृदयमप्स्वन्तरित्याह समुद्रे ह्यन्तर्वरुणः सं त्वा विशन्त्वोषधीरुताऽऽप इत्याहाद्भिरेवैनमोषधीभिः सम्यञ्चं दधाति देवीराप एष वो गर्भ इत्याह यथायजुरेवैतत्पशवो वै (४) सोमो यद्भिन्दूनां भक्षयेत्पशुमान्त्स्याद्वरुणस्त्वेनं गृह्णीयाद्यन्न भक्षयेदपशुः स्यान्नैनं वरुणो गृह्णीयादुपस्पृश्यमेव पशुमान्भवति ननं वरुणो गृह्णाति प्रतियुतो वरुणस्य पाश इत्याह वरुणपाशादेव निर्मुच्यतेऽप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्या एधोऽस्येधिषीमहीत्याह समिधैवाग्निं नमस्यन्त उपायन्ति तेजोऽसि तेजो मयि धेहीत्याह तेज एवाऽऽत्मन्धत्ते (५) ॥

(रक्षाꣳसि प्रयाजानृतवो वै नमस्यन्तो द्वादश च)

(यूपैकादशिनीकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः)

स्फ्येन वेदिमुद्धान्ति रथाक्षेण वि मिमीते यूपं मिनोति त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै यदन्तर्वेदि मिनुयाद्द्वेवलोकमभि जये-द्यद्बहिर्वेदि मनुष्यलोकं वेद्यन्तस्य संधौ मिनोत्युभयोर्लोकयोरभिजित्या उपरसंमितां मिनुयात्पितृलोककामस्य रशनासंमितां मनुष्यलोककामस्य चषालसंमितामिन्द्रियकामस्य सर्वान्त्समाप्नोतिष्ठा-कामस्य ये त्रयो मध्यमास्तान्त्समान्पशुकामस्यै-तान्वै (१) अनु पशव उपतिष्ठन्ते पशुमानेव भवति व्यतिषजेदितरान्प्रजयैवैनं पशुभिर्व्यतिषजति यं कामयेत प्रमायुकः स्यादिति गर्तामितं तस्य मिनुयादुत्तरार्धं वर्षिष्ठमथ ह्रसीयाꣳसमेषा वै गर्तामित्यस्यैवं मिनोति ताजक्प्रमीयते दक्षि-णार्धं वर्षिष्ठं मिनुयात्सुवर्गकामस्याथ ह्रसीयाꣳ-समाक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै (२) यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकाꣳ रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेत्स्त्र्येवास्य जायते यं कामयेत

(पञ्चैकादशिनीकथनम्)

पुमानस्य जायेतेत्यान्तं तस्य प्र वेष्टयेत्पुमानेवास्य (३) जायतेऽसुरा वै देवान्दक्षिणत उपानयन्ता-न्देवा उपशयेनैवापानुदन्त तदुपशयस्योपशयत्वं यद्दक्षिणत उपशय उपशये भ्रातृव्यापनुत्त्यै सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवापशुस्त-स्य यजमानः पशुर्यन्न निर्दिशेदार्तिमार्छेद्यजमा-नोऽसौ ते पशुरिति निर्दिशेद्यं द्विष्याद्यमेव (४) द्वेष्टि तमस्मै पशुं निर्दिशति यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयान्न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्या-न्प्रजापतिः प्रजा असृजत सोऽन्नाद्येन व्यार्ध्यत स एतामेकादशिनीमपश्यत्तया वै सोऽन्नाद्यमवारुन्ध यद्दश यूपा भवन्ति दशाक्षरा विराडन्नं विराड्वि राजैवान्नाद्यमव रुन्धे (५) य एकादशः स्तनं एवास्यै स दुह एवैनां तेन वज्रो वा एषा सं मी-यते यदेकादशिनी सेश्वरा पुरस्तात्प्रत्यञ्चं यज्ञꣳ संमर्दितोर्यत्पात्नीवतं मिनोति यज्ञस्य प्रत्युन्नध्यै सयत्वाय (६) ॥

(वै सप्तदशै पुमानेवास्य यमेव रुन्धे त्रिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः)।

प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एतामेकादशिनीमपश्यत्तया वै स आर्युरिन्द्रियं वीर्यमात्मन्नधत्त प्रजा इव खलु वा एष सृजते यो

(पञ्चैकादशिनीकथनम्)

यजते स एतर्हि रिरिचान इव यदेषैकादशिनी भवत्यायुरेव तयेन्द्रियं वीर्यं यजमान आत्मन्धत्ते प्रैवाऽऽग्नेयेन वापयति मिथुनꣳ सारस्वत्या करोति रेतः (१) सौम्यन दधाति प्र जनयति पौष्णेन बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयति वैश्वदेवो भवति वैश्वदेव्यो वै प्रजाः प्रजा एवास्मै प्र जनयतीन्द्रियमेवैन्द्रेणावरुन्धे विंश मारुतेनाजो बलमैन्द्राग्नेन प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो मध्यत ऐन्द्रमा लभते मध्यत एवेन्द्रियं यजमाने दधाति (२) पुरस्तादैन्द्रस्य वैश्वदेवमा लभते वैश्वदेवं वा अन्नमन्नमेव पुरस्ताद्धत्ते तस्मात्परस्तादन्नमद्यते ऐन्द्रमालभ्यं मारुतमा लभते विड्वै मरुतो विशमेवास्मा अनु बध्नाति यदिं कामयेत योऽवगतः सोऽप रुध्यतां योऽपरुद्धः सोऽवं गच्छत्वित्यैन्द्रस्य लोके वारुणमा लभेत वारुणस्य लोक ऐन्द्रम् (३) य एवावगतः सोऽप रुध्यते योऽपरुद्धः सोऽवं गच्छति यदिं कामयेत प्रजा मुह्येयुरितिं पशून्व्यतिषजेत्प्रजा एव मोहयति यदभिवाहतोऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्दक्षिणत उदञ्चमा लभतेऽपवाहतोऽपां प्रजानामवरुणग्राहाय (४) ॥

(रेतो यजमाने दधाति लोक ऐन्दꣳ सप्तविꣳशञ्च) ।

(सौम्यचरुकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः)।

इन्द्रः पत्नियां मनुमयाजयत्तां पर्याग्निकृतामुदसृजत्तया मनुराभ्यां यत्पर्याग्निकृतं पात्नीवतमुत्सृजति यामेव मनुर्ऋद्धिमाभ्यां तामेव यजमान ऋध्नोति यज्ञस्य वा अप्रतिष्ठिताद्यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु परा भवति यदाज्येन पात्नीवतꣳ संꣳस्थापयति यज्ञस्य प्रतिष्ठित्यै यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रति तिष्ठतीष्टं वपया (१) भवत्यनिष्टं वशयाऽयं पात्नीवतेन प्र चरति तीर्थ एव प्र चरत्ययो एतर्ह्येवास्य यामꣳस्त्वाष्ट्रो भवति त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति तमेव वृषाणं पत्नीष्वपि सृजति सोऽस्मै रूपाणि वि करोति (२) ॥

(वपया षट्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः)।

घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति यत्सौम्यो भवति यथा मृतायानुस्तरणीं घ्नन्ति तादृगेव तद्यदुत्तरार्धे वा मध्ये वा जुहुयाद्देवताभ्यः समदं दध्याद्दक्षिणार्धे जुहोत्येषा वै पितॄणां दिक्स्वायामेव दिशि पितॄन्निरवदयते तृभ्यो हरन्ति साम-

(सौम्यचरुकथनम्)

देवत्यो वै सौम्यो यदेव साम्नश्छम्बट्कुर्वन्ति तस्यैव स शान्तिरवं (१) ईक्षन्ते पावित्रं वै सौम्य आत्मानमेव पवयन्ते य आत्मानं न परिपश्येदितासुः स्यादभिदर्दिं कृत्वाऽवेक्षेत तस्मिन्ह्यात्मानं परिपश्यत्यथो आत्मानमेव पवयते यो गतमनाः स्यात्साऽवेक्षेत यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन एवाऽऽत्मन्दधार (२) न गतमना भवत्यप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानमभ्यामावैष्णव्यर्चा घृतस्य यजत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं च दाधारोपाꣳशु यजति मिथुनत्वाय ब्रह्मवादिनो वदन्ति मित्रो यज्ञस्य स्विष्टं युवते वरुणो दुरिष्टं कं तर्हि यज्ञः कं यजमानो भवतीति यन्मैत्रावरुणीं वशामालभते मित्रेणैव (३) यज्ञस्य स्विष्टꣳ शमयति वरुणेन दुरिष्टं नाऽऽर्तिमार्छति यजमानो यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येवमृक्सामे यज्ञं प्र भिन्तो यन्मैत्रावरुणीं वशामालभते यज्ञायैव प्रभिन्नाय मर्त्यमन्ववास्यति शान्त्यै यातयामानि वा एतस्य छन्दाꣳसि य ईजानश्छन्दसामेष रसो यद्वशा यन्मैत्रावरुणीं वशामालभते छन्दाꣳस्येव पुनरा प्रीणात्यथातयामत्वायाथो छन्दःस्वेव रसं दधाति (४) ॥

(अवं दाधार मित्रेणैव प्रीणाति षट्चं) ।

(अतिग्राह्यग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः)।

देवा वा इन्द्रियं वीर्यं१ व्यभजन्त ततो यदत्य शिष्यत तदतिग्राह्या अभवन्तदतिग्राह्याणामतिग्राह्यत्वं यदतिग्राह्या गृह्यन्त इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते तेजं आग्नेयेनेन्द्रियमैन्द्रेण ब्रह्मवर्चसꣳ सौर्येणोपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याश्चक्रे पृष्ठानि यत्पृष्ठ्येन गृह्णीयात्प्राञ्चं यज्ञं पृष्ठानि सꣳ शृणीयुर्यदुक्थ्यें (१) गृह्णीयात्प्रत्यञ्चं यज्ञमतिग्राह्याः सꣳ शृणीयुर्विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वाय प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्स प्रियास्तनूरप न्यधत्त तदतिग्राह्या अभवन्चितंवुस्तस्य यज्ञ इत्याहुर्यस्यातिग्राह्या न गृह्यन्त इत्यप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वाय देवता वै सर्वाः सदꣳशीरासन्ता न व्यावृतमगच्छन्ते देवाः (२) एत एतान्ग्रहानपश्यन्तानगृह्णताऽऽग्नेयमग्निरैन्द्रमिन्द्रः सौर्यꣳ सूर्यस्ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन्यस्यैवं विदुष एते ग्रहा गृह्यन्ते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छतीमे लोका ज्योतिष्मन्तः समावद्वीर्याः कार्या इत्याहुराग्नेयेनास्मिँल्लोके ज्योतिर्धत्त ऐन्द्रेणान्तरिक्ष इन्द्रवायू हि सयुजौ सौर्येणा-

(अदाभ्यग्रहकथनम्)

मुष्मिँल्लोके (३) ज्योतिर्धत्ते ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति समावद्वीर्यानेनान्कुरुत एतान्वै ग्रहान्ब्रह्मविश्ववयसावित्तां ताभ्यामिमे लोकाः परांश्चश्वार्वांश्च प्राभुर्यस्यैवं विदुष एते ग्रहा गृह्यन्ते प्रास्मा इमे लोका परांश्चश्वार्वांश्च भान्ति (४) ॥

(उक्थ्ये देवा अमुष्मिँल्लोके एकाचत्वारिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके नवमोऽनुवाकः) ।

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छन्दांसि सवनानि समस्थापयन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषोऽदाभ्यो गृह्यते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति यद्वै देवा असुरानदाभ्येनादभ्नुवन्तददाभ्यस्यादाभ्यत्वं य एवं वेद दभ्नोत्येव भ्रातृव्यं नैनं भ्रातृव्यो दभ्नोति (१) एषा वै प्रजापतेरतिमोक्षिणी नाम तनूर्यददाभ्य उपनद्धस्य गृह्णात्यतिमुक्त्या अतिं पाप्मानं भ्रातृव्यं मुच्यते य एवं वेद घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति सोमे हन्यमाने यज्ञो हन्यते यज्ञे यजमानो ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येन जीवन्त्सुवर्गं लोकमेतीति जीवग्रहो

(अशुग्रहकथनम्)

वा एष यददाभ्योऽनभिषुतस्य गृह्णाति जीवन्तमेवैनꣳ सुवर्गं लोकं गमयति वि वा एतयज्ञं छिन्दन्ति यददाभ्ये सꣳस्थापयन्त्यꣳशूनपि सृजति यज्ञस्य संतत्यै (२) ॥

(दश्नोत्यनभिषुतस्य गृह्णात्येकान्नविꣳशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके दशमोऽनुवाकः)।

देवा वै प्रवाहुꣳग्रहानगृह्णत स एतं प्रजापतिरꣳशुमपश्यत्तमगृह्णीत तेन वै स आध्नोद्यस्यैवं विदुषोऽꣳशुर्गृह्यत ऋध्नोत्येव सकृदभिषुतस्य गृह्णाति सकृद्धि स तेनाऽऽध्नोन्मनसा गृह्णाति मन इव हि प्रजापतिः प्रजापतेराप्त्या औदुम्बरेण गृह्णात्यूर्ग्वा उदुम्बर ऊर्जमेवावरुन्धे चतुःस्रक्ति भवति दिक्षु (१) एव प्रति तिष्ठति यो वा अꣳशोरायतनं वेदाऽऽयतनवान्भवति वामदेव्यमिति साम तद्वा अꣳस्याऽऽयतनं मनसा गायमानो गृह्णात्यायतनवानेव भवति यदध्वर्युरꣳशुं गृह्णन्नार्धयेदुभाभ्यां नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानं गृह्णाति सैवास्यर्धिर्हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राण आयुषैवामृतमभि धिनोति शतमानं भवति

शतायुः पुरुष. शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति (२) ॥

(दिक्षुवनितिं विश्वगतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके षष्ठप्रपाठक एकादशोऽनुवाकः) ।

प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्स रिरिचानोऽमन्यत स यज्ञानां षोडशधेन्द्रियं वीर्यमात्मानमभि समक्षिखदत्तत्षोडश्यभवन्न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशꣳ स्तोत्रꣳ षोडशꣳ शस्त्रं तेन षोडशी तत्षोडशिनः षोडशित्वं यत्षोडशी गृह्यते इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते देवेभ्यो वै सुवर्गो लोकः (१) न प्राभवत्त एतꣳ षोडशिनमपश्यन्तमगृह्णत ततो वै तेभ्यः सुवर्गो लोकः प्राभवद्यत्षोडशी गृह्यते सुवर्गस्य लोकस्याभिजित्या इन्द्रो वै देवानामानुजावर आसीत्स प्रजापतिमुपाधावत्तस्मा एतꣳ षोडशिनं प्रायच्छत्तमगृह्णीत ततो वै सोऽग्रे देवतानां पर्येयायस्यैवं विदुषः षोडशी गृह्यते (२) अग्रमेव समानानां पर्येति प्रातःसवने गृह्णाति वज्रो वै षोडशी वज्रः प्रातःसवनꣳ स्वादेवैनं योनेर्निर्गृह्णाति सवनेसवनेऽभि गृह्णाति सवनात्मवनादेवैनं प्र जनयति तृतीयसवने पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी

पञ्चदशस्तृतीयसवनं वज्रेणैवास्मै तृतीयसवनात्पशू-
नव रुन्धे नोक्थ्ये गृह्णीयात्प्रजा वै पशव
उक्थानि यद्गृह्णीयात् (३) गृह्णीयात्प्रजां पशूनवरुन्ध्य
निर्दहेदतिरात्रे पशुकामस्य गृह्णीयाद्वज्रो वै
षोडशी वज्रेणैवास्मै पशूनवरुध्य रात्रियोपरिष्टा-
च्छमयत्यग्निष्टोमे राजन्यस्य गृह्णीयाद्वज्रावृ-
त्कामो हि राजन्यो यजते साक्ष एवास्मै वज्रं
गृह्णाति स एनं वज्रो भूत्वा इन्धे निर्वा दहत्ये-
कविꣳशꣳ स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यत
इन्द्रस्य प्रियं धाम (४) उपाऽऽप्नोति कनीया-
ꣳसि वै देवेषु छन्दाꣳस्यासन्नायाꣳस्यसुरेषु ते
देवाः कनीयसा छन्दसा ज्यायश्छन्दोऽभि व्यशि-
ꣳषत ते वै तेऽसुराणां लोकमवृञ्जत यत्कनीयसा
छन्दसा ज्यायश्छन्दोऽभि विशꣳसति आतृव्य-
स्यैव तल्लोकं वृङ्क्ते षडक्षराण्यति रेचयन्ति षड्वा
ऋतव ऋतूनेव प्रीणाति चत्वारि पूर्वाण्यव कल्प-
यन्ति (५) चतुष्पद एव पशूनव रुन्धे द्वे
उत्तरे द्विपद एवाव रुन्धेऽनुष्टुभमभि सं पादयन्ति
वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमा समयावि-
षिते सूर्ये षोडशिनः स्तोत्रमुपाकरोत्येतस्मिन्वै
लोक इन्द्रो वृत्रमहन्त्साक्षादेव वज्रं प्रातृव्याय प्र
हरत्यरुणपिशङ्गोऽश्वो दक्षिणेतो वज्रस्य रूपꣳ
समृद्ध्यै (६) ॥

(लोको विदुषः षोडशी गृह्यते यदुक्थ्ये धाम कल्पयति
सप्तचत्वारिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
षष्ठप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

सुवर्गाय यद्दाक्षिणानिं समिष्टयजूꣳष्यवभृथयजूꣳषि स्फ्येन वेदिं प्रजापतिरिन्द्रो घ्नन्ति देवा वा इन्द्रियं देवा वा अदाभ्ये देवा वै प्रवाहुकप्रजापतिः स रिरिचानः स यज्ञानाꣳ षेडशधैकादश ॥ ११ ॥

सुवर्गाय यजति प्रजाः सौम्येन गृह्णीयात्प्रत्यश्वं गृह्णीयात्प्रजां
पशून्चिचत्वारिꣳशत् ॥ ४३ ॥

हरिः ॐ ।
इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
षष्ठः प्रपाठकः ॥ ६ ॥

मूलक्रमेण षष्ठाष्टके—प्र० ६ अ० ६६
भाष्यक्रमेण षष्ठकाण्डे—प्र० ६ अ० ६६
मूलक्रमेणाऽऽदितः समष्टयङ्काः—अष्ट० ६ प्र० ३९ अ० ५३४
भाष्यक्रमेणाऽऽदितः समष्टयङ्काः—का० ६ प्र० ३९ अ० ५२९

समाप्तोऽयं कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः
षष्ठः काण्डः ।

अथ सभाष्यकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां

सप्तमं काण्डम् ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
चयनब्राह्मणं काण्डे पञ्चमे स्फुटमीरितम् ।
षष्ठे तु काण्डे सोमस्य मन्त्राणां ब्राह्मणं क्रमात् ॥ २ ॥
उक्तं मन्त्रास्त्वाद्यकाण्डे द्वितीयादिप्रपाठकैः ।
त्रिभिरुक्ता ब्राह्मणं च व्याख्यातं तत्र तैः सह ॥ ३ ॥
षट्स्युः प्रपाठकाः षष्ठे काण्डे प्रत्येकमेषु च ।
एकादशानुवाकाः स्युस्तदर्थान्वच्मनुक्रमात् ॥ ४ ॥
प्राग्वंशं क्षुरकर्मादिसंस्कृतः प्रविशेदिति ।
आद्ये प्रोक्तं द्वितीये तु दीक्षाहुतय ईरिताः ॥ ५ ॥
कृष्णाजिनेन वस्त्रेण दीक्षा मेखलया तथा ।
कुर्यात्तृतीये तत्प्रोक्तं तथा कृष्णविषाणया ॥ ६ ॥
चतुर्थे दण्डमादाय मुष्टीकरणवाग्यतौ ।
कृत्वाऽसौ दीक्षितो भूत्वा नियमान्तु तिष्ठति ॥ ७ ॥
पञ्चमे प्रायणीया स्यात्षष्ठे त्वरुणया क्रयः ।
सप्तमे तत्प्रकारः स्यादष्टमे पदसंग्रहः ॥ ८ ॥
सोमोन्मानं तु नवमे दशमेऽन्यैश्च तत्क्रयः ।
एकादशे क्रीतसोमं शकटेन नयेदिति ॥ ९ ॥
प्रपाठकेऽस्मिन्प्रथमेऽनुवाकार्थाः समीरिताः ।
प्रपाठके द्वितीयेऽनुवाकार्थान्क्रमाद्ब्रुवे ॥ १० ॥
आतिथ्येष्टिरिहाऽऽद्ये स्यात्तानूनप्त्रं द्वितीयके ।
तथाऽऽन्तरदीक्षा च तृतीये तूपसद्वरे ॥ ११ ॥
वेदिरुक्ता चतुर्थेऽथ पञ्चमे व्रतनिर्णयः ।
षष्ठे काम्या यागभूमिः सप्तमे वेदिरुत्तरा ॥ १२ ॥

व्याघारणं त्वष्टमे स्याद्विधानमनन्तरे ।
दशमे तु सदः प्रोक्तं प्रोक्ता उपरवाः परे ॥ १३ ॥
प्रपाठकेऽनुवाकार्था द्वितीयेऽस्मिन्नुदीरिताः ।
तृतीयस्याऽऽदिमे तूर्ध्वं विष्णियाः स्युर्द्वितीयके ॥ १४ ॥
अग्नीषोमप्रणयनं तृतीये यूपखण्डनम् ।
चतुर्थे स्थापयेद्यूपं वह्निं मथ्नाति पञ्चमे ॥ १५ ॥
नियुनक्ति पशुं षष्ठे सामिधेन्यस्तु सप्तमे ।
आघारौ च यजेत्याश्च सप्तमे हिंसनं पशोः ॥ १६ ॥
नवमे स्यादुपाकोऽवदानानि त्वनन्तरे ।
एकादशे त्वनूयाजास्तृतीयोऽयं प्रपाठकः ॥ १७ ॥
गृह्यागश्चतुर्थाद्ये वसतीवर्य ईरिताः ।
द्वितीयेऽथ तृतीये सोमोपावहरणं श्रुतम् ॥ १८ ॥
सोमोन्मानं चतुर्थे स्यात्पञ्चमादिषु सप्तसु ।
उपांशुग्रहणा आग्रयणान्ता हि ग्रहाः श्रुताः ॥ १९ ॥
उपांशुरन्तर्यामश्च तृतीयश्चेन्द्रवायवः ।
मैत्रावरुणनाम्ना स्यादाश्विनाख्यग्रहस्तथा ॥ २० ॥
शुक्रामन्थिग्रहावाग्रयणस्तुर्यः प्रपाठकः ।
उक्थ्यग्रहः पञ्चमाद्ये द्वितीये ध्रुव ईरितः ॥ २१ ॥
ऋतुग्रहास्तृतीये स्युरैन्द्राग्नस्तु चतुर्थके ।
मरुत्वतीया माहेन्द्रश्चेत्येते पञ्चमे श्रुताः ॥ २२ ॥
स्यादादित्यग्रहः षष्ठे सावित्रः सप्तमे तथा ।
वैश्वदेवोऽथाष्टमे हि श्रुतः पात्नीवतो ग्रहः ॥ २३ ॥
हारियोजनसंज्ञस्तु नवमे ग्रह ईरितः ।
क्षये त्वाग्रयणग्रीर्वा दशमे स्यात्पुनर्ग्रहः ॥ २४ ॥
*सोमपात्रस्तुतित्वन्त्ये पञ्चमोऽर्धं प्रपाठकः ।
षष्ठाद्ये दक्षिणाहोमः सामिधेन्यनुवत्परे ॥ २५ ॥

* एतदर्धस्थाने स. ध. पुस्तकयोः 'सवनीयपुरोडाशाधिकारावधी स्थिताः । प्रपाठके पञ्चमेऽनुवाकार्था एवमीरिताः' एतादृशः श्लोको दृश्यते ।

(ज्योतिष्टोमतदाद्यसंस्थारूपाग्निष्टोमयोर्विधानम्)

तृतीयेऽह्नि भृथस्तुर्ये यूपैकादशिनी स्मृता ।
पश्चैकादशिनी तूर्ध्वे षष्ठे पात्नीवतः पशुः ॥ २६ ॥
सौम्यश्चरुः सप्तमे स्यादतिग्राह्यास्तथाऽष्टमे ।
अदाभ्यो नवमे तद्वदंशुस्तु दशमे श्रुतः ॥ २७ ॥
षोडश्येकादशे प्रोक्त एवं षष्ठः समापितः ।
एकाहाहीनसत्राणि सोमभेदा इमे त्रयः ॥ २८ ॥
वर्ण्यन्ते सप्तमे काण्डे मन्त्राः केऽप्यश्वमेधगाः ।
ज्योतिष्टोमः सोमयागप्रकृतिः स तु सप्तधा ॥ २९ ॥
अग्निष्टोमो ज्योतिर्भेदैर्मूलप्रकृतिरादिमः ।
स्तोमा ज्योतींषि यस्यासौ ज्योतिष्टोमः स ईरितः ॥ ३० ॥
त्रिवृत्पञ्चदशः सप्तदशः स्तोमास्त्रयो मताः ।
तथैकविंश एतानि ज्योतींषीत्यभ्यधाच्छ्रुतिः ॥ ३१ ॥

सोऽयमेतादृशो ज्योतिष्टोम आदौ विधीयते ।

(इति भाष्यकारोपोद्घातः) ।

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरिः ॐ ।

प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट्छन्दसां ज्योतिर्विराडिवाचोऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात्तज्ज्योतिरुच्यते द्वौ स्तोमौ प्रातःसवनं वहतो यथा प्राणश्चापानश्च द्वौ माध्यंदिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक्च प्रतिष्ठा च पुरुषसंमितो वा एष यज्ञोऽस्थूरिः (१) यं कामं कामयते तमेतेनाभ्यश्नुते सर्वꣳ ह्यस्थूरिणाऽभ्यश्नुतेऽग्निष्टोमेन वै

प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात्तासां परिगृहीतामश्वतरोऽत्यप्रवत तस्यानुहाय रेत आऽदत्त तद्दर्भे न्यमार्ट्तस्माद्दर्भो द्विरेता अथो आहुर्वडवायां न्यमार्डिति तस्माद्वडवा द्विरेता अथो आहुरोषधीषु (२) न्यमार्डिति तस्मादोषधयोऽनेभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्मान्मर्यो जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्बर्हिष्यनवकॢप्तः सर्ववेदसे वा सहस्रे वाऽवकॢप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति (३ प्रजापतिर्वाव ज्येष्ठः स श्रेतेनाग्नेऽयत प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप्छन्दो बृहत् (४) साम राजन्यो मनुष्याणामविः पशूनां तस्मात्ते वीर्यावन्तो वीर्याद्ध्यसृज्यन्त मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपꣳ साम वैश्यो मनुष्याणां गावः पशूनां तस्मात्त आद्या अन्नधानाद्ध्यसृज्यन्त

(ज्योतिष्टोमतदायत्तसंस्थारूपाग्निष्टोमयोर्विधानम्)

तस्माद्भूयाꣳसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविꣳशं निरमिमीत वमनुष्टुप्छन्दः (५) अन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात्तौ भूतसंक्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात्पादावुप जीवतः पत्तो ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्वय इमे लोका असावादित्य एकविꣳश एतस्मिन्वा एते श्रिता एतस्मिन्प्रतिष्ठिता य एवं वेदैतस्मिन्नेव श्रयत एतस्मिन्प्रतितिष्ठति (६) ॥

(अस्थूरिरोषधीषु ज्येष्ठयज्ञ इति बृहदनुष्टुप्छन्दः प्रतिष्ठिता नव च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः)।

तमेतं ज्योतिष्टोमं विधातुं दृष्टान्तत्रयेण ज्योतिष्ट्वं तावद्दर्शयति—

प्रजननमिति। मनुष्याणां मध्ये प्रजोत्पादनं ज्योतिः। अपत्यरहितास्तु म्लानमुखास्तमःसदृशा भवन्ति। देवतानां मध्ये ज्योतिरग्निः। अन्यासां देवतानां गृहमध्ये यथा दीपापेक्षा नैवमग्नेरन्यापेक्षाऽस्ति। छन्दसां मध्ये विराट्छन्दो ज्योतिः। दीप्तिवाचकेन राजतिधातुना व्यवह्रियमाणत्वात्। तदेतत्त्रिविधमपि लोकप्रसिद्धं ज्योतिः सोमयागे संपादयितुं शक्यते। प्रजोत्पत्तिसाधनरूपत्वं तावद्दृश्यते—" अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " इति। अग्निरूपत्वं विराडूपत्वं चात्रैव संपाद्यते। या वाचो विराट्तदुपलक्षिता दश-

---

१ स. घ. च. °दनत्वं ज्यो°।

संख्या दशाक्षरा विराडिति श्रुतेः, सेयं संख्याऽग्नौ समाप्यते। तथा हि—प्रातः-सवने बहिष्पवमानाख्यस्तोत्रस्य त्रिवृत्स्तोमः। तत्र त्रिषु सूक्तेष्वेकैकस्मिंस्तिस्र ऋच इत्येवं नव स्तोत्रियाः। तथा तस्मिन्नेव सवने चतुर्ष्वाज्यस्तोत्रेषु पञ्चदश-स्तोमे सति षष्टिः स्तोत्रीयाः संपद्यन्ते। तथा माध्यंदिनसवने माध्यंदिनपवमा-नाख्यस्तोत्रस्य पञ्चदशस्तोमे सति पञ्चदश स्तोत्रीयाः संपद्यन्ते। तथाऽस्मि-न्नेव सवने चतुर्षु पृष्ठस्तोत्रेषु सप्तदशस्तोमे सत्यष्टषष्टिः स्तोत्रीयाः संपद्यन्ते। तथा तृतीयसवन आर्भवपवमानाख्यस्तोत्रस्य सप्तदशस्तोत्रे सति सप्तदश स्तोत्री-याः संपद्यन्ते। यद्यपि माध्यंदिनपवमानार्भवपवमानयोः सूक्तभेदादृचोऽत्यन्तं बहवः सन्ति तथाऽपि स्तोत्रगतस्तोमप्रयुक्त्या गणनेयमित्यविरोधः। तथा तस्मिन्नेव सवने यज्ञायज्ञियस्तोत्रस्यैकविंशस्तोमे सत्येकविंशतिसंख्याकाः स्तोत्रीयाः संपद्यन्ते। तदेवं प्रातः सवन एकोनसप्ततिर्माध्यंदिनसवने त्र्यशीतिस्तृतीयसव-नेऽष्टात्रिंशदिति मिलित्वा नवत्यधिकाः शतसंख्याकाः स्तोत्रीया भवन्ति। ताश्च दशभिर्विभक्ताः सत्य एकोनविंशतिविराड्रूपाः संपद्यन्ते। सेयं संपद्यमाना स्तोत्रीयाख्या वाचः संबन्धिनी विराडुपलक्षिता दशसंख्याऽग्नौ समाप्यते। अन्तिमस्य यज्ञायज्ञियस्तोत्रस्याऽऽग्नेयत्वात्। अग्निर्हि तत्र प्रतिपाद्यते। यज्ञा-यज्ञा वो अग्नय इत्याम्नानात्। अतोऽग्निरूपत्वं विराड्रूपत्वं च सोमयागस्य सिद्धम्। यस्मादयं सोमयागो विराड्रूपमभिसंपद्यते तस्माद्विराड्रूपत्वात्पजो-त्पत्तिहेतुत्वाच्च सोमयागस्वरूपं ज्योतिरित्युच्यते।

तदेवं विधेयस्य सोमयागस्य सबन्धिनि ज्योतिष्टोमनाम्नि ज्योतिरित्यय-मंशः प्रतिपादितः। अथावशिष्टमंशं प्रतिपादयति—

द्वाविति। तत्र त्रिवृत्स्तोमो बहिष्पवमानाख्यं स्तोमं वहति निष्पादयति। पञ्चदशस्तोमश्चत्वार्याज्यस्तोत्राणि वहति। एवं द्वौ स्तोमौ प्रातःसवनं निर्वहतः। यथा लोके पुरुषस्य प्राणापानौ जीवनं निर्वहतस्तद्वत्। ततः पञ्चदशस्तोमो माध्यंदिनं पवमानस्तोत्रं वहति। सप्तदशस्तोमश्चत्वारि पृष्ठस्तोत्राणि वहति। एवं द्वौस्तोमौ माध्यंदिनसवनं वहतः। यथा पुरुषस्य चक्षुःश्रोत्रे रूपदर्शनशब्द-श्रवणव्यवहारं वहतस्तद्वत्। सप्तदशस्तोम आर्भवपवमानं वहति। एकविंश-स्तोमो यज्ञायज्ञियस्तोत्रं वहति। एवं द्वौ स्तोमौ तृतीयसवनं वहतः। यथा पुरुषस्य वागिन्द्रियं पादेन्द्रियं चाभिवदनगमनव्यवहारं वहतस्तद्वत्। प्रति

(ज्योतिष्टोमतद्वाचसंस्थारूपाग्निष्टोमयोर्विधानम्)

तिष्ठन्ति मार्गे यया पादेन्द्रियप्रवृत्त्या सेयं प्रतिष्ठा । तदेवं स्तोमैर्निष्पन्नोऽयं सोमयागः पुरुषसदृशो नतु स्थूरिः, केनाप्यङ्गेन न्यूनः स्थूरिरित्युच्यते, नत्वयं न्यूनः, प्राणापानादिकृत्स्नपुरुषावयवसाम्यस्य प्रतिपादितत्वात् । एवं स्तोमरूपत्वे सिद्धे सति ज्योतीरूपाः स्तोमा अत्रेति व्युत्पत्त्या ज्योतिष्टोम इत्युच्यते । एतदेवाभिप्रेत्यान्यत्राऽऽम्नातम्—" तदाहुः । कतमानि वाव तानि ज्योतींश्यषि । य एतस्य स्तोमा इति त्रिवृत्पञ्चदशः सप्तदश एकविंशः। एतानि वाव तानि ज्योतींश्यषि । य एतस्य स्तोमाः" इति । स्तोमानां च स्वरूपविशेषः प्रथमकाण्डे राजसूयप्रकरणे समिधमातिष्ठत्यनुवाके तोमब्राह्मणोदाहरणेन विस्पष्टः प्रतिपादितः ।

तदेवं ज्योतिष्टोमनामव्युत्पादनमुखेन विधेयार्थप्रशंसा संपादिता । इदानीं तद्विधिमुन्नयति—

यमिति। एतेन ज्योतिष्टोमेन सर्वकामानां(णां)प्राप्तुं शक्यत्वादिमं ज्योतिष्टोमं कुर्यादित्याभिप्रायः । यस्माल्लोकेऽप्यस्थूरिणा सर्वावयवसंपूर्णेन साधनेन तत्फलं सर्वमप्यश्नुते तस्मादत्रापि स्तोमसंपूर्णनानेन सर्वकामप्राप्तियुक्ता ।

इत्थं ज्योतिष्टोमं सर्वस्तोमयागप्रकृतिभूतं विधाय तदीयासु सप्तसंस्थासु मध्ये प्रथमसंस्थारूपमग्निष्टोमं विधातुं प्रस्तौति—

अग्निष्टोमेनेति । पुरा किलसृक्षुः प्रजापतिरग्निष्टोमेन साधनेन प्रजाः सृष्ट्वा तेनैव स्वाधीनतया परिगृहीतवान् । तासां परिगृहीतानां प्रजानां मध्ये गर्दभाश्वाभ्यामुत्पादितः संकीर्णजातिरश्वतरः । सोऽप्य प्रजापतिपरिग्रहमुल्लङ्घ्यात्यन्तदूरं गतः । स च प्रजापतिस्तस्याश्वस्य पृष्ठतो गत्वा तदीयं शरीरगतं सारभूतं रेत आदाय गर्दभशरीरे न्यमार्ट् नितरां मृष्टवान् । अत एत गर्दभो द्विविधरेतोयुक्तः । गर्दभजातेरश्वतरजातेश्चोत्पादनेन द्विविधत्वम् । अपि चान्ये केचिदभिज्ञा एवमाहुः—वडबायामश्वयोषिति नितरां मृष्टवानिति । तस्मादियं वडबा रेतोद्वययुक्ता । साऽप्यश्वजातिमश्वतरजातिं चोत्पादयति । अपि चान्येऽभिज्ञा एवमाहुः—ओषधीषु नितरां मृष्टवानिति । अत एवौषधयो मनुष्याणामिव घृततैलाभ्यङ्गाभावेऽपि सारातिक्येन वर्धन्ते स्निग्धवद्दृश्यन्त इत्यर्थः । अपि

---

१ घ. ङ. च °के सोम° ।

चान्येऽभिज्ञा एवमाहुः—प्रजासु मनुष्यजातिषु नितरां मृष्टवानिति । अत एव क्वचिदेकस्मिन्गर्भे शरीरद्वयमुत्पद्यते । यस्मादयमश्वतरः प्रजापत्यपहृतरेतस्कस्तस्मान्नपुंसकवदयं प्रजामुत्पादयितुमसमर्थः । यस्माच्चायं निःसारस्तस्मादेव यज्ञेऽप्ययोग्यः । यस्तु यज्ञविशेषः सर्वस्वदक्षिणाकः सहस्रदक्षिणाको वा तत्रायं नियमेन दानयोग्यः । रेतोरहित्येऽप्यतिलङ्घ्य गन्तुं समर्थत्वादतिलङ्घितमाकृतदक्षिणाके यज्ञे योग्यो भवति । ' अश्वतरं साहस्रे सर्ववेदसे च ददाति ' इति सूत्रकारवचनात् ।

इदानीं विधत्ते—

य एवमिति । अग्निष्टोमयाजी पूर्वमनुत्पन्नाः प्रजा उत्पादयितुमुत्पन्नाश्च स्वाधीनत्वेन परिग्रहीतुं समर्थो भवति । यस्मात्सर्वेषां देवानां मध्ये ज्येष्ठः प्रजापतिः सृष्टिसाधनत्वेनाग्र एतेनायजत तस्माज्ज्येष्ठेनेष्टत्वात्पथमिष्टत्वाच्चायमग्निष्टोमो ज्येष्ठयज्ञः सर्वेषामुक्थ्यादीनां मूलप्रकृतिभूत इत्यर्थः । अग्निविषयेण यज्ञायज्ञा वो अग्नय इति मन्त्रेण संपाद्यमानो योऽयमेकविंशः स्तोमस्तेन समाप्यमानत्वादयमग्निष्टोम इत्युच्यते ।

तस्य च प्रजोत्पादनसाधनत्वं यत्पूर्वमुक्तम्—" अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " इति, तदिदं मुखादिस्थानचतुष्टयेन प्रपञ्चयितुं मुखजन्यां सृष्टिं दर्शयति—

प्रजापतिरिति । सिसृक्षुः प्रजापतिस्वत्साधनत्वेनाग्निष्टोममनुष्ठाय तत्सामर्थ्येन सत्यसंकल्पः सन्स्वकीयान्मुखात्त्रिवृदादय उत्पद्यन्तामिति संकल्प्य तथैव निर्मितः सन्नादौ त्रिवृत्स्तोमः सृष्टः । तमनु देवतानां मध्येऽग्निः । तमप्यनु च्छन्दसां मध्ये गायत्री सृष्टा । तामप्यमनु साम्नां मध्ये रथंतरं सृष्टम् । तदप्यनु मनुष्याणां मध्ये ब्राह्मणः सृष्टः । तमप्यनु पशूनां मध्येऽजः सृष्टः । यस्मादेते मुखतः सृष्टास्तस्मान्मुख्या वक्ष्यमाणेभ्यः श्रेष्ठाः ।

अथ द्वितीयस्थानादुत्पत्तिं दर्शयति—

उरसो बाहुभ्यामिति । पूर्ववद्व्याख्येयम् । वीर्ययुक्ताद्बाहुदेशादुत्पन्नत्वात्तेषामपि सामर्थ्याधिक्यम् ।

अथ तृतीयस्थानादुत्पत्तिं दर्शयति—

मध्यत इति । मध्यत उदरप्रदेशात् । यस्मादन्नाधारादुदरादसृज्यन्त तस्मा-

१ ख. घ. च. ॅनुष्यादिजा॰ । २ ख. घ. ङ. च उत्पाद्य॰ ।

(ज्योतिष्टोमउदाद्यसंस्थारूपाग्निष्टोमयोर्विधानम्)

दाद्या भोग्याः। वैश्या वाणिज्येन धनसंपादकत्वाद्भोग्याः। गावश्च क्षीर दिसंपादनेन भोग्याः। यस्मादतिबहून्विश्वान्देवानन्वेते वैश्याः सृष्टास्तस्माद्वाणिज्यकर्तारो लोके भूयांसः।

अथ चतुर्थस्थानादुत्पत्तिं दर्शयति--

पत्त एकविꣳशामिति। पत्तः पादतः। भूतानां पूर्वोत्पन्नानां ब्राह्मणादीनां संक्रामः सम्यगाक्रमणं तदधीनत्वेनावस्थानमित्यर्थः। सोऽयं भूतसंक्रामो ययोरश्वशूद्रयोस्तावुभौ भूतसंक्रामिणौ। शूद्राणां वर्णत्रयपरिचर्यामुख्यत्वेन तदधीनत्वम्। अश्वानां च वहनेन तदधीनत्वम्। अत्र पूर्वस्थानेभ्य इव पादतो न काचिद्देवता सृष्टा, तस्माद्देवतामनु सृज्यत्वाभावाच्छूद्रो यज्ञे प्रवर्तितुं न योग्यः। यस्मादश्वशूद्रौ पादत उत्पन्नौ तस्मात्पादाविव तयोर्जीवनसाधनम्। शूद्रो हि ब्राह्मणाद्याज्ञया पद्भ्यां यत्र क्वापि गमनागमने कुर्वञ्जीवति। अश्वश्च ब्राह्मणादिवाहिपादैर्यत्र क्वापि गच्छन्खाद्यं लभते।

एवं सृष्टिसाधनमग्निष्टोमं प्रशंसितुं सृष्टिं प्रपञ्च्य तत्र प्रकृतोपयुक्तान्स्तोमान्विशेषतः प्रशंसति--

प्राणा इति। बहिष्पवमानस्तोत्रे सूक्तानां त्रित्वादेकैकस्मिन्सूक्ते भक्तीनां त्रित्वाच्च तदीयस्य स्तोमस्य त्रिवृत्त्वम्। प्राणापानव्यानानां चोर्ध्वाधोमध्यवर्तिनां त्रित्वात्तत्साम्यम्। अर्धमासगतानां रात्रीणा संख्यया पञ्चदशस्तोमसाम्यम्। प्रजापतिरूपाणामाश्रावयेत्यादीनामक्षराणा संख्यया सप्तदशस्तोमसाम्यम्। आदित्यस्य संख्यैकविंशस्तोमसाम्यं वक्तुं त्रय इमे लोका इत्यनेन ब्राह्मणान्तरं प्रत्यभिज्ञाप्यते। तच्च ब्राह्मणान्तरमेवमाम्नातम्--" द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशः " इति। एतस्मिन्नेकविंशस्तोमे पूर्वोक्तास्त्रिवृदादय आश्रिताः। अधिकसंख्यायामल्पसंख्यान्तर्भावात्। किंचैतस्मिन्नेव स्तोमाः प्रतिष्ठिताः समाप्ताः नह्येकविंशादूर्ध्वमग्निष्टोमे कश्चिदधिकः स्तोमो विद्यते। य एवमेतस्य महिमानं वेद स एतस्मिन्नाश्रितः प्रतिष्ठितो भवति। अग्निष्टोममनुष्ठातुं फलं प्राप्तुं च योग्यो भवतीत्यर्थः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः॥ १॥

---

१ ख. घ ङ च °श्वादीना

(स्तोमानां संभूयकारित्वकथनम्)

(अथ सप्तमाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्यं प्रजननेनैकविꣳशाय ज्योतिर्दधदेति स्तोमं त तत्स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोमभि प्र णयति यावन्तो वै स्तोमास्तावन्तः काम स्तावन्तो लोकास्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीꣳष्यव रुन्धे (१) ॥

(तावन्तो लोकास्त्रयोदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके सोमयागानामाद्यो ज्योतिष्टोमस्तदीयसप्तसंस्थानामाद्यसंस्थारूपोऽग्निष्टोमश्चेत्युभयं विहितम् ।

अथ तत्र स्तोमानां मुख्यत्वं दर्शयितुं द्वितीयेऽनुवाके स्तोमानां संभूयकारित्वं तावदादौ दर्शयति--

प्रातःसवन इति । आदौ प्रजापतिरग्निष्टोममनुतिष्ठन्प्रातःसवनकाल उपास्मै गायता नर * इत्येतेनमन्त्रगतेन गायत्रेण च्छन्दसा युक्तस्तावता परितोषं प्राप्य त्रिवृत्स्तोमसिद्ध्यर्थं ज्योतिर्दधत्तद्विषयप्रसारितां मनोवृत्तिं धारयन्नेति प्रवर्तते, त्रिवृत्स्तोम इत्थं प्रयोक्तव्य इति विचारयन्नेवाऽऽस्त इत्यर्थः । स च स्तोमो ब्रह्मवर्चसप्रदत्वात्तद्रूपः । तेन ब्रह्मवर्चसरूपेण त्रिवृत्स्तोमेन तुष्टोऽप्यपरितुष्टः पञ्च-

* सर्वपुस्तकेषु ' इत्येतस्मिन्मन्त्रगतेन ' इति वर्तते तदयुक्तमिति प्रतिभाति ।

१ क. °नष्ठितवान्प्रा° ।

(अतिरात्रविध्युत्रयनम्)

दशस्तोमाय मनोवृत्तिं धारयन्नास्ते । स च पञ्चदशः शारीरबलस्येन्द्रियसामर्थ्यस्य च हेतुत्वात्तदुभयात्मकः । तेनापि युक्तः पुनः सप्तदशस्तोमानुष्ठानाय मनोवृत्तिं धारयन्प्रवर्तते । स च स्तोमः संख्ययाऽऽश्रयेत्याद्यक्षरसाम्यात्तदक्षरात्मकप्रजापतिसबन्धि(न्धी) प्रजोत्पत्तिहेतुश्च । तादृशेन स्तोमेन यक्तोऽपि पुनरेकविंशस्तोमानुष्ठानाय मनोवृत्तिं धारयन्प्रवर्तते । तदेव स्तोम एव पूर्वोक्तस्तोमरूप एव सन्नुत्तरस्तोमाय तज्ज्योतिर्मनोवृत्तिं धारय न्प्रवर्तत । अपि च तथा प्रवृत्तः सन्नुत्तरस्तोमनामिमुख्येन प्रणयति ।

इत्थं स्तोमाना संभूयकारित्वं दर्शितम् । अथ स्तोमान्प्रशंसति—

यावन्त इति । स्तोमा यावन्तो यावत्संख्याकास्तावन्त एव कामाः काम्यानि फलानि तैर्निष्पाद्यानि । तच्च पूर्वमेव सूचितम् । त्रिवृता ब्रह्मवर्चसं निष्पद्यते । पञ्चदशेनौजो वीर्यं च । सप्तदशेन प्रजास्वामित्वं प्रजोत्पादकत्वं च । तत्रयमत्रैव सूचितम् । एकविंशेन प्रतिष्ठोत्पाद्यते । तच्च पूर्वानुवाक एतस्मिन्प्रतितिष्ठतीति सूचितम् । एवं सति यावन्तः स्तोमास्तावन्तः कामाः संख्याः । तत्फलभोगाधारभूता देहा लोकास्तोऽपि तावन्त एव । तेषु देहेषु तत्फलानुभवा एव ज्योतींषि । तान्यपि तावन्त्येव ।

इत्थं स्तोमान्प्रशस्य योऽग्निष्टोमेन यजते तस्य फलं प्रशंसति—**एतावत इति**।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके तृतीयाऽनुवाकः)।

ब्रह्मवादिनो वदन्ति सत्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणास्तस्यार्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यं-

---

१ ख. घ च. वृत्तिरूप धा° । २ ख. निष्पाद्य° । ३ ख. च °कत्वम् । एत° । ४ क. घ. ङ. च. °भव ए° ।

सदिति खलु वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति (१) प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायां च विराजीति (२) खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत्परमो य एवं वेद परमतामेव गच्छति (३) ॥

(सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः) ।

प्रथमानुवाकविहिते ज्योतिष्टोमे पुरुषं प्ररोचयितुं द्वितीयेऽनुवाके स्तोमप्रशंसा कृता । अग्निष्टोमस्य तु प्राथम्यं "तस्मादाहुर्ज्येष्ठयज्ञः" इतिवाक्येनोक्तम् । तत्प्राथम्यवत्प्राथम्यमतिरात्रस्यापि वैकल्पिकमस्ति । अत एव सूत्रकारेणोक्तम्—'अग्निष्टोमः प्रथमयज्ञोऽतिरात्रमेके पूर्वं समामनन्ति' इति ।

तस्यैतस्यातिरात्रस्य तृतीयानुवाके विधिमुन्नयति—

ब्रह्मवादिन इति । यः पुरुषोऽग्निष्टोममनुतिष्ठति स पुनः सर्वस्तोमेन चेद्यजेत तदा स एवं मख्यो यष्टेति ब्रह्मवादिन आहुः । तस्मात्सर्वस्तोममनतिग्रहेतिति

(अतिरात्रविध्युन्नयनम्)

विधिरुच्येयः। अग्निष्टोमे चत्वार एव स्तोमास्त्रिवृदादयः। अतिरात्रे तु त्रिणवत्रयस्त्रिंशावपि स्तोमौ विद्येते। तस्मादयं सर्वस्तोमः।

तत्रान्वयव्यतिरेकाभ्यां प्रथमस्तोमं प्रशंसति—

यस्य त्रिवृतमिति। यस्य यजमानस्य यागे वर्तमाना ऋत्विजस्त्रिवृत्स्तोममन्तरितं कुर्युस्तस्य स्तोमस्य प्राणरूपत्वात्त ऋत्विजस्तस्य यजमानस्य प्राणानेवान्तरितान्कुर्वन्ति। न त्वेतद्युक्तम्। अयं यजमानो हि प्राणेष्वपि मे भागित्वमस्त्वित्यभिप्रेत्य यज्ञमनुतिष्ठति। तस्मात्त्रिवृत्स्तोमोऽवश्यंभावी।

अथ द्वितीयस्तोमं प्रशंसति—

यस्य पञ्चदशमिति। पञ्चदशस्य वीर्यसाधनत्वात्तदन्तराये वीर्यस्यान्तरायः। अन्यत्पूर्ववत्। अथ तृतीयस्तोमं प्रशंसति—

यस्य सप्तदशमिति। पूर्ववत्।

अथ चतुर्थस्तोमं प्रशंसति—

यस्यैकविꣳशमिति। पूर्ववत्।

अथ पञ्चमं स्तोमं प्रशंसति—

यस्य त्रिणवमिति। ऋतुत्वेन त्रिणवस्य स्तुतिः शाखान्तरे द्रष्टव्या। अतस्त्रिणवस्यान्तराय ऋतूनामेवान्तरायो भवति। त्रिणवस्तोमे सप्तविंशतिसंख्याकाः स्तोत्रीया नक्षत्राणि च कृत्तिकादीनि सप्तविंशतिसंख्याकानि। विराट्शब्दोऽपि विविधराज्यवाची नक्षत्रेष्टिषु श्रूयमाणं फलसमूहमुपलक्षयति। तथा सति त्रिणवान्तरायेण नक्षत्रसंबन्धिन्या विराजोऽन्तरायः। शेषं पूर्ववत्।

अथ षष्ठं स्तोमं प्रशंसति—

यस्य त्रयस्त्रिꣳशमिति। त्रिष्वपि लोकेषु प्रत्येकमेकादशसंख्याका देवताः। ताश्च "ये देवा दिव्येकादश स्थ" इति मन्त्रे समाम्नाताः। तथा सति त्रयस्त्रिंशस्तोमान्तराये त्रयस्त्रिंशस्तोमाख्य (ख्या) साम्यात्तासां देवतानामन्तरायो भवति। सोऽयमन्तरायोऽनुपपन्नः। देवतासु यत्फलं तदपि मे भूयादित्यभिप्रेत्य यजमानेन यष्टुं प्रवृत्तत्वात्। तदेवमतिरात्रविवक्षया सर्वे स्तोमाः प्रशस्ताः। सन्ति हि कस्मिंश्चिदतिरात्रे सर्वे स्तोमाः। अत एव ह्युपरिष्टाद्विधास्यति—'सर्वस्तोमोऽतिरात्र उत्तरम्' इति।

तथाऽन्यमतिरात्रगतं विशेषं विधित्सया प्रशंसति—

(आङ्गिरसाद्विरात्राहानाविधिकथनम्)

यो वा इति । स्तोमानां मध्ये ह्यूनसंख्याकस्तोत्रियोपेतस्त्रिवृत्स्तोमोऽवमः स एवोत्तमः तस्य च परमत्वादन्ते प्रयोगः । अतिरात्रे हि तथा प्रयुज्यते । त्रिवृद्रार्धतरः संधिरिति चरमे संधिस्तोत्रे त्रिवृतो विधानात् । य एव वेदेति पुनर्वचनमुपसंहारार्थम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ।)

अङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमायन्तेषाꣳ हविष्माꣳश्च हविष्कृच्चाहीयेतां तावेकामयताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां तमाऽहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान्द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्नाऽगच्छतामुत्तरेण (१) अभिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्धे सर्वस्तोमोऽतिरात्र उत्तरꣳ सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै गायत्रं पूर्वेऽहन्त्सामं भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन्धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन्धत्ते रथंतरं पूर्वे (२) अहन्त्सामं भवतीयं वै रथंतरमस्यामेव प्रतितिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रतितिष्ठति तदाहुः कꣳ जगती चानुष्टुप्चेति वैखानसं पूर्वेऽहन्त्सामं भवति तेन

---

१ क. °मः । त° । २ ख. °तरस° ।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभोऽर्धाऽऽहुर्य-त्समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनुपद्ये-तेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानै-वार्धमासयोर्भवतो नानावीर्ये भवतो हविष्म-न्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रति-ष्ठित्यै (३)।

(उत्तरेण रथंतरं पूर्वेऽन्वेकविंशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयानुवाके सर्वस्तोमोऽतिरात्र उक्तः। सर्वैकाह इति सर्वेऽप्येकाहा एते-नोपलक्षिताः। अथाहीना द्विरात्रादयः क्रमेणोच्यन्ते। चत्वारो हि द्विरात्र-भेदाः। तत्र व्युष्टिद्विरात्रो राज्ञां विहितः।

अथाङ्गिरसां द्विरात्रो विधीयते--

अङ्गिरसो वा इति। अङ्गिरसो महर्षयो यदा सत्रमनुष्ठाय स्वर्गं प्राप्तास्त-दानीं तेषां मध्ये हविष्मान्हविष्कृदित्यौ पुरुषावनुष्ठानेन स्वर्गतावपि हीनौ स्या (नावभव)ताम्। तौ पुनः स्वर्गप्राप्तिं कामयमानौ द्विरात्राख्यं यागं तत्साध-नत्वेन निश्चित्य तृतीयां सामग्रीं संपाद्य तदनुष्ठानेन स्वर्गं प्राप्तौ। अतोऽन्योऽपि स्वर्गप्राप्तये द्विरात्रेण यजेत।

अथाहर्विशेषं विधत्ते--

तावैतामिति। तौ हविष्पद्धविष्कृन्नामानावृषी द्विरात्रगतेन पूर्वेणाह्ना स्वर्गं प्रविष्टौ। अत्र सर्वत्राहःशब्देनैकदिनसाध्यस्तोमप्रयोग उपलक्ष्यते। अभिष्टु-वाख्यः कश्चित्षडहयागविशेषः। तस्य च प्रथमदिने ज्योतिष्टोमप्रथमसंस्थारूपो ऽग्निष्टोमो विहितोऽस्ति। स एवात्राभिष्टवशब्देनोपलक्ष्यते। सोऽत्र पूर्वमहर्भ-

---

१ क. ख ङ. च °ष्टोमः प्र°।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

वति, पूर्वदिनेऽनुष्ठेय इत्यर्थः । गम्यते स्वर्गो येनातिरात्रेण सोऽयमतिरात्रविशेषो गतिः । स च गतिरुत्तरमहर्भवति, द्वितीयदिने सोऽतिरात्रोऽनुष्ठेय इत्यर्थः ।

उक्तार्थस्पष्टीकरणद्वारेण स्तोमविशेषान्विधत्ते—

ज्योतिष्टोम इति । अभिप्लव इत्यस्य व्याख्यानं ज्योतिष्टोम इति । तत्र हि ज्योतिष्टोमे निरूपितास्त्रिवृदादयश्चत्वारः स्तोमाः क्रियन्ते । तदनुष्ठानेन तेजः प्राप्नोति । सर्वस्तोमैरुपेतोऽतिरात्र इत्यनेन त्रिणवत्रयस्त्रिंशस्तोमाभ्यां सहिता अशेषस्तोमा उक्ताः । तेन च सर्वमप्यप्राप्यं प्राप्यते, स्वाधीनं च भवति । द्वादशभिः स्तोत्रैरुपेतोऽग्निष्टोम एकोनत्रिंशद्भिः(ता)स्तोत्रैरुपेतोऽतिरात्र इति तयोर्भेदः ।

अथ होतारं प्रति प्रयोक्तव्ये स्तोत्रे दिनभेदेन सामविशेषं विधत्ते—

गायत्रमिति । गायत्रीछन्दस्कायामृच्युत्पन्न गायत्रमेतन्नामै(म)कं साम, तदेतद्धोतुराभिमुख्येन पठनीये स्तोत्रे गायेत् । तदेतत्पूर्वेऽह्नि द्रष्टव्यम् । गायत्र्या अग्निना सहोत्पन्नत्वात्तेजस्त्वं, ब्राह्मणैरनुष्ठेयत्वाद्ब्रह्मवर्चसत्वं, तदुभयमनेन साम्ना स्वस्मिन्समापयन्ति । यद्यपि त्रैष्टुभारूयं किंचित्साम नास्ति तथाऽपि त्रिष्टुप्छन्दस्कायामुत्पन्नत्वात्त्रैष्टुभमित्युच्यते । तदेतदुत्तरदिने गायेत् । तेन शारीरं बलमिन्द्रियसामर्थ्यं च प्राप्नोति ॥

अथ पृष्ठस्तोत्रसामविशेषं चोदकप्राप्तविकल्पनिवारणाय नियमयति—

रथंतरमिति । प्रकृतौ तु बृहद्रथंतरयोरैच्छिको विकल्पः । इह तु दिनभेदेन व्यवस्था ॥

पुनरपि दिनभेदेन व्यवस्थितं सामान्तर विधत्ते—

तदाहुरिति । अत्र ब्रह्मवादिनश्चोदयन्ति—अत्र विद्यमाने द्वे एवाहनी, तयोः पूर्वस्मिन्गायत्र्यामुत्पन्नं साम गीतं, तदुत्तरस्मिंस्तु त्रिष्टुभ्युत्पन्नं साम गीतं, न ह्यत्र तृतीयचतुर्थे अहनी विद्येते । ततो जगत्यनुष्टुभौ द्वावतिष्ठेते इति । तत्राभिज्ञाः सामान्तरविधानमुखेनोत्तरमाहुः—यद्बृहत्यामृच्युत्पन्नं वैखानसाख्यं साम तत्पूर्वदिने गायेत् । बृहती च द्वात्रिंशदक्षरा सती चतुर्वारमावर्त्यमाना जगतीत्रयं संपद्यते । अष्टाचत्वारिंशदक्षराणां जगतीनां तिसृणामक्षरसंख्यया बृहतीचतुष्टयसमानत्वात् । तेन वैखानससाम्नाऽयं द्विरात्रयागो जगत्याः सकाशान्नापैति । षोडशिशब्देन षोडशस्तोत्रे गीयमानं गौरिवीताख्यं सामोच्यते । तच्चो-

१ ख. घ. ङ. च. °मेन नि° ।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

त्तरेऽहनि गायेत्। तदाधारभूतामृचमवलम्ब्य पूर्ववदनुष्टुभं संपादयेत् तेन षोडशी(शि) साम्नाऽयं द्विरात्रोऽनुष्टुभः सकाशान्नापैति ॥

अथ दिनद्वयस्य पक्षव्यवस्थां विधत्ते—

अथाऽऽहुरिति। शुक्लः कृष्णो वैक एव पक्षः समानोऽर्धमासः। तस्मिन्नेव यद्युभे अहनी स्यातां तदानीमेकपक्षगतत्वादेकस्याह्नो यावद्वीर्यं तावदेव भवेत्। इतरस्य वीर्यं तु लुप्येत। अतः कृष्णपक्षस्यान्तिमदिने प्रथममहः कर्तव्यम्। शुक्लपक्षस्य प्रथमदिने द्वितीयमहः। एवं सति भिन्नार्धमासवर्तित्वाद्भिन्नवीर्ये भवतः ॥

अथ दिनभेदेन निधनविशेषं विधत्ते—

हविष्मन्निति। पञ्चधा विभक्तस्य साम्नः पञ्चमभागो निधनम्। हविष्मच्छब्दरूपं निधनं यस्मिन्नहनि तद्धविष्मन्निधनं, पूर्वदिने हविष्मदितिशब्दः प्रयोक्तव्य इत्यर्थः। एवमितरत्रापि। उत्तरस्मिन्नहनि हविष्कृच्छब्द इत्यर्थः। निधनयोर्द्वित्वात्पादसदृशत्वेन प्रतिष्ठित्यै संपद्यते।

अत्र मीमांसा—

दशमाध्यायस्य पञ्चमपादे चतुर्थाधिकरणे चिन्तितम्—

द्विरात्रादौ द्वादशाहप्रायणीयादिकः क्रमः।
आद्यन्तौ वर्जयित्वा वा विशेषाभावतोऽग्रिमैः ॥
द्वादशाहे द्वितीयस्य द्विरात्रे प्रथमत्वतः।
जागतस्यान्तरायाच्च विध्यन्तो दशरात्रगः ॥

अहीनरूपस्य द्वादशाहस्य विकृतयो द्विरात्रत्रिरात्रादयः। तेषु किं द्वादशाहस्य प्रथममहः प्रायणीयसंज्ञकमारभ्य क्रमेण विध्यन्तः प्रवर्तते, किंवा प्रायणीयोदयनीयावाद्यन्तौ वर्जयित्वा तन्मध्यगतस्य विध्यन्तः प्रवर्तत इति संशयः। ईदृशमहरुपादेयमीदृशं वर्जनीयमिति विशेषनियामकाभावादादित आरभ्य प्रवर्तत इति पूर्वः पक्षः। द्विरात्रं प्रकृत्यैवमाम्नायते—'यत्प्रथमं तद्द्वितीयं यद्द्वितीयं तत्तृतीयम्' इति। अयमर्थः—द्विरात्रस्य यत्प्रथममहरनुष्ठेयं तद्द्वादशाहस्य द्वितीयमिति। एवमुत्तरत्रापि योज्यम्। तदेतत्प्रायणीयवर्जने लिङ्गम् तथा जगतीमन्तर्यन्तीति जागतस्याह्नोऽन्तराय आम्नायते। तच्च वर्जने लिङ्गम्। एवमादिभिर्लिङ्गैरुभयं वर्जयित्वाऽवशिष्टो विध्यन्तो यत्र यावानपेक्षितस्तत्र तावान्प्रवर्तयितव्य इत्यवगन्तव्यम् ॥

तत्रैव त्रयोदशाधिकरणेऽन्यच्चिन्तितम् --

द्विरात्रेऽङ्गिरसां षोडश्यप्राप्तः किं विधीयते ।
परिसंख्यायते वाऽऽद्यश्चोदकाच्छीघ्रबुद्धितः ॥
अनारभ्यविधेः प्राप्तौ परिसंख्याऽतिदेशतः ।
विकल्पोऽन्यद्विरात्रेषु प्रोक्तं वृत्तिकृतो मतम् ॥

सन्ति बहवो द्विरात्राः । तेष्वङ्गिरसां द्विरात्रे श्रूयते--' वैखानसं पूर्वेऽह-न्त्साम भवति, षोडश्युत्तरे ' इति । सोऽयं षोडश्यप्राप्तः सन्विधीयते । न च चोदकात्प्राप्तिः शङ्कनीया, प्रत्यक्षवचनस्य शीघ्रवृत्तेः । चोदको ह्यानुमानिक-त्वेन विलम्बित इति प्राप्ते ब्रूमः--मा भूच्चोदकः । अस्ति ह्यनारभ्याधीतं प्रत्यक्षं विध्यन्तरम् --' उत्तरेऽहन्द्विरात्रस्य गृह्यते ' इति । तेषु(न) सर्वेषु द्विरात्रेषु प्राप्तः सन्नङ्गिरसां द्विरात्र एव नान्येषु द्विरात्रेष्विति परिसंख्यायते । ततोऽङ्गिरसां द्विरात्रे नियमेन षोडशी गृह्यत इतरेष्वतिरात्रविकृतित्वेनाति-देशाद्विकल्प्यते । तदेतद्वृत्तिकारमतम् ॥

तत्रैव भाष्यकारमतेनाऽऽरचयति--

परिसंख्या पूर्वपक्षे(क्षो) न सा युक्ता त्रिदोषतः ।
प्राप्तस्यान्या(स्यैवा)नुवादेन विधेये सा न शक्यते ॥

वृत्तिकारस्य सिद्धान्तरूपा या परिसंख्या सैव भाष्यकारमते पूर्वः पक्षः । सिद्धान्तस्तु षोडश्युत्तर इत्यर्थ विधिरेव न भवति । विधित्सितवैखानससामवा-क्यशेषत्वेनार्थवत्त्वात् । अतः परिसंख्या दोषत्रयोपेता नात्र कल्पनीया । प्राप्तस्य विध्यर्थस्य परित्यागः । अप्राप्तस्य निषेधार्थस्य स्वीकारः । अन्यत्र प्राप्तस्य वाध इति दोषत्रयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः) ।

आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजाप-

---

१ क. ख. घ. ङ. च. °स्तु नैव षो° । २ च. °र्थवादत्वात् ।

(गर्गत्रिरात्राभिधानम्)

तिर्वायुर्भूत्वाऽचरत्स इमामपश्यत्तां वराहो भूत्वाऽहरत्तां विश्वकर्मा भूत्वा व्यमार्ट्साऽप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवित्वं तस्यामश्राम्यत्प्रजापतिः स देवानसृजत वसून्रुद्रानादित्यान्ते देवाः प्रजापतिमब्रुवन्प्र जायामहा इति सोऽब्रवीत् (१) यथाऽहं युष्माꣳस्तपसाऽसृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाश्राम्यन्ते संवत्सर एका गामसृजन्त ता वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्रायच्छन्नेतां रक्षध्वमिति ता वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च (२) शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रतम्यभवत्ते देवाः प्रजापतिमब्रुवन्त्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत्त इमं लोकमजयन्तच्चाददुः स उक्थ्येन रुद्रानयाजयन्तेऽन्तरिक्षमजयन्तच्चाददुः सोऽतिरात्रेणाऽऽदित्यानयाजयत्तेऽमुं लोकमजयन्तच्चाददुस्तदन्तरिक्षम् (३) व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्न आज्यं भवति संयानानि सुक्तानि शꣳसति षोडशिनꣳ शꣳसत्यह्नो धृत्या अशिथिलभावाय तस्मात्त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां

लोकानां विधृत्यै त्रीणित्रीणि शतान्यनूचीनाह-
मव्यवच्छिन्नानि ददाति (४) एषां लोकानामनु
संतत्यै दशतं न वि च्छिन्द्याद्विराजं नेद्विच्छिन-
दानीत्यथ या सहस्रतम्यासीत्तस्यामिन्द्रश्च वि-
ष्णुश्च व्यायच्छेतां स इन्द्रोऽमन्यतानया वा
इदं विष्णुः सहस्रं वक्ष्यत इति तस्यामकल्पेतां
द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत
उभा जिग्यथुरिति तां वा एतामच्छावाकः (५)
एव शꣳसत्यथ या सहस्रतमी सा होत्रे देयेति
होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽ-
नाप्तस्याऽऽपयिताऽथाऽऽहुरुन्नेत्रे देयेत्यतिरिक्ता वा
एषा सहस्रस्यातिरिक्त उन्नेतार्त्विजामथाऽऽहुः
सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुदाकृत्या सा
वशा चरेदित्यथाऽऽहुर्ब्रह्मणे चाग्नीधे च देयेति
(६) द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै
ब्रह्मा वैष्णवोऽग्नीध्यथैव तावकल्पेतामित्यथाऽऽ-
हुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽहुर्या द्वि
रूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै
तद्वा एतत्सहस्रस्यायनꣳ सहस्रꣳ स्तोत्रीया
सहस्रं दक्षिणाः सहस्रसंमितः सुवर्गो लोकः सुव
र्गस्य लोकस्याभिजित्यै (७) ॥

(अब्रवीच्च तदन्तरिक्षं ददात्यच्छावाकश्च देयेति
सप्तचत्वारिꣳशच्च)।

(गर्गत्रिरात्राभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थे द्विरात्रोऽभिहितः। अथ त्रिरात्रं विधातुं काचिदारव्यायिकोच्यते। तस्यां चाऽऽख्यायिकायामादौ पृथिव्युत्पत्तिं दर्शयति--

आपो वा इति। इदमितीदानीं दृश्यमानं गिरिनदीसमुद्रादिकं जगत्पृथिव्युत्पत्तेः पूर्वं सलिलमासीत्। तस्मिन्नेव सलिले केवला आप एव नतु भूतान्तरं तत्कार्यं वा किंचिदपि नाऽऽसीत्। तदानीं प्रजापतिर्मूर्तस्य शरीरस्यावस्थातुं स्थानाभावाद्वायुरूपो भूत्वा तस्मिन्सलिले सर्वत्राचरत्। चरित्वा च सलिले निमग्नां भूमिं दृष्ट्वा स्वयं वराहो भूत्वा दंष्ट्राग्रेण तां भूमिं जलस्योपर्याहरत्। आहृत्य च वराहरूपमुत्सृज्य विश्वकर्मा भूत्वा विशेषेण मार्जनं कृत्वा तत्रत्यं द्रवमपनीय तां विस्तारितवान्। तत इयं दृश्यमाना सर्वप्राण्याधारभूता पृथिव्यभवत्। प्रथनादेव पृथिवीनाम संपन्नम् ॥

अथ देवसृष्टिं गोसृष्टिं च क्रमेण दर्शयति—

तस्यामिति। तस्यां भूमौ स प्रजापतिः स्वेनैव शरीरेणावस्थाय सिसृक्षुश्राम्यत्तपः कृतवान्। तस्माच्च तपःसामर्थ्याद्ब्रीन्वस्वादिदेवगणानसृजत। ते च वस्वादयः प्रजापतिं प्रति प्रजोत्पादनोपायं पप्रच्छुः। स च प्रजापतिर्मद्वत्तपसि कृते सति पश्चाद्यूयमुत्पादनमिच्छतेत्युक्त्वा होमाख्यस्य तपस आधारभूतमग्निं दत्त्वा तेनाग्निना होमलक्षणं तपः कुरुतेत्युक्तवान्। ते च संवत्सरं तथा कृत्वा तदन्ते सर्वेऽप्येकां गामसृजन्त। तां च गां स प्रजापतिर्वसुभ्यो रक्षणार्थं दत्तवान्। सा च रक्षिता सती वस्वर्थं गवां शतत्रयं त्रयस्त्रिंशतं चोत्पादयामास। ततः प्रजापतिस्तामेव गां रुद्रेभ्यो दत्तवान्। रुद्रार्थमपि सा तथैवोत्पादयामास। एवमादित्यार्थमप्युत्पादयामास। तमिमं (दिदं) पर्यायत्रयं संगृह्य श्रुतिरेकेनैव वाक्येनोदाजहार। तत्र त्रेधा वाक्यं विभज्य योजयितव्यम्। एवं सत्येकोनसहस्रं गवां संपन्नम्। येयं सहस्रतमी गौः सेयं सहस्रसंख्यापूरण्यभवत् ॥

अतः सहस्रदक्षिणाकेन त्रिरात्रयागेन(ण) याजनं दर्शयति—

ते देवा इति। वसुरुद्रादित्याः सर्वे मिलित्वा गोसहस्रदक्षिणाकयज्ञार्थं

प्रजापतिं प्रार्थयामासुः । स च प्रजापतिर्देवगणत्रयं विभज्य त्रिषु दिनेषु क्रमादग्निष्टोमोक्थ्यातिरात्रैर्याजितवान् । द्वादशस्तोत्रोऽग्निष्टोमः । पञ्चदशस्तोत्र उक्थ्यः । एकोनत्रिंशत्स्तोत्रोऽतिरात्रः । ते च त्रैलोक्यत्रयमजयन् । स्वकीयं स्वकीयं तत्तद्धोधनं च दक्षिणार्थमृत्विग्भ्यो दत्तवन्तः ॥

अथोक्थ्यरूपे मध्यमेऽहनि कांश्चिच्छंसनविशेषान्विधत्ते—

तदन्तरिक्षमिति । यदन्तरिक्षं रुद्रैर्जितं तदन्तरिक्ष व्यवैयत विशीर्णमभूत्। गृहरूपं लोकसंस्थानं भग्नमभूदित्यर्थः । तस्माद्रुद्राणामायतनमन्तरिक्षलोकस्थानं विशीर्णमभूत्तस्मादायतनाभावाद्रुद्राः कोपाविष्टाः सन्तः सर्वत्र प्राणिघातिनोऽभवन् । यस्मात्फलभूतमन्तरिक्षं विशीर्णमभूत्तस्मात्तत्साधनमात्र त्रिरात्रयागस्य मध्यममहः केनापि वैकल्येन शिथिलमित्येवमभिज्ञा आहुः । तस्मान्मध्यमस्याह्नो दार्ढ्येन शैथिल्यपरिहाराय कानिचिच्छस्त्राण्यनुष्ठेयानि । त्रिष्टुप्छन्दस्कादामृज्युत्पन्नं त्रैष्टुभं होतुराज्यशस्त्र शंसनीयम् । तथा संयानाख्यानि दाशतय्यां प्रसिद्धानि सूक्तानि शंसेत् । तथा षोडश्याख्यमपि शस्त्रं शंसेत् ॥

इत्थमाख्यायिकां प्रस्तुत्य मध्यमे विशेषांश्च विधाय त्रिरात्रयागस्याहर्विशेषान्विधत्ते--

तस्मादिति । यस्माद्रुस्वादिभिरहस्त्रयेण लोकत्रयजयायाहस्त्रयसंघातरूपमनुष्ठितं तस्मात्त्रिरात्रयागमनुतिष्ठेदित्यर्थः ॥

यदुक्तं सूत्रकारेण—' सहस्र दक्षिणास्त्रीणि शतानि त्रयस्त्रिंशत च प्रथमेऽहनि ददात्येवं द्वितीये तृतीये च साहस्रयतिरिच्यते ' इति, तदिदं विधत्ते—

त्रीणित्रीणीति । अनुक्रमेणाश्नुते प्रवर्तत इत्यनूचीनं, तादृश च तदहश्चानूचीनाहं प्रतिदिनमित्यर्थः । प्रतिदिनमाविच्छिन्नानि यथा भवन्ति तथा त्रीणि त्रीणि शतानि ददाति । त्रयस्त्रिंशत्संख्यापरा अप्येतदुपलक्षणम् । तथा सत्येकैकस्मिन्दिने त्रयस्त्रिंशदधिकं गवां शतत्रयं दद्यादित्यर्थो भवति । एतच्च लोकानां भूरादीनां संतत्यै भवति ॥

यदुक्तं सूत्रकारेण—' दक्षिणानयने न्यूना दशधा नयेत् ' इति, तदेतद्विधत्ते—

दशतं नेति । दशानां वर्गो दशत्तस्य वर्गस्य विच्छेदं न कुर्यात् । वेदैर्-

---

१ ख. च. °त् सहारू°।

(गर्गत्रिरात्राभिधानम्)

क्षिणस्यां दिश्यवस्थिता गाः प्राग्वंशसदसोमध्येन यदोत्तरस्यां दिशि दक्षिणार्थं नयति तदानीमेकैकं दशकं सहैव नयेत्। न तु दशतो न्यून नयेत्। दशसंख्याया विराड्रूपत्वात् विराज नैव विच्छिन्नां करोमीति नेतुरभिप्रायः। यत्तु त्रिंशत उपरि त्रयमधिकं तदपि चरमेण दशकेन सह नयेत्। न्यूनत्वस्यैवात्र [दशधेति] विधानात् ॥

एवमेकोनसहस्रे त्रिषु दिनेषु दत्ते सति सहस्रतमी परिशिष्यते। तद्दानं तु बहुधा विकल्पित प्रदर्शयितुं प्रस्तौति—

अथ येति। वल्गनिः कल्पनं, तयैव क्लृप्त्या तस्यां सहस्रतम्यां गवि निमित्तभूतायां ममैवेयं भूयादित्येवमिन्द्रश्च विष्णुश्च परस्पर कलह कुरुतः। तदानीमिन्द्रो मनस्येवमचिन्तयत्—तां गां गृहीत्वा विष्णुरनया गवा सहस्रमिदं सर्वं मां वर्जयित्वा स्वाधीनं करिष्यति, तस्मान्मयै(य्ये)वाधिकेन भागेन भवितव्यमिति। ततस्तावुभौ तस्यां गव्यकल्पतां व्यवस्थां कृतवन्तौ। इन्द्रो द्विभागे व्यवस्थित। विष्णुस्तृतीये भागे व्यवस्थितः। तदेतमर्थमभिलक्ष्य काचिदृग्वेदेऽप्यृगनूच्यते। सा च भागत्रयप्रतिपादिका। तस्याश्च प्रतीकम् ' उभा जिग्यथुः ' इत्येतत्। इय चोपरितनेऽनुवाके समाम्नास्यते ॥

अथैतस्या ऋचः शंसननियमं विधत्ते—

तां वेति। विकल्पितेषु दानपक्षेषु प्रथमं पक्षमाह—

अथ येति। प्रतिदिनं त्रयस्त्रिंशदधिकशतत्रये साम्येन दत्ते सति सेयं सहस्रतम्यतिरिच्यते। यत्तु द्रव्यं यागेऽतिरिक्त भवति तत्सर्वं होतारमभिलक्ष्यैवातिरिच्यते। होता ह्यनाप्तस्य सर्वस्य फलस्य प्रापयिता। तस्माद्धोत्रे सहस्रतमी देयेत्याद्यः पक्षः ॥

द्वितीयं पक्षं दर्शयति—

अथाऽऽहुरिति। एषा गौः सहस्रस्य मध्येऽतिरिक्तवीर्या। उन्नेताऽप्यृत्विजां मध्येऽतिरिक्तवीर्यः। अत एव हि हारियोजनभक्षे श्रूयते—' उन्नेतर्युपहवमिच्छन्ते ' इति। तस्मादियमुन्नेत्रे देयेत्येवं केचिदाहुः ॥

तृतीयं पक्षं दर्शयति—

अथाऽऽहुः सर्वेभ्य इति। अत्रोपपत्तिर्बर्हिरेव द्रष्टव्या। ' यावन्तो वै सदस्यास्ते सर्वे दक्षिण्याः ' इत्यन्यत्राऽऽम्नातम्। तस्मात्सदस्येभ्यो देया ॥

---

१ क. ड. तथेव।

चतुर्थं पक्षं दर्शयति--

अथेति । अत्राप्युपपत्तिः पूर्ववत् । दिनत्रये विभागसाम्येन दक्षिणा दत्ता। इयं चैका भागवैषम्यं च न युक्तम् । अतो यज्ञभूमेरुद्वृतां कृत्वा स्ववशत्वेन यथा चरति तथा कुर्यात् ॥

पञ्चमं पक्षं दर्शयति--

अथाऽऽहुर्ब्रह्मण इति । इन्द्रस्य विष्णोश्च या भागकल्पिस्तद्वत्तदीययोर्ब्रह्माग्नीध्रयोर्देया ॥

षष्ठं पक्षं दर्शयति--

अथाऽऽहुर्येति । इयं वै सहस्रतमी न कस्मैचिद्देया । किं त्वेतत्प्रतिनिधिरूपा या काचित्कल्याणी बहुक्षीरादिगुणवती विचित्रवर्णा सा दातव्या ॥

सप्तमं पक्षं दर्शयति--

अथाऽऽहुर्येति । या गौः शुक्लकृष्णवर्णाभ्यामुपेतत्वेन द्विरूपा, पार्श्वद्वये शुक्लकेशोपेतत्वादुभयत एनी, सहस्रसंख्यापूर्त्यर्थं तादृशी काचिद्देया ॥

तदिदं सहस्रदानोपेतं कर्म प्रशंसति--

तद्वा एतदिति । त्रिरात्राख्यं यत्कर्मोक्तं तदेतत्सहस्रसंख्याकफलस्य प्राप्तिहेतुः । यस्मादत्र त्रिषु दिनेषु मिलित्वा स्तोत्रीया ऋचः सहस्रं विद्यन्ते, दक्षिणाश्चोक्तरीत्या सहस्र गावः, स्वर्गलोकश्च सुखाधिक्याद्भूलोकसहस्रेण समानः, [तस्मात्] तादृशस्य स्वर्गस्याभिजयायेदं कर्म योग्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

सोमो वै सहस्रमविन्दत्तामिन्द्रोऽन्वविन्दत्तौ यमो न्यागच्छत्तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही३ इत्यब्रूताꣳ स यम एकस्यां वीर्यं पर्यपश्यदियं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतयोरिति तावब्रूताꣳ सर्वे वा एतदे-

(सहस्रतम्यभिधानम्)

तस्यां वीर्यम् (१) परि पश्यामोऽश्वा॑ इव॒ हरि॑- महा इति तस्यामꣳशामाऽहरन्त तामप्सु प्रावे॑शय॒न्त्सोमा॑योदेहीति सा रोहिणी पिङ्ग॒लैक॑हायनी रूपं कृत्वा त्र॑यस्त्रिꣳशता च त्रि॒भिश्च॑ शतैः सहो॒दैत्तस्माद्रोहि॑ण्या पिङ्ग॒लयैक॑हायन्या सोमं क्री॒णीया॒द्य एवं वि॒द्वान्रोहि॑ण्या पिङ्ग॒लयैक॑हायन्या सोमं क्री॑णाति त्र॑यस्त्रिꣳशता चैवास्य त्रि॒भिश्च॑ (२) शतैः सोमः क्री॑तो भ॒वति॑ सुक्री॒तेन॑ यजते तामप्सु प्रावे॑शय॒न्निन्द्रा॑योदेहीति सा रोहिणी लक्ष्मणा॑ पष्ठौ॒ही वा॒त्रघ्नी॑ रूपं कृत्वा त्र॑यस्त्रिꣳशता च त्रि॒भिश्च॑ शतैः सहो॒दैत्तस्माद्रोहि॑णीं लक्ष्मणां॑ पष्ठौ॒हीं वा॒त्रघ्नी॑ द॒द्याद्य एवं वि॒द्वान्रोहि॑णीं लक्ष्मणा॑ पष्ठौ॒हीं वा॒त्रघ्नी॑ द॒दाति॑ त्र॑यस्त्रिꣳश॒च्चैवास्य त्री॑णि च शतानि सा दत्ता (३) भ॒वति॑ तामप्सु प्रावे॑शय॒न्यमायोदेहीति सा जर॑ती मुखा॑ तं॒ज्जघ॑न्या रूपं कृत्वा त्र॑यस्त्रिꣳशता च त्रि॒भिश्च॑ शतैः सहो॒दैत्तस्माज्ज॒र॑तीं मुखा॑ तं॒ज्जघ॑न्यामनु॒स्तर॑णीं कु॒र्वीत॑ य एवं वि॒द्वाञ्ज॒र॑तीं मुखा॑ तं॒ज्जघ॑न्यामनु॒स्तर॑णीं कु॒रु॒ते त्र॑यस्त्रिꣳश॒च्चैवास्य त्री॑णि च शतानि साऽमुष्मि॑ꣳल्लो॒के भ॒वति॑ वाग॑व संहस्रतमी त॒स्मात् (४) वरो॑ देयः सा हि वरः॑ सहस्र॑मस्य सा दत्ता भ॒वति॑ तस्माद्वरो न प्र॑तिगृह्यः सा हि वरः॑ सहस्र॑मस्य प्रतिगृ॒हीतं॑ भवतीयं॑ वर इति॑ ब्रूयादथान्यां ब्रूया॒दियं॑ ममेति॑ तथा॑ऽस्य तत्सहस्र॒-

मप्रतिगृहीतं भवत्युभयतएनी स्यात्तदाहुरन्यतएनी स्यात्सहस्रं परस्तादेतामिति यैव वरः (५) कल्याणी रूपसमृद्धा सा स्यात्सा हि वरः समृद्ध्यै तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्यान्ते द्रोणकलशमव धरापयेदा जिघ्र कलशं मह्यृधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽविशताद्रायिरिति प्रजयैवैनं पशुभी रय्या सम् (६) अर्धयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तया सहाऽऽग्नीध्रं परेत्य पुरस्तात्प्रतीच्या तिष्ठन्त्यां जुहयादुभा जिग्यथुर्न परा जयथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै त्रिरात्रे सहस्रꣳ साहस्रीमेवैनां करोति सहस्रस्यैवैना मात्रां (७) करोति रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अग्नेये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते (८) ॥

एतदेतस्यां वीर्यमस्य त्रिभिश्च दत्ता सहस्रतमी तस्मादेव वरः मात्रामेकान्नचत्वारिꣳशत्कं) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(सहस्रतम्यभिधानम्)

(अथ सप्तमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽनुवाके त्रिरात्रोऽभिहितः। अथ षष्ठे तत्रत्यां सहस्रतमीं प्रपञ्चयितुमुपाख्यानं दर्शयति—

सोमो वा इति। पुरा कदाचित्सोमो गोसहस्रमलभत। तमनुगम्येन्द्रोऽपि तदेव गोसहस्रमलभत। तौ सोमेन्द्रौ प्रति यमोऽपि भागं निकामयमान आगच्छत्। आगत्य चात्र गोसहस्रे ममापि कश्चिद्भागोऽस्त्वित्यब्रवीत्। तावपि तथाऽस्त्वित्यङ्गीं कुरुतः। आदरार्थः प्लुतः। ततः स यमः परीक्ष्य तस्मिन्सहस्र एकस्यामुत्तमायां गवि सामर्थ्यमपश्यत्। तत इयमेकैवास्य गोसहस्रस्य वीर्यं बिभर्तीति मनसा निश्चित्येयमेव ममास्तु यवयोरितरत्सहस्रमित्यब्रवीत्। ततस्तौ सोमेन्द्रावेवमुक्तवन्तौ सर्वेऽपि वयं मिलित्वैतस्यामुत्तमायां गवि वीर्यं परीक्ष्य तस्यामंशमेकैकं स्वीकुर्म इति विचार्य तथैव कृतवन्तः॥

तत्र सोमस्य प्रथममंशहरणप्रकारं दर्शयति—

तामप्स्विति। ते त्रयोऽपि मिलित्वा तामुत्तमां गां सोमायोदेहीत्येवं ब्रुवन्तोऽप्सु प्रावेशयन्। सोमस्य यद्यावद्रूपं योग्यं तत्तावद्रूपं गृहीत्वा जलादुद्गच्छेत्यर्थः। ततः सा गौरप्सु प्रविष्टा जलादुद्गमनवेलाया तत्सार्थिनं रूपं कृत्वोदगच्छत्। तदेव रूपं स्पष्टी क्रियते—रोहिणी शरीरे लोहितवर्णा पिङ्गलापिङ्गलाक्ष्येकहायन्येकसंवत्सरवयस्का, ईदृशी सती लावण्येपेतं रूपं च कृत्वा गवामन्यासां त्रयस्त्रिंशत्संख्यया शतत्रयसंख्यया च सह जलादुद्गच्छत्। यस्मात्सोमार्थं रोहिण्यादिरूपं धृतवती तस्मादोहिण्यैकहायन्या पिङ्गलाक्ष्या सोमं क्रीणीयात्। तया क्रीतः सोमस्त्रयस्त्रिंशदधिकेन शतत्रयेण क्रीतो भवति। ततः सुक्रीतेन सोमेनासौ यजते॥

अथेन्द्रस्य तदीयांशहरणप्रकारं दर्शयति—

तामिति। पूर्ववद्व्याख्येयम्। लक्ष्मणा शृङ्गपुच्छाद्यवयवसौष्ठवयोग्यलक्षणोपेता। षष्टौही चतुर्वर्षा। वार्द्धुषी दर्शनमात्रेण मानसक्लेशापहन्त्री। यस्मादिन्द्रस्येदृशी प्रियोदैत्तस्मादीदृशीमेव दक्षिणात्वेन दद्यात्॥

अथ यमस्य तदीयांशहरणप्रकारं दर्शयति—

तामप्सु प्रावेशयन्निति। जरती वृद्धा। मूर्खा रोषणशीला। सैव ज-

---

१ क ष ड च. °लक्ष्मणो°।

घन्या तज्जघन्या, इयमेवात्यन्तकुरूपा नान्येत्यर्थः । अनुस्तरणी मृतं पुरुषमनु यां गां हत्वा तदवयवान्प्रेतपुरुषावयवेष्वास्तृणन्ति सेयमनुस्तरणी । सा च जरादिगुणयुक्ता कार्या । *त(अ)स्याऽऽस्तरणेन परलोके त्रयस्त्रिंशदधिकगोशतत्रयं संपद्यते । शेषं पूर्ववत् । अत्र कयदानानुस्तरणीविधयः प्रासङ्गिकाः ॥

एवमाख्यायिकया सहस्रतमीं प्रशस्याथ प्रकारान्तरेण प्रशंसति—

वाग्वेवेति । येयं सहस्रतमी सोमार्घ्यर्थे रूपत्रयं स्वीकृत्य जलादुद्गता सा वाग्देवतैव । यस्मादस्या वाग्देवतैव(ता)रूपं(पत्वं) तस्मात्सहस्रदक्षिणे यागे वाग्देवतात्वसंपादनाय श्रेष्ठ एव गोविशेषो देयः । यस्मात्सहस्रतमी श्रेष्ठो गोविशेषस्तस्माच्छ्रेष्ठे दत्ते सत्यस्य यजमानस्य सहस्रस्वरूपा सा सहस्रतमी दत्ता भवति । यस्माच्छ्रेष्ठो गोविशेषः सहस्रासदृशस्तस्माच्छ्रेष्ठं गोविशेषं न प्रतिगृह्णीयात् । तत्प्रतिग्रहे सति गोसहस्रप्रतिग्रहदोषो भवेत् । अथ कथंचित्प्रतिगृह्णीयात्तर्हीमेवं निर्दिशेत्—श्रोऽयं वरः सेयं सहस्रतमीति । एवं निर्दिश्याथान्या प्रत्येवं ब्रूयात्—इयं वरव्यतिरिक्ता ममेति । एवं निर्देशे सति वरप्रतिग्रहेऽपि सहस्रप्रतिग्रहदोषो न भवति ॥

इत्थं सहस्रतमीं बहुधा प्रशस्य तस्या दातव्याया लक्षणं विधत्ते—

उभयतएनीति । उभयोः पार्श्वयोः शुक्लरेखा यस्याः सेयमुभयतएनी ॥

अथ प्रकारान्तरेण लक्षणं विधत्ते—

तदाहुरिति । तस्मिन्सहस्रतमीविषयेऽभिज्ञा एवमाहुः—अन्यतरस्मिन्नेव पार्श्वे शुक्लरेखा पर्याप्ता । तत्रोपपत्तिं चैवमाहुः—एतं परस्तात्सहस्रमेतस्य गोविशेषस्य परभागे गोसहस्रं तिष्ठत्यतो न तत्र शुक्लरेखाऽपेक्षितेति ॥

अथ सहस्रतमीप्रतिनिधित्वेन पक्षान्तरं विधत्ते—

यैवेति । या गौः कल्याणी बहुक्षीरादिगुणवती रूपसमृद्ध्यै(द्धा)समीचीनशृङ्गपुच्छाद्युपेता सैवात्र वरो दातव्यो गोविशेषः स्यात् । तद्दानेनैव समृद्धिर्भवति ॥

दातव्यायास्तस्या गोराघ्रापणं विधत्ते-

---

* सर्वपुस्तकेषु 'तस्यास्तरणेन' इति वर्तते, पर त्वत्र पदच्छेदविषये सदेहः । अतः श्रौत्यनुकूलतया 'अस्याऽऽस्तरेणेन' इति स्थापितम् 'अस्यापि शेषपूरणेनार्थो ज्ञेयः ।

१ ख. °रणी मृ° । २ ख च. ' स्माद्वाग्दे° । ३ ख. °द्धा तामे° ।

(सहस्रतम्याभिधानम्)

तामुत्तरेणेति। अग्नीधः शरणमाग्नीध्रं तस्योत्तरभागे तां दातव्यां गां प्रदक्षिणत्वेनाऽऽनयिाऽऽहवनीयस्य समीपे द्रोणकलशस्थितं सोमपवघ्रापयेत् ॥

तस्मिन्नाघ्रापणे मन्त्रमुत्पादयति—

आ जिघ्र कलशमिति। महीति गोर्नाम ल(व)क्षयते । हे महि त्वं द्रोणकलशं सर्वतो जिघ्र। कीदृशी त्वम्, उरुधारा दीर्घक्षीरधारोपेता। पयस्वती बहुलक्षीरोपेता। तादृशीं त्वामिन्दवः सोमबिन्दव आविशन्तु। यथा समुद्रं सिन्धवः प्रविशन्ति तद्वत् । सा त्वं मामस्मिन्गोसहस्र आभज सर्वतः प्रापय। तथा रायिधनं प्रजया पशुभिश्च सह मां पुनराविशतु ॥

आघ्रापणस्य फलं दर्शयति—

प्रजयैवैनमिति। वेदनं प्रशंसति—

प्रजावानिति। अथ तदङ्गभूतं कंचिद्धोमं विधत्ते—

तयेति। आहवनीयसमीपे स्थितया तया गवा सह पुनराग्नीध्रसमीपे प्रत्यागत्य तस्याऽऽग्नीध्रस्य पूर्वभागे प्रत्यङ्मुखत्वेन गवि स्थितायां जुहुयात् ॥

होमाङ्गभूतं मन्त्रं दर्शयति—

उभा जिग्यथुरिति। हे इन्द्राविष्णू युवामुभौ जिग्यथुः सर्वत्र जितवन्तौ, न पराजयेथे क्वापि पराजयं न प्राप्नुथः। एमेरेनयोरुभयोर्मध्ये कतरश्चनैकोऽपि न पराजिग्ये पराजयं न प्राप्तवान्। हे विष्णो त्वमिन्द्रश्चोभौ यद्यस्पृधेथां यदा परस्परं स्पर्धितवन्तौ तदा गोसहस्रं त्रेधा विभज्यैरयेथामिन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवं प्राप्तवन्तौ ॥

त्रेधा सहस्रमिति मन्त्रभागस्य तात्पर्यं दर्शयति—

त्रेधाविभक्तामिति। त्रिरात्रारूढे यागे गोसहस्रं दिनत्रयार्थं त्रेधा विभक्तव्यमिति यत्तेनैनां सहस्रतमीमेव गां साहस्रीं सहस्रोपेतां करोति, न केवलं सहस्रोपेता किंतु तस्य सहस्रस्य यावती मात्रा तावन्मात्रोमैवैनां करोति ॥

अथैतदङ्गभूतं होमान्तरं विधत्ते—

रूपाणीति। रोहिणी पिङ्गलैकहायनीत्यादीनि यानि रूपाण्युक्तानि तानि जुहुयात्। रोहिण्यै स्वाहेत्यादयो मन्त्रास्तत्रोन्नेयाः। एतस्मिन्होमे कृते सत्यपेक्षितै रूपैरेवैनां गां समृद्धां करोति ॥

अथैतदङ्गभूतं जपं विधत्ते—

(सहस्रतमीदानविधिः)

तस्या उपोत्थायेति । तस्या गोः कर्णसमीपं प्रत्युपस्थितो भूत्वा वक्ष्यमाणं मन्त्रं जपेत् ॥

तमिमं मन्त्रं दर्शयति—

इडे रन्तेऽदिति इति । केनापि न हन्यत इत्यघ्निया गौः । हेऽघ्निये, इडादीनि तव नामानि । अतस्तैर्नामभिरिह संबोध्यते । एतादृशी त्वं देवेषु मध्ये मां यजमानं सुकृत पुण्यकृतं ब्रूहि ॥

मन्त्रस्य तात्पर्यं दर्शयति-

देवेभ्य इति । एतन्मन्त्रपाठेनेयं गौर्देवेभ्य एवैनं यजमानमावेदयति । ते च देवा एनं यजमानं पुण्यकारिणं जानन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः)

सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनꣳ सुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तं लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान्पुण्याँल्लोकान्गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान्गमयति सा (१) मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽ विशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रतिष्ठापयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दयात्सहस्रामस्य सा दत्ता भवति सहस्रामस्य प्रतिगृहीतं भवति यस्तामविद्वान् (२) प्रतिगृह्णाति

(सहस्रतमीदानविधिः)

तां प्रति गृह्णीयादेकोऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न सहस्रमेकां मा भूताऽऽविश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं वेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा माऽऽविश ३) इत्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशति नैनꣳ हिनस्ति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रातम्यन्वेती३ सहस्रतमीꣳ सहस्रा३मिति यत्प्राचीमुत्सृजेत्सहस्रꣳ सहस्रतम्यन्वियात्तत्सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात्प्रतीचीमुत्सृजति ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति यजमानमभ्युत्सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान्गच्छति (४)॥

(लोकान्गमयति साऽविद्वान्त्सुशेवा माऽऽ विंश यजमानं द्वादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः)।

षष्ठेऽनुवाके सहस्रतमीं प्रशस्य तदङ्गभूतं होमादिकमुक्तम्। अथ सप्तमे तद्दानं विधीयते ॥

तत्र यदुक्तं सूत्रकारेण 'तां यजमानोऽभिमन्त्रयते सा मा सुवर्गं लोकं गमयेति' इति, तानेतान्सहस्रतम्या अनुमन्त्रणमन्त्रांश्चतुरो ह्युत्पाद्य[1] व्याचिख्यासुः प्रथममन्त्रतात्पर्यं दर्शयति—

---

१ ख. व्युत्पाद्य।

(सहस्रतमीदानविधिः)

सहस्रतम्येति । यजमानोऽयं सहस्रतम्या गवा स्वर्गं लोकं प्राप्नोति । सा ह्येनं प्रापयति । तस्मादेता मेत्यादिमन्त्रं पठेत् । हे सहस्रतमि सा त्वं मां स्वर्गं लोकं प्रापयेति तस्यार्थः । तेन सा स्वर्गं प्रापयत्येव ॥

एवमुत्तरेषां त्रयाणामपि मन्त्राणां क्रमेण तात्पर्यं दर्शयति—

सा मेति । ज्योतिष्मानादित्यलोकः । इन्द्रलोकादयः पुण्याः । प्रतिष्ठां स्थिरावस्थानम् । प्रजया पशुभिश्च सह रायिर्धनं पुनर्मा प्रविशतु ॥

वेदनं प्रशंसति—

प्रजावानिति । तस्याः सहस्रतम्या दानं विधत्ते—

तामग्नीध इति । अथ प्रतिग्रहदोषपरिहाराय तत्प्रतिग्रहमन्त्रं विधत्ते—

सहस्रमस्येति । यो मन्त्रमविद्वान्सहस्रतमीं प्रतिगृह्णीयादस्य गोसहस्रं प्रतिगृहीतं भवति, तावान्प्रत्यवाय इत्यर्थः। अत एकाऽसीत्यादिमन्त्रेण तां सहस्रतमीं प्रतिगृह्णीयात् । मन्त्रार्थस्तु—सहस्रतमी त्वमेकैव गोरसि नतु सहस्रम् । अतस्त्वामेकामेवं भूतां प्रतिगृह्णामि न तु सहस्रं, त्वमप्येकैव भूता मां प्रविश, सहस्रं भूत्वा मा प्रविश । इतिशब्दो मन्त्रसमाप्त्यर्थः ॥

मन्त्रवेदनं प्रशंसति—

एकामेवैनामिति । अथ प्रतिग्रहादूर्ध्वं जप्य मन्त्रमुत्पाद्य तात्पर्यं दर्शयति—

स्योनाऽसीति । हे सहस्रतमि त्वं स्योना सुखप्रदा सुषदा दोहनादिकाले सुखेन प्राप्तुं शक्या सुशेवा कण्डूयनादिना सुखेन सेवितुं शक्या चासि । अतस्तथाविधैव भूत्वा मां प्रविश । एतन्मन्त्रपाठेन तथैव भूत्वा प्रविश्य सर्वप्रकारेणाप्येनं न हिनस्ति ॥

अथान्वयव्यतिरेकाभ्यां प्रत्यङ्मुखत्वेनोत्सर्जनं विधत्ते—

ब्रह्मवादिन इति । किं गोसहस्रस्य पुरतो गमनं किं वा सहस्रतम्याः पुरतो गमनमिति ब्रह्मवादिनां विचारः । तत्र यदि प्राङ्मुखीमेनामुत्सृजेत्तदानीं पुरतो गोसहस्रे गच्छति सति पश्चादियं गच्छेत् । तदानीं प्रज्ञानरहितं गोसहस्रं स्वर्गं न जानीयात् । तस्मात्तत्परिहाराय प्रत्यङ्मुखीमेनामुत्सृजेत् । तदानीं पुरतो गच्छन्तीं तां सहस्रतमीमनु पृष्ठतो गोसहस्रं गच्छति । सा च सहस्रतमी मार्गाभिज्ञा सती स्वर्गं प्राप्नोति ॥

(आत्रेयचतूरात्राभिधानम्)

यदुक्तं सूत्रकारेण—'तां शतमानेन हिरण्येन निष्क्रीय यजमानस्य गोष्ठे विसृजति' इति, तदेतद्विवृत्ते——

यजमानमिति। ऋत्विग्भ्यो निष्क्रीतां तां सहस्रतमीं यजमानगृहाभिमुख्येनोत्सृजेत्। तथा सति यजमानगृहे तत्र एव काले सहस्रमुत्पद्यते। इयं च सहस्रतमी दक्षिणानयनकाले चरमा सती नीयते। स्वर्गप्राप्तिकाले प्रथमा सती यजमानेन सह देवान्गच्छति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके प्रथमप्रपाठकेऽष्टमाऽनुवाकः)।

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुभंभेयो य एवं विद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता सूद्गाता स्वध्वर्युः सुभंभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं तत्(१) य उद्यन्तः स्तोमाः श्रीः साऽत्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन्तेजं इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान्सोमानपश्यत्तानाऽहरत्तैरयजत तेज एव प्रथमेनावारुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं विद्वाꣳश्चतुरश्चतुष्टोमान्सोमानाहरति तैर्यजते तेज एव प्रथमेनाव रुन्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं

(आत्रेयचतूरात्राभिधानम्)

चतुर्थेन यामेवात्रिर्ऋद्धिमार्ध्नोत्तामेव यजमान ऋध्नोति (२) ॥

(तत्तेज एवाष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमे सहस्रतमीदानमुक्तम् । तावता पञ्चममारभ्य त्रिष्वनुवाकेषु गर्गत्रिरात्रः समापितः । अथाष्टमनवमयोर्द्वौ चतूरात्रावुच्येते ॥

तत्राद्येश्चतूरात्रमष्टमेऽभिधत्ते--

अत्रिरददादिति । उर्वस्य पुत्र और्वः । स च पुत्रकामोऽत्रिं याचितवान् । तस्मै सोऽत्रिः स्वकीया प्रजां ददौ । ततः प्रजारहित्येन रिक्तः सन्मनस्येवममन्यत--अहं निर्वीर्यः प्रजोत्पादनसामर्थ्यरहितः, शिथिलः कार्येष्वक्षमः, यातयामा गतसारश्चास्मीति विचार्य प्रजोत्पादनसाधनं चतूरात्रं निश्चित्य तत्सामग्रीमाहृत्य तेनायजत । तस्य सुहोत्रादयश्चत्वारः पुत्रा उत्पन्नाः । ते च होत्र औद्गात्र आध्वर्यवे यज्ञप्रयोगोपदेशे च कुशलाः । अतोऽन्येऽपि चतूरात्रेणेष्ट्वा तादृशान्पुत्रान्लभन्ते ॥

अत्र बहिष्पवमानमाध्यंदिनपवमानाभ्यांपवमानेषु त्रिष्वपि स्तोमविशेषं विधत्ते--

ये चतुर्विꣳशा इति । चतुर्विंशतिसंख्यया यत्र स्तोत्रिया ऋच आवृत्ताः स स्तोमश्चतुर्विंशः । तादृशेन स्तोमेन युक्ता ये पवमानास्ते कर्तव्याः । तथा सति तत्पवमानत्रयं सर्वं ब्रह्मवर्चस्वरूपं भवति । चतुर्विंशतिसंख्याया गायत्रीजपादिना ब्रह्मवर्चसहेतुत्वात् ॥

अथ पवमानव्यतिरिक्तस्तोत्रेषूत्तरोत्तरस्तोमवृद्धिं विधत्ते--

य उद्यन्त इति । उत्तरोत्तरमुत्कर्षं मच्छन्तः स्तोमा उद्यत्स्तोमाः । तादृशा ये सन्ति सैव श्रीः । तद्धेतुत्वेन तेषां श्रीत्वम् । अभिवृद्धिप्रकारः कथ्यते--सन्ति त्रिवृत्पञ्चदशसप्तविꣳशत्रिणवत्रयस्त्रिꣳशाख्याः षट्स्तोमाः । तत्र

---

१ च. °सख्यया गायत्रीछन्दसा च ग्र° । २ ख. °यज्या ब° । ३ क. ग. ङ. °मवि-शेष त्रि° ।

(जामदग्न्यच रात्राभिधानम्)

प्रथमेऽह्नि प्रातःसवनं त्रिवृत्स्तोमयुक्तम्। माध्यंदिनं सवनं पञ्चदशस्तोमयुक्तम्। तृतीयसवनं सप्तदशस्तोमयुक्तम्। अथ द्वितीयेऽह्नि त्रिवृतं परित्यज्यैकविंशं स्तोमं स्वीकृत्य पञ्चदशसप्तदशैकविंशैः सवनत्रयं निष्पाद्यम्। तृतीयेऽह्नि सप्तदशैकविंशत्रिणवैः। चतुर्थे त्वहनि एकविंशत्रिणवत्रयस्त्रिंशैः। तदिदमुद्यत्स्तोमत्वम्॥

तामिमं चतूरात्रविकारं प्रशंसति—

अत्रिः श्रद्धादेवामिति। श्रद्धादेवो यस्यासौ श्रद्धादेवः। यथा देवतायामादरस्तथा श्रद्धायामित्यर्थः। तादृशोऽत्रिर्यजमानः सर्वदा यागान्करोति। तथाविधं यजमानं तेज आदीनि न प्राप्नुवन्। तेजः शरीरकान्तिः। इन्द्रियं चक्षुरादिशक्तिसामर्थ्यम्। ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः। अन्नाद्यं स्वादन्नसंपत्तिः। एकैकस्मिन्नहनि पवमानेषु चतुर्विंशस्तोमः। पवमानत्रयार्थमुक्तरीत्या त्रिवृदादयस्त्रयः स्तोमाः। एवं चतुर्ष्वपि दिनेषु चतुष्टोमाश्चत्वारः सोमयागास्तदनुष्ठानेनात्रिस्तेजआदिकमलभत॥

पूर्वं चतूरात्रेणायजतेति कृत्स्नः क्रतुर्विहितः। इदानीं क्रत्ववयवांश्चतुरहर्विशेषान्विधत्ते—

य एवामिति। तेज एव प्रथमेनेत्यादेरुक्तस्यैव संग्रहार्थं यामेवेत्यादिपुनर्वचनम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमाष्टके प्रथमप्रपाठके नवमोऽनुवाकः)।

जमदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान्पोषाꣳ अपुष्यत्तस्मात्पलितौ जामदग्नियौ न संजानाते एतानेव पोषान्पुष्यति य एवं विद्वाꣳश्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति

---

१ च. °त्रका°।

पशवो वै पुरोडाशः पशूनेवाव रुन्धेऽन्नं वै पुरो-
डाशोऽन्नमेवाव रुन्धेऽन्नादः पशुमान्भवति य एवं
विद्वाꣳश्चतूरात्रेण यजते (१) ॥

(जमदग्निरष्टाचत्वारिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके चतूरात्र आग्नेयो निरूपितः । अथ नवमे जामदग्न्यश्चतूरात्रो निरूप्यते ॥

तमिमं विधातुं प्रस्तौति--

जमदग्निरिति । एतां श्लोकपसिद्धान्प्रजापशुधनपोषानपुष्यत्संपादितवान् । यस्मादेव जमदग्निः पुष्टिहेतुयागपवर्तकस्तस्माज्जामदग्नियौ तदंशोत्पन्नौ द्वौ पितृपुत्रौ पुष्टिमन्तरेण वृथैव पलितौ दरिद्रौ न जानाते नोत्पद्येते । यद्वा वृथैव पलितं स्वकीयं देहं न जानाते । अयमर्थः--पुष्टिसंपदायस्य जमदग्निना प्रवर्तितत्वात्तद्वंशे कोऽपि दरिद्रो नास्ति । यदि कश्चित्प्रमादात्स्यात्तथाऽपि नैरन्तर्येण द्वौ पुरुषौ पुष्टिमन्तरेण वृथा पलितौ न स्त एवेति ॥

अथ विधत्ते--

एतानेवेति । अत्रोपसत्सु कांचिद्विशेषं विधत्ते--

पुरोडाशिन्य इति । पुरोडाश आसूपसत्स्वस्तीति पुरोडाशिन्यः । द्वादशसूपसत्सु द्वादश पुरोडाशविशेषान्सूत्रकारो दर्शयति--' आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौर्यश्चतुष्कपालः सावित्रः पञ्चकपालो धात्रः षट्कपालो मारुतः सप्तकपालो बार्हस्पत्योऽष्टाकपालो मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादशकपालो वैश्वदेवो द्वादशकपालो दर्विहोमा भवन्ति ' इति । पुरोडाशानां पशुहेतुत्वादन्नहेतुत्वादन्नरूपत्वाच्च तदुभयप्राप्तिः ॥

एतद्वेदनपूर्वकमनुष्ठानं प्रशंसति--**अन्नाद इति** ।

(पञ्चरात्राभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके दशमोऽनुवाकः)।

संवत्सरो वा इदमेक आसीत्सोऽकामयतर्तून्त्सृजेयेति स एतं पञ्चरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान्पञ्चरात्रेण यजते प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते व्यावर्तन्त (१) य एवं विद्वान्पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽ वर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्त्स्यामिति स एतं पञ्चरात्रमाऽहरत्तेनायजत ततो वै स सहस्रं पशून्प्राऽऽप्नोद्य एवं विद्वान्पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमा (२) अहरत्तेनायजत ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष संप्रति यज्ञो यत्पञ्चरात्रो य एवं विद्वान्पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवत्सरः (३) ऋतुष्वेव संवत्सरे प्रति तिष्ठत्यथो पञ्चा-

(पञ्चरात्राभिधानम्)

क्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (४) ॥

(ते व्यावर्तन्त प्रवदिता स्यामिति स एतं पञ्चरात्रमासंवत्सरोऽभिजित्यै)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः)

नवमेऽनुवाके जामदग्न्यचतूरात्र उक्तः । अथ दशमे पञ्चरात्रोऽभिधीयते ॥ तमिमं विधत्ते--

संवत्सरो वा इति । इदं वसन्ताद्यृतुभेदोपेतं कालस्वरूपमृतूत्पत्तेः पूर्वं संवत्सरात्मक एक एव प्रजापतिरासीत् । स ऋतून्सिसृक्षुस्तत्साधनत्वेन पञ्चरात्रयागमनुष्ठाय सृष्टवान् । एवमन्योऽपि प्रजाकामस्तेन यागेन प्रजामुत्पादयति ।

अथ व्यावृत्तिकामस्य तमेव विधत्ते--

त ऋतव इति । प्रजापतिना सृष्टा वसन्ताद्यृतुदेवास्तत्तदृतुलिङ्गविशेषैर्व्यावृत्तिमलभमानास्तत्साधनत्वेन पञ्चरात्रमनुठाय तत्तदृतुलिङ्गैर्व्यावृत्तिं प्राप्ताः । एवमन्योऽप्यनुष्ठाय पाप्मना भ्रातृव्येण च वियोगं प्राप्नोति ॥

अथ पशुप्राप्त्यर्थं तमेव विधत्ते--

सार्वसेनिरिति । सर्वसेनाख्यस्य पुरुषस्यापत्यं सार्वसेनिः । शुच्याख्यायाः स्त्रिया अपत्यं शौचेयः ॥ अथ समायां वक्तृत्वविशेषं कामयमानस्य तमेव पञ्चरात्रं विधत्ते--

(पञ्चरात्राभिधानम्)

बबर इति। बबरो नामतः, प्रवाहणस्यापत्यं प्रावाहणिः। बबरवदन्योऽपि पञ्चरात्रेण सभायां प्रकर्षेण वक्ता भवति। तदीयं वक्तृत्वमनुमोदमानाः सर्वे सभ्यास्तं वाचस्पतिरित्येवं व्यवहरन्ति॥

एवं बहुविधफलसाधनत्वेन पञ्चरात्रं विधाय न्यूनातिरेकाभावेन तं प्रशंसति—

अनाप्त इति। एकेनाहना न्यूनत्वाच्चतुरात्रो नोक्तेभ्यः फलेभ्यः पर्याप्तः। पञ्चभिरेकाहोभिस्तत्फलनिर्वृत्तेरेकेनाहना षड्रात्रोऽतिरिक्तः। एष पञ्चरात्रः संपति समीचीनो न्यूनातिरेकाभावेन योग्यः। अत एतदनुष्ठायी योग्येनैव यज्ञेनेष्टवान्भवति॥ अथाहर्गतां पञ्चसंख्यां प्रशंसति—

पञ्चरात्र इति। हेमन्तशिशिरयोः समासादहूनां पञ्चत्वम्॥

अथ पञ्चरात्रावयवभूतानि पञ्चाहानि विधत्ते—

त्रिवृदग्निष्टोम इति। प्रकृतौ हि त्रिवृत्पञ्चदशसप्तदशैकविंशैश्चतुर्भिः स्तोमैरग्निष्टोमगतानि द्वादश स्तोत्राणि निष्पाद्यन्ते। अत्र त्वेकेनैव त्रिवृत्स्तोमेन सर्वस्तोत्रनिष्पत्तिः। तादृशोऽग्निष्टोमः प्रथममहः। त्रिवृदग्न्योरुभयोर्मुखेन सहोत्पन्नत्वात्त्रिवृता तेजःप्राप्तिः। पञ्चदशेनैकेनैव स्तोमेन युक्त उक्थ्यो द्वितीयमहः। पञ्चदशस्तोमस्येन्द्रस्य चोरौ बाहुषु सहोत्पन्नत्वात्पञ्चदशेनेन्द्रियप्राप्तिः। सप्तदशेनैकेन स्तोमेन युक्त उक्थ्यस्तृतीयमहः। सप्तदशस्यान्नाधारे मध्यप्रदेश उत्पन्नत्वात्तेनान्नप्राप्तिः। अपि च सप्तदशस्य प्राजापत्यत्वात्तेन प्रजोत्पादकत्वमपि भवति। यद्यप्युभयत्रोक्थ्यो न श्रुतस्तथाऽप्यहीनानामेतेषां द्वादशाहविकृतित्वाद्द्वादशाहे च प्रायणीयानन्तरभाविनः पृष्ठ्यषडहस्य पञ्चरात्रप्रकृतित्वात्पृष्ठ्यषडहे च द्वितीयतृतीययोरुभयोरुक्थ्यत्वात्तद्विकृतिरूपयोरनयोरप्यहन्नोरुक्थ्यत्वं लभ्यते। एतदेवाभिप्रेत्य बौधायनेनोक्तम्- तस्याहानि त्रिवृदग्निष्टोमः पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चविंशोऽग्निष्टोमो महाव्रतवान्विश्वजित्सर्वपृष्ठोऽतिरात्रः' इति। चोदकप्राप्तानामपि त्रयाणामेतेषामहनां विस्पष्टार्थं पुनर्विधानम्। पञ्चविंशेनैकेनैव स्तोमेन युक्तोऽग्निष्टोमश्चतुर्थमहः। यद्यपि त्रिवृदादिस्तोमवत्सामन्ब्राह्मणे पञ्चविंशस्तोमो नाऽऽम्नातस्तथाऽपि सूत्रकारोक्तप्रकारेण स स्तोम उन्नेयः। अस्य च स्तोमस्य प्रजापतिदेवताकत्वात्तेन तत्प्राप्तिः। स चाग्निष्टोमो महाव्रतधर्मवान् गवामयने महाव्रताख्यमेकमहः। तस्मिन्नहनि यानि स्तोत्राणि तान्यत्र प्रयोक्तव्यानीत्यर्थः। महाव्रतस्यान्नसाधनत्वात्तेनान्नप्राप्तिः।

विश्वजिन्नामाऽग्निष्टोमविकारः कश्चिदेकाहः । सोऽत्रातिरात्रविकृतित्वमापादितः पञ्चममहर्भवति । स पुनः सर्वपृष्ठो रथंतरबृहद्वैरूपवैराजशाक्वररैवतारव्यानि पृष्ठस्तोत्रगतानि सामानि सर्वाण्यपि यस्यासौ सर्वपृष्ठः । स च सर्वस्य फलस्याभिजित्यै संपद्यते ॥

अथ मीमांसा ।

अष्टमाध्यायस्य प्रथमपादे दशमाधिकरणे चिन्तितम्-

अहर्गणेषु सोमस्य द्वादशाहस्य वाऽग्निमः ।
पूर्ववद्दिनसंघादिविशेषैरन्तिमो भवेत् ॥

द्विरात्रमारभ्य शतरात्रपर्यन्तेषु अहर्गणेषु गवामयने च पूर्ववदव्यक्तलिङ्गेन सोमस्य धर्मा इति चेन्न । विशेषलिङ्गसद्भावात् । द्वादशाहपदान्तर्गतोऽहःशब्दः षष्टिघटिकात्मकदिनपरः । द्विरात्रादिपदान्तरगतो रात्रिशब्दश्च तादृशः । एतदेक विशेषलिङ्गम् । अहःसंघो द्वितीयं, दादश दीक्षास्तृतीयं, तच्च गवामयने विद्यते । तत्र ह्यभीन्धत एव दीक्षाभिरित्युक्त्वा दीक्षाद्युग्मानि(णि) षडुपन्यस्तानि--' द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वच द्वाभ्यामसृग्द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रम् ' इति । तस्मादहर्गणेषु द्वादशाहस्य धर्माः ॥

प्रथमाध्यायस्य तृतीयपादे पञ्चमाधिकरणे चिन्तितम्-

लौकिको वाक्यगो वाऽर्थस्त्रिवृदादेः समत्वतः ।
उभौ विध्यर्थवादैकवाक्यत्वादस्त्विहान्तिमः ॥

त्रिवृद्बर्हिष्पवमानमिति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोके प्रसिद्धोऽर्थः । वाक्यशेषादृक्त्रयात्मकेषु त्रिषु सूक्तेष्ववस्थितानां बर्हिष्पवमानस्तोत्रनिष्पादनक्षमाणामुपास्मै गायता नर इत्यादीनामृचां नवकमर्थः । तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पदपदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्पेन ग्रहीतव्याविति चेन्नैवम् । लौकिकार्थस्वीकारपक्षे विधिवाक्येऽर्थस्त्रैगुण्यम्, अर्थवादवाक्ये स्तोत्रियाणामृचां नवकमित्येव विध्यर्थवादवाक्ययोर्वैयधिकरण्यादेकवाक्यत्वं न स्यादत एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः ॥

दशमाध्यायस्य षष्ठपादे सप्तमाधिकरणे चिन्तितम्-

(पञ्चरात्राभिधानम्)

त्रिवृदग्निष्टुदित्येतत्सर्वत्र स्तोम एव वा ।
आद्यस्त्रैगुण्यवाचित्वादन्त्यः स्तोमेऽस्य रूढितः ॥

एवं श्रूयते—'त्रिवृदग्निष्टुदग्निष्टोमः' इति । किं त्रिवृत्त्वमग्निष्टुति क्रतौ सर्वेषु साधनेषु संपद्यते, किं वा स्तोममात्रसंबन्धि । तत्र त्रिवृदज्जुरित्यादौ त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वदर्शनादत्रापि क्रतुसाधनेषु या या संख्या श्रूयते सा सर्वा त्रित्वेन विक्रियत इति प्राप्ते ब्रूमः—यद्यपि त्रिवृच्छब्दोऽवयवप्रसिद्ध्या लोके त्रैगुण्यं ब्रूते तथाऽपि वेदे रूढया स्तोमवाची । त्रिवृद्बहिष्पवमानेभित्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रमणादत्र स्तोमविषयमेव त्रिवृत्त्वम् ॥

सप्तमाध्यायस्य तृतीयपादे तृतीयाधिकरणे चिन्तितम्—

विश्वजित्सर्वपृष्ठः किमनुवादो रथंतरम् ।
बृहता वा समुच्चेयं यद्वा षाडहिकानि षट् ॥
अतिदेश्यानि तत्राऽऽद्यो माहेन्द्रादिचतुष्टये ।
पृष्ठशब्दाच्चोदकेन सर्वेषामिह संभवात् ॥
समुच्चयो वा विधये सर्वत्वं बहूवपेक्षया ।
न तु द्वयोरतः षण्णां पृष्ठानामतिदेशनम् ॥

"विश्वजित्सर्वपृष्ठो भवति" इति श्रूयते । तत्र सर्वपृष्ठशब्दोऽनुवादः । कुतः, प्राप्तत्वात् । तथा हि ज्योतिष्टोमे माध्यंदिनपवमानानन्तरभावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति । 'अभि त्वा शूर नोनुमः' 'कया नश्चित्र आभुवत्' 'तं वो दस्ममृतीषहं' 'तरोभिर्वो विदद्वसुम्' इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदशस्तोमतामापाद्य गीयन्ते । एकस्मिन्सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधानेन सप्तदशवाऽभ्यासः सप्तदशस्तोमः । तादृशेषु स्तोत्रेषु पृष्ठशब्दः श्रूयते—'सप्तदशानि पृष्ठानि' इति । तानि चत्वारि पृष्ठानि विश्वजिति चोदकप्राप्तत्वात्सर्वपृष्ठशब्देनानूद्यन्त इत्याद्यः पक्षः । रथंतरपृष्ठबृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्पप्राप्तौ सर्वशब्देन समुच्चयो विधीयते । तथा सत्यनुवादकृतं वैयर्थ्यं न भविष्यतीति द्वितीयः पक्षः । सर्वत्वं बहुषु मुख्यं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट्संख्या-

१ च. °न इत्यु° । २ क. घ. ङ च. स्तोत्रवि° । ३ क. घ. ङ °नि चो° । ४ क. घ. ङ. च. °वकत्वेन । ५ ख. च. भवती° ।

कानि पृष्ठान्यतिदिश्यन्ते । षडहे प्रतिदिनमेकैकं पृष्ठं विहितम् । तानि च षट्-पृष्ठानि रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामभिर्निष्पाद्यानि । यद्यपि विश्वजित एकाहत्वाज्ज्योतिष्टोमविकृतित्वमेव नतु षडहविकृतित्वं, तथाऽपि सर्वपृष्ठोक्तिब-लात्तानि षट्पृष्ठान्यतिदिश्यन्ते ॥

दशमाध्यायस्य षष्ठे पादे पञ्चमाधिकरणे चिन्तितम्—

किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा ।
पृष्ठशब्दात्पृष्ठदेशे वचनात्तु व्यवस्थितिः ॥

इदमाम्नायते—'विश्वजित्सर्वपृष्ठः' इति । षडहे षट्स्वहःसु क्रमेण रथं-तरबृहद्वैरूपमित्यादिभिः षड्भिः सामभिः पृष्ठस्तोत्रं निष्पादितम् । तानि सर्वाणि पृष्ठसामानि यस्मिन्विश्वजिति सोऽयं सर्वपृष्ठः । तत्र माध्यंदिनपवमानमैत्रावरुण-साम्नोरन्तरालरूपे पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठसामानि कार्याणि, किंवा यथा-वचनं देशव्यवस्थेति संशयः । पृष्ठकार्यगमकेन(ण)पृष्ठशब्देन पृष्ठदेशे प्राप्ते वचनेन देशविशेषो व्यवस्थाप्यते । वचनं चैवमाम्नायते—'पवमाने रथंतरं करोत्यार्भवे बृहन्मध्यत इतराणि वैरूपं हेतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसाम' इति । वचनं हि न्यायाद्बलीयः । तस्मा-द्देशविशेषा व्यवस्थिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके एकादशोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य सामन्त्सरमारपन्ती । अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यन्ता रा.ड्यं-

१ क. ख. °शेषे व्य° । २ ख. व्यवस्थितिः ।

(अश्वमेधमन्त्रकथनम्)

न्ताऽसि यमनो धर्ताऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाऽदभ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः (१) ॥

(धरुणः पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाके पञ्चरात्रो वर्णितः। अथात्राहीनविशेषानवस्थाप्यैकादशमारभ्य प्रपाठकसमाप्तिपर्यन्तमश्वमेधमन्त्रा उच्यन्ते। तेषां यथासंभवं ब्राह्मणग्रन्थोक्ता विनियोगा उदाहियन्ते। तत्र ब्राह्मणवाक्यमेवं पठ्यते—' देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै '। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै। व्युदं वा एतद्यज्ञस्य। यदयजुष्केण क्रियते ' इति ॥ मन्त्रपाठस्तु—

देवस्य त्वेति। हे रशने सवितुर्देवस्य प्रेरणे सत्यश्विसंबन्धिभ्यां बाहुभ्यां पूषसंबन्धिभ्यां हस्ताभ्यां त्वामाददे ॥

अथ ब्राह्मणम्—' इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै ' इति ॥ पाठस्तु—

इमामगृभ्णन्निति। विदथेषु यज्ञेषु आयुषि यजमानायुर्निमित्ते पूर्वे कृष्या कवयो विद्वांस ऋत्विज ऋतस्य यज्ञस्य संबन्धिनीमिमां रशनामगृभ्णन्स्वीकृतवन्तः। तया रशनया देवाः सर्वे सुतमाबभूवुरश्वबन्धनद्वारा तस्मिन्नश्वमेधे प्रधानभूतं त्रिरात्राख्यं सोमयागमभितः प्राप्नाः। कीदृशी रशना, ऋतस्य यज्ञस्य सामन्सामनि समाप्तौ निमित्तभूतायां सत्यां सरं सरणं प्रवृत्तिमारभन्ती कथयन्ती। हे ऋत्विग्यजमानाः शीघ्रं यज्ञं समापयतेति वदन्ती सेयं रशना लक्ष्यते, स्वकीयदीर्घत्वेनाश्वबन्धनयोग्यत्वदर्शनात् ॥

---

१ ख. घ. च. °त्यै ' इ°। २ ख. चेयं।

(अश्वमेधमन्त्रकथनम्)

कल्पः—' अभिधा असीत्यश्वमभि दधाति ' इति ॥

पाठस्तु—

अभिधा इति । अभिधीयते धार्यते बध्यत इत्यभिधाः, हेऽश्व त्वं तादृशो बध्यमानोऽसि । तथा भुवनादिरूपोऽसि । तव प्राजापत्यत्वात्प्रजापतिगुणाः सर्वेऽपि त्वय्यवस्थिताः । प्रजापतिश्च भुवनकारणत्वाद्भुवनरूपः । अन्तर्यामित्वाच्च यन्ता । पोषकत्वाच्च धर्ता । तद्द्वारा त्वमपि तथाविधोऽसि । स तादृशस्त्वं वैश्वानरं सर्वपुरुषहितकारिणं समर्थसं विस्तारेण सहितमग्निमाहवनीयं गच्छ । आहवनीये ह्यश्वाङ्गानि हूयन्ते । तत्र गत्वा च स्वाहाकृतः स्वाहाकारेणास्माभिर्देवेभ्यो दत्तो भव । ततो हुतः सन्नृषो भूत्वा पृथिव्यां यन्ता राड्भव नियामको राजा भव । ततोऽनन्तरमाविन्यन्तरिक्षे च ग्रहनक्षत्रादीनां यन्ता यमनश्चापि, नियन्तुमुद्युक्तो यन्ता, नियन्तुं समर्थो यमनस्तादृशो भव । ततोऽप्युपरितने द्युलोके धर्ता धरुणोऽसि, स्वर्गस्थितानां पुरुषाणा धर्ता पोषयितुमुद्युक्तः, धरुणः पोषयितुं समर्थः, तादृशो भव । तथाविधं त्वां क्षेष्यै सर्व(स्य)निष्पत्तये बध्नामीति शेषः । एवमुत्तरत्रापि योज्यम् । क्षेमः प्राप्तस्य धनस्य रक्षणम् । रयिः प्रापणीयं धनम् । पोषस्तज्जन्या भोगपुष्टिः । पृथिव्यादयस्त्रयः प्राप्तव्या लोकाः । तेषु लोकेषु पूर्वं विद्यमानं द्रव्यं सत् । इतः परं संपादनीयं द्रव्यमसत् । एतत्सर्वं भाविजन्मविषयम् । अस्मिञ्जन्मन्यपेक्षिता आप ओषधयः सर्वप्राणिनश्च । तस्य सर्वस्य सिद्ध्यर्थं त्वामिह बध्नामि । एतच्च सर्वं यागद्वारेणोपपद्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके द्वादशोऽनुवाकः)

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्वि-ह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्यां स्वाहा प्रजापतये

(अश्वमेधमन्त्रकथनम्)

स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत (१) ॥

(रन्तिः स्वाहा द्वाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके द्वादशोऽनुवाकः) ।

कल्पः—' दिभूर्मात्रा प्रभूः पित्रेत्यश्वस्य दक्षिणे कर्णे यजमानं वाचयित्वा ' इति ॥ पाठस्तु—

विभूर्मात्रेति । हेऽश्व त्वं मात्रा त्वदीयया पृथिवीरूपया विभूरसि व्याप्तिमानसि । पित्रा द्युलोकरूपेण प्रभूः प्रभुत्वशक्तिमानसि । ' इयं वै माता । असौ पिता ' इति हि ब्राह्मणम् । पृथिव्या विभुत्वाद्द्युलोकस्य भोगप्रभुत्वाच्च तदुभयमस्मिन्नुपचर्यते । तथा त्वमश्वोऽसि मुख्याश्वजातिमानसि, न तु तव गर्दभसांकर्यम् । हिधातोः क्रमणार्थकादुत्पन्नो हयशब्दः । अतो हयोऽसि समीचीनक्रमणवानसि । खुरसौकर्येण भूमावाक्रमणं त्वदीयं स्थिरमित्यर्थः । अत्योऽसि सततगमनशीलोऽसि । नरोऽस्युपर्यारूढानां नेताऽसि । अर्वाऽसि समीचीनगतिमानसि । सप्तिरसि सर्वेष्वपि युद्धादिकार्येषु संबद्धोऽसि । वाजी वेगवानसि । वृषा पुंस्त्वसामर्थ्यवानसि । नृमणा नृभिर्मननीयोऽसि । ययुर्नामासि स्वर्गप्रापक इत्येतदेव तव प्रियं नाम । अत एव ब्राह्मणं ' ययुर्नामासीत्याह । एतद्वा अश्वस्य प्रियं नामधेयम् ' इति । ईदृशस्त्वमादित्यानां प्रतिमासवर्तिनां द्वादशसंख्यानां पत्वं पतनं यदन्तरिक्षगमनं तदन्वन्तरिक्षमार्गेणेहि गच्छ ॥

कल्पः—' अग्नये स्वाहा। स्वाहेन्द्राग्निभ्यामिति पूर्वहोमान्हुत्वा ' इति ॥

पाठस्तु—

---

१ च. भाग्यप्र°। २ ख. °प्रदत्त्वा°।

(अश्वमेधमन्त्रकथनम्)

अग्नये स्वाहेति । अत्र प्रथममन्त्रः स्वाहान्त उत्तरे चत्वारो मन्त्राः स्वाहादयः ॥

कल्पः—' रथकारगृहे वसतिर्भवतीह धृतिरिति सायमश्वस्य चतुर्षु पत्सु चतस्रो धृतीर्जुहोति ' इति ॥ पाठस्तु—

इह धृतिरिति । इहास्मिन्दक्षिणपूर्वपादे धृतिर्धरणं स्थैर्यं भवतु । तदर्थमिदं स्वाहुतमस्तु । इहास्मिन्दक्षिणपृष्ठपादे विधृतिर्विशेषेण[1] स्थैर्यमस्तु । इहास्मिन्नुत्तरपृष्ठपादे रन्तिः स्थैर्येण रमणमस्तु । इहास्मिन्नुत्तरपूर्वपादे रमतिरत्यन्तं स्थिरं रमणमस्तु ॥

भूरसि भुवे त्वेति । कल्पः—' भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्यश्वमुत्सृज्य ' इति ।

विश्वेभ्यस्त्वा भूतेभ्य इति मन्त्रशेषपाठः । हेऽश्व त्वं भूरस्यतीतानामनागतानां वर्तमानानां भावयिताऽसि । भूशब्दोऽतीतमाचष्टे, भव्यशब्दो वर्तमानं, भविष्यच्छब्द आगामि, तस्य त्रिविधस्य श्रेयसः सिद्ध्यर्थं त्वामुत्सृजामि । तथा विश्वेभ्यो भूतेभ्यः सर्वप्राणिस्वाधीनत्वार्थं त्वामुत्सृजामि ॥

कल्पः—' देवा आशापाला इति रत्निभ्यः परिददाति ' इति ॥ पाठस्तु—

देवा आशापाला इति । आशापाला दिक्षु पालकाः । हे देवा देवमूर्तिधारिणो रत्नाद्याभरणभूषिताः शतसंख्याकाः राजपुत्रा मेधाय यज्ञाय प्रोक्षितमेतमश्वं देवेभ्यो देवार्थं गोपायत रक्षत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके त्रयोदशोऽनुवाकः) ।

आर्यनाय स्वाहा प्रार्यणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा (१) ॥

---

१ क. घ. ङ. च. °शेषेण पा° ।

(अश्वमेधमन्त्रकथनम्)

(आयनायोत्तरषाष्ठायनाय षड्विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके त्रयोदशोऽनुवाकः)।

कल्पः—' आयनाय स्वाहा प्रायणाय स्वाहेत्युद्द्रावान् ' इति ॥ पाठस्तु—

आयनाय स्वाहेति । आभिमुख्येनायनं गमनं यस्यासावायनस्तस्मा अश्वाय, तत्प्रीत्यर्थमिदं स्वाहुतम । आभिमुख्यगमनमपि द्विविधं—मन्दगमनं तीव्रगमनं च । तत्राऽऽद्य पूर्वमन्त्रेऽभिहितं, द्वितीयं प्रायणमन्त्रेऽभिधीयते। केचन धूर्ता अश्वा गन्तुमनिच्छन्तस्ताडिताः सन्तः पूर्वपादावुन्नमयन्ति, अन्ये चापरौ पादावुन्नमयन्ति, तदुभयमुद्द्रावोद्द्रुतशब्दाभ्यामभिधीयते । कशया घातितेनोद्द्रवणार्थं क्रियमाणस्य शब्दविशेषस्यानुकरणार्थं शूकार इति प्रयुक्तम् । शूकृतमेतदेव । पूर्वापरपादविषयत्वेन द्वैधाऽभिधानम् । पुरतो वेगेन धावनं पलायनम् । आभिमुख्येन धावनमापलायनम् । चतुर्णामपि पादानां सकृदुन्नमनमाभिमुख्यविषयमावल्गनम् । पराङ्मुखत्वविषयं परावल्गनम । पूर्वमायनप्रायणशब्दाभ्यां योऽर्थोऽभिहितः सोऽतीतविषयः । इह त्वायत्प्रयच्छब्दाभ्यां वर्तमानविषयः स एवार्थोऽभिधीयते । अतो यथोक्तत्तदगुणयुक्ताश्वाय तत्प्रीत्यर्थं स्वाहा हुतमिदमस्तु । किं बहुना सर्वस्मै सर्वप्रकारगमनविशेषयुक्ताश्वप्रीत्यर्थमिदं स्वाहा हुतमस्तु । उत्कृष्टगमनविषयत्वादेतेषां होमानामुद्द्रावा इति नामधेयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके चतुर्दशोऽनुवाकः)।

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहे-

(अश्वमेधमन्त्रकथनम्)

इन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके चतुर्दशोऽनुवाकः) ।

कल्पः—' अग्नये स्वाहा सोमाय स्वाहेति पूर्वहोमान् ' इति ॥ पाठस्तु—

अग्नये स्वाहेति। अपां मोदः पर्जन्यः। अनुक्तानां पूर्वहोमाङ्गानां देवानां संग्रहार्थं सर्वशब्दः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टक प्रथमप्रपाठके पञ्चदशोऽनुवाकः)

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तर्चत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अश्वमेधमन्त्रकथनम्)

(अथ सप्तमकाण्डे प्रथमप्रपाठके पञ्चदशोऽनुवाकः) ।

कल्पः—' पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येतं हुत्वा ' इति ॥

एतमनुवाकं पूर्वनामकहोमान्तःपातित्वेनैव हुत्वेत्यर्थः ॥ पाठस्तु—

पृथिव्यै स्वाहेति । प्राच्यादिशब्दा विशेषवाचिनः । दिक्शब्दः सामान्यवाची । समाशरत्संवत्सरशब्दाः सौरचान्द्रनाक्षत्रविषयाः । सर्वशब्दोऽनुक्तकालविषयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके षोडशोऽनुवाकः) ।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा (१)

(अग्नये सवित्रे पूष्णेऽपा मोदाय वायवे त्रयोविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके षोडशोऽनुवाकः) ।

कल्पः—' अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षाम् ' इति ॥ पाठस्तु—

अग्नये स्वाहेति । पूर्वहोमानुवाकवदयमनुवाको व्याख्येयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके सप्तदशोऽनुवाकः) ।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽ-

(अश्वमेधमन्त्रकथनम्)

अग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहाऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पृथिव्या अग्नयेऽह्ने चतुश्चत्वारिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके सप्तदशोऽनुवाकः)

कल्पः—' पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकविꣳशिनीं दीक्षाम् ' इति ॥

पाठस्तु—

पृथिव्यै स्वाहेति । अत्र ऋज्वादयस्त्रयः पृथिव्यादिलोकाः । तथा च ब्राह्मणम्—' इयं वा ऋजुः । अन्तरिक्षꣳ साधु । असौ सुक्षितिः ' इति । अशितिमशब्देन क्षुन्निवारकमाशितृत्व+पमिधीयते । स्वर्गः पुण्यफलभूतः । लोकशब्दः सामान्यवाची । अत्रातीतानुवाकेऽग्नये स्वाहा पृथिव्यै स्वाहेत्यनुवाकौ पूर्वहोमविषयौ । तथा च ब्राह्मणम्—' अग्नये स्वाहा सोमाय स्वाहेति पूर्वहोमाञ्जुहोति । पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति । पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह । यथायजुरेवैतत् ' । इति । उत्तरौ त्वनुवाकौ दीक्षाविषयौ । तत्रापि ब्राह्मणम्—' अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षां जुहोति । पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति । पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकविꣳशिनीं दीक्षां जुहोति ' इति ॥

+ अत्र कस्मिंश्चित्पुस्तके ' आशितशब्दत्वम् ' इति, कस्मिंश्चित्पुस्तके तु ' आशितृशब्दत्वम् ' इति विद्यते तत्प्रामादिकमिति ज्ञेयम् ।

---

१ क. ख. ङ. °शितशब्दत्व° । २ ग. च. °तृशब्दत्व° ।

(अश्वमेधमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठकेऽष्टादशोऽनुवाकः) ।

भुवो देवानां कर्मणाऽपसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि (१) शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयाम्याऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा ब्रह्मणा चतꣳ सत्येऽधा सत्यमृतेऽधाम् । महीमू षु मात्रामाणमिह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा (२) ॥

(आनुष्टुभेन त्वा छन्दसा युनज्म्येकान्नपञ्चाशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठकेऽष्टादशोऽनुवाकः) ।

कल्पः—' भुवो देवानां कर्मणेत्यृतुदीक्षाभिः कृष्णाजिनपारोहन्तमभिमन्त्रयते ' इति ॥ तत्र प्रथममन्त्रमाह—

(अश्वमेधमन्त्रकथनम्)

भुवो देवानामिति । हे दीक्षे त्वं देवानां संबन्धिना कर्मणस्तस्य यज्ञस्य संबन्धिनाऽपसा व्यापारेण भुवो युक्ता भव । त्वं पथ्याऽसि देवानां यज्ञस्य च हिताऽसि । अहं वसुभिर्देवेभिर्वसुसंज्ञकैर्देवदेवतया दीक्षाभिमानिन्या गायत्रेण च्छन्दसा च त्वां युनज्मि त्वां युक्तां करोमि । तथा वसन्तेनर्तुना सहितोऽहं त्वां हविषा दीक्षयामि संस्कृतां करोमि ॥

अथोत्तरांश्चतुरो मन्त्रानाह-

रुद्रेभिर्देवेभिरिति । एतेषु चतुर्ष्वपि मन्त्रेषु भुवो देवानामित्यादिभागमनुषज्य पूर्ववद्व्याख्येयम् ॥ अथ षष्ठमन्त्रमाह-

आऽहं दीक्षामिति । अहं यजमानो गायत्रेण च्छन्दसा ब्रह्मणा छन्दोरहितेन मन्त्रेण चानुगृहीतः सन्भृतस्य पत्नीं यज्ञस्य पालयित्रीं दीक्षां नियमविशेषरूपामारुहमारूढोऽस्मि । मदीयमृतं सत्ये स्थापयामि सत्यमप्यृते स्थापयामि । चिन्त्यमानं वस्तुतत्त्वमृतम् । उच्यमानं वस्तुतत्त्वं सत्यम् । अहं सर्वदा मनसा वस्तुतत्त्वं विचार्य पश्चाद्वक्ष्यामि । वाचाऽपि वस्तुतत्त्वमुच्चार्य पश्चादन्यद्वस्तुतत्त्वं चिन्तयामीत्यर्थः ॥

अथ सप्तमाष्टमयोर्मन्त्रयोः प्रतीके दर्शयति-

महीमू ष्विति । महीमू षु मातरमित्येको मन्त्रः । सुत्रामाणं पृथिवीं द्यामित्यपरो मन्त्रः । तौ च मन्त्रौ वैश्वानरो न ऊत्येत्यनुवाके व्याख्यातौ ॥

कल्पः-' सायं धृतिषु हूयमानासु राजन्यो वीणागाथी गायति ' इति ॥

तानेतान्धृतिमन्त्रानाह-

इह धृतिरिति । एतच्चतुष्टयं पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठक एकोनविंशोऽनुवाकः) ।

ईकाराय स्वाहेङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा

(अश्वमेधमन्त्रकथनम्)

ध्यानाय स्वाहाऽपानाय स्वाहा संदृश्यमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरक्ष्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषत्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा (१) आसिष्यते स्वाहाऽऽसीनाय स्वाहाऽऽसिताय स्वाहा निपत्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रबोत्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा (२) वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा सरहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवत्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्रस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूय-

(अश्वमेधमन्त्रकथनम्)

मानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा निकषिताय स्वाहा यदात्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत्करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा (३) ॥

(निषण्णाय स्वाहा वीक्षिष्यते स्वाहा निकषमाणाय स्वाहा सप्तविंशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठक एकोनविंशोऽनुवाकः) ।

कल्पः—'ईकाराय स्वाहेंकृताय स्वाहेत्यश्वचरितानि' इति ॥ पाठस्तु—

ईकाराय स्वाहेति[1] । खाद्यं दृष्ट्वा यातुं यो(यं) मन्दशब्दं करोति तदनुकरणं तदीमित्यनेनोच्यते । स च शब्दो वर्तमान ईकारः । अतीतस्त्वींकृतः । वडवां दृष्ट्वोच्चैर्घोषणोत्साहजनितं क्रन्दनम् । विरोधिनपशुं दृष्ट्वा क्रोधेनोच्चैर्घोषणमवक्रन्दनम् । गमनकाले नासापुटयोः श्वासशब्दः प्रोथनम् । स एवानुवर्तमानः प्रप्रोथनम् । तृणभक्षणे वा श्वासशब्दः प्रप्रोथनम् । अश्वान्तराघ्राणं गन्धः । स एवातीतो घ्रातः । प्राणापानव्याना ऊर्ध्वाधोमध्यवृत्तयः । संदीयमानो बध्यमानः । संदितो बद्धः । विचृत्यमानो मुच्यमानः । विचृत्तो मुक्तः । पलायितुमुद्यतः पलायिष्यमाणः । निर्वर्तितपलायनः पलायितः । पलायनपरित्याग उपरमः । स च भावी भूतश्च । शालाप्रवेशो निवेशनम् । तच्च भावि वर्तमानमतीतं चेति त्रिविधम् । प्रविश्य शालायां स्थितिर्निषदनम् । तदपि पूर्ववत्त्रिविधम् । एतच्च वैविध्यं सर्वत्र द्रष्टव्यम् । क्षणमात्रं पादसंकोच आसनम् । पार्श्वस्य भूमिस्पर्शो निपतनम् । पादप्रसारणं शयनम् । चक्षुषोर्निमीलनं संमीलनम् । स्वापो निद्रा । तत्परित्यागः प्रबोधः । बाह्यावलोकनं जागरणम् ।

---

१ स. च. °ति । स्वाद्वम्बु दृष्ट्वा पातुं° ।

(अश्वमेधमन्त्रकथनम्)

अश्वपालकानामुत्थापनशब्दानुसंधानं श्रवणम् । तृणखाद्यान्वेषणं वीक्षणम् । शालाया बहिर्निर्गमनं संहानम् । निर्गत्य भूमौ विलुण्ठनं विवर्तनम् । तदनन्तरमूर्ध्वं स्थितिरुत्थानम् । उत्थितस्य धूलिमपनेतुं शरीरवालनं विधूनम् । पादस्थोन्नमनमुत्क्रमणम् । मन्दगमनं चङ्क्रमणम् । दन्तपङ्क्तिभ्यां पृष्ठभागे दंशनं कण्डूयनम् । कुड्यस्तम्भादौ शरीरघर्षणं निकषणम् । अदनादयः प्रसिद्धाः । प्रजा अश्वस्यापत्यानि । प्रजननं तदुत्पादनम् । सर्वशब्देनावशिष्टान्यश्वचरितानि संगृह्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके विंशोऽनुवाकः) ।

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तं-
मस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृत-
स्य पन्था असि देवानां छायाऽमृतस्य नाम त-
त्सत्यं यत्त्वं प्रजापतिरस्याधि यर्दस्मिन्वाजिनीव
शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः
पवते कव्यन्पशुं न गोपा इर्यः परिज्मा (१) ॥

(अग्नेय वायवेऽष्टाचत्वारिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

प्रजननं प्रातःसवने वै ब्रह्मवादिनः स त्वाङ्गिरस आपो वै सोमो वै
संहस्रतम्पाऽविर्जमदग्निः संवत्सरो देवस्य विभूसयंनायाग्नये
पृथिव्या अग्नये पृथिव्यै भुवं ईंकारायाग्नये वायवे
विꣳशतिः ॥ २० ॥

(अश्वमेधमन्त्रकथनम्)

प्रजनंनमङ्गिरसः सोमो वै प्रतिगृह्णाति विभूर्वीक्षि-

माणाय द्विपञ्चाशत् ॥ ५२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके

प्रथमः प्रपाठकः ॥ १ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः)

कल्पः—' अग्नये स्वाहा वायवे स्वाहेत्येतं हुत्वा ' इति ॥

एतस्मिन्ननुवाके त्रीन्मन्त्रानाह—

अग्नये स्वाहेति । अथ चतुर्थपञ्चममन्त्रावाह—

ऋतमसीति । हेऽश्व त्वमृतं यन्मानसं सत्यं तदसि । यागरहितानां पुरुषाणां यदृतं तस्याप्युत्तमं त्वमृतं सत्यमसि । तव यागसाधनत्वात् । एवं सत्यवाक्यमपि वाच(चि)कविषयत्वेन व्याख्येयम् ॥ अथ षष्ठमन्त्रमाह—

ऋतस्य पन्था इति । ऋतस्य यज्ञस्य पन्था मार्गोऽसि । त्वद्द्वारेण हि यागो निर्वर्त्यते । तथा देवानाँ छायाऽसि । यथा घर्मकाले वृक्षस्य च्छाया सुखप्रदा तथा त्वं सुखप्रदोऽसि । अत एव त्वममृतस्य नामासि । देवा हि त्वदीयं हविः पीयूषमित्येव स्त्री कुर्वन्ति । त्वं प्रजापतिरूपोऽसीति यत्तत्सत्यं नात्र कश्चिदुपचारोऽस्ति । प्रजापतेरक्षयेव हि त्वदाकारेण निष्पन्नम् ॥

अथ सप्तममन्त्रमाह—

अधि यदस्मिन्निति । यद्यस्मात्कारणाद्वाजिन्यस्मिन्नश्वे शुभः शोभनो गुणसंघोऽधीव देवेभ्योऽप्यधिक इव दृश्यते तस्मात्कारणाद्विशः संबन्धिनो विशो मरुद्गणाः सूर्येण सूर्यसमानेनाश्वेन सार्धं स्पर्धन्ते वयं गुणाधिका अश्वो न गुणाधिक इत्येवं स्पर्धां कुर्वन्ति । तादृशोऽयमश्वः । किंचायमपो वृणान इदं कर्म प्रवर्तयितुमिच्छन्पवते विश्वं पुनाति । तत्र दृष्टान्तः—कव्यन्पशुं न । यथा यागेषु स्तुतिमिच्छन्देवः पशुं वृणीते तथाऽयमश्वः कर्मेदं वृणीते । देवो हि नानाविधाभिः स्तुतिभिः स्तूयमानः पशुरूपं हविरतिप्रीतिपूर्वकमिच्छति । एवमश्वोऽप्यनेकैर्हेतिभिः स्तावकैर्मन्त्रैश्च परितुष्टः कर्मेदं समापयितुमिच्छतीत्यर्थः । कीदृशोऽश्वः गोपा ऋत्विग्यजमानानां रक्षकः । इयः कर्मद्वाराऽन्नप्रेतः ।

(अश्वमेधमन्त्रकथनम्)

परिज्मा परितः स्वर्गलोकादौ गन्तुं समर्थः। एतैः सप्तभिर्मन्त्रैर्होमो बौधायनेनापि दर्शितः—'सावित्राणि जुहोत्यग्नये स्वाहा वायवे स्वाहेति सप्त' इति॥

अत्र विनियोगसंग्रहः—

उच्यन्ते ह्यनुवाकार्थाः सप्तमाद्यप्रपाठके।
अग्निष्टोमविधिस्त्वाद्ये द्वितीये स्तोमसंस्तवः॥
सर्वस्तोमस्तृतीये स्याच्चतुर्थे तु द्विरात्रकः।
त्रिरात्रः पञ्चमे षष्ठे स्युः सहस्रतमीगताः॥
होमाद्याः सप्तमे दानं चतूरात्रोऽग्निरष्टमे।
द्वितीयो नवमे पञ्चरात्रो दशम ईरितः॥
अत ऊर्ध्वं त्वश्वमेधमन्त्राणां विनियोजनम्।
उच्यते रशना देव गृहीत्वा मन्त्रयेदिमाम्॥
अभिवेत्यश्वमाबध्य(ध्नं बध्नीयात्)त्रयो मन्त्रा इहेरिताः।
विभूः कर्णे वाचयीत अग्नये पूर्वहोमकान्॥
पञ्चेह पत्सु जुहुयाच्चतुर्भिर्भूरसीत्यतः।
अश्वमुत्सृजते देवा रात्रिभ्योऽश्वं प्रयच्छति॥
अनुवाके द्वादशोऽस्मिन्मन्त्रा द्वादश वर्णिताः।
आयनोद्द्रावहोमस्तु तत्र मन्त्रास्त्रयोदश॥
अग्नये पूर्वहोमाः स्युर्मन्त्रा एकादश स्मृताः।
पृथिव्या इति ते होमा मन्त्रा अत्रैकविंशतिः॥
अग्नये पूर्वदीक्षार्था होमा एकादश स्मृताः।
पृथ्वी(थी)त्यपि तथा होमा द्वाविंशतिरुदीरिताः॥
भुव इत्युत्तरदीक्षाख्यमन्त्रैश्चर्माधिरोहणे।
मन्त्रयेदष्टभिः पत्सु जुहुयादिह पूर्ववत्॥
अष्टादशानुवाकेऽस्मिन्मन्त्रा द्वादश वर्णिताः।
ईमश्वचरितैर्होमाश्चतुरशीतिरीरिताः॥
अग्नये सप्तभिर्मन्त्रैर्होमः सावित्र ईरितः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके विंशोऽनुवाकः॥ २०॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमः प्रपाठकः ॥ १ ॥

(अथ सप्तमाष्टके द्वितीयः प्रपाठकः)

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

साध्या वै देवाः सुवर्गकामा एतꣳ षड्रात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते सुवर्गं लोकमायन्य एवं विद्वाꣳसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति देवसत्रं वै षड्रात्रः प्रत्यक्षꣳ ह्येतानि पृष्ठानि य एवं विद्वाꣳसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षडवा ऋतवः षट्पृष्ठानि (१) पृष्ठैरेवर्तून्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रतिं तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अन्नाद्यैरेव प्रतिं तिष्ठन्त्येते वै यज्ञस्याऽऽसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशः (२) भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रेव जायन्त एकविꣳशो भवति

(षड्रात्रकथनम्)

प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै सदोहविर्धानिनं एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङ्ङिव हि सुवर्गः (३) लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्यां क्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन्प्रतिषज्ज्य प्रतिष्ठां गच्छन्ति यदा दशं शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शतꣳ सहस्रं कुर्वन्त्यथैकमुत्थानꣳ सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम् (४) ॥

(पृष्ठानि सप्तदशः सुवर्गो जयन्ति यदैकादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे द्वितीयः प्रपाठकः)

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अहीनाः पञ्चरात्रान्ताः प्रथमे समुदीरिताः ।
षड्रात्राद्या द्वितीयेऽथ वक्ष्यन्तेऽस्मिन्प्रपाठके ॥

(षड्रात्रकथनम्)

तत्र प्रथमेऽनुवाके षड्रात्रं विधत्ते—

साध्या वा इति । साध्यशब्दो देवगणविशेषवाची । अत्र सत्रं दर्शनं शास्त्रीयनिश्चयः । आहरणं सामग्रीसंपादनम् । यजनमनुष्ठानम् । यद्यप्ययं षड्रात्रोऽहीनत्वाद्यज्जातिचोदनाविधेयस्तथाऽप्यत्र केषांचित्तारस्वतसत्रधर्माणां सद्भावमभिप्रेत्य विद्वांस आसत इत्यात्तिचोदनया विहितः । ते च धर्मा आश्वत्थी हविर्धानं चेत्यादिना वक्ष्यन्ते ॥

एतमेव सत्रत्वोपचारमभिप्रेत्य प्रशंसति—

देवसत्रं वा इति । देवानां सत्रवत्प्रियत्वादिदं देवसत्रम् । तदेव सत्रवत्प्रियत्वं स्पष्टी क्रियते—सत्ररूपे द्वादशाहे यः पृष्ठ्यः षडहस्तस्मिन्षट्सु दिनेषु यानि पृष्ठस्तोत्राणि रथंतरबृहद्वैरूपवैराजशाक्वररैवतारूप्यैः सामभिर्निष्पाद्यानि एतान्यत्रापि षट्सु दिनेषु कर्तव्यानि प्रत्यक्षमुपलभ्यन्ते यस्मादेवं तस्माद्देवानां सत्रवत्प्रियत्वमुचितम् । एवं देवप्रियत्वं विदित्वाऽनायासेन बहुकालव्यवधानमन्तरेणैव देवताः प्राप्नोति ॥

अत्राहर्गतां षट्संख्यां प्रशंसति—

षड्रात्रो भवतीति । ऋतवो यथा षट्संख्याका एवं पृष्ठान्यपि षट्संख्याकानि । अतः पृष्ठैर्ऋतुद्वारा संवत्सरं प्राप्य तत्र प्रतितिष्ठन्ति ॥

एतेषु षट्सु पृष्ठस्तोत्रेषु प्रथमद्वितीययोरह्नोरनुष्ठेये रथंतरबृहत्पृष्ठे ये स्तोत्रे ते विशेषेण प्रशंसति—

बृहद्रथंतराभ्यामिति । शब्दशास्त्रोक्त एवात्र बृहच्छब्दस्य पूर्वनिपातः । अनुष्ठानं तु रथंतरस्यैव प्रथमम् । यन्ति स्तोत्रमनुतिष्ठेयुरित्यर्थः । अनयोः साम्नोर्लोकद्वयरूपत्वाल्लोकाभ्यामेव तदनुष्ठितं भवति । अपि चानुष्ठातारो लोकयोर्द्वयोः प्रतितिष्ठन्त्येव । किंचैते सामनी यज्ञस्याऽऽदिमेन समाप्तिप्रापकौ मार्गावतस्ताभ्यामेव स्वर्गं प्राप्नुवन्ति ॥

अथ षट्संख्याकान्यहानि चोदकप्राप्तानि विस्पष्टं दर्शयति—

त्रिवृदग्निष्टोम इति । त्रिवृदादयः शब्दाः पूर्वोक्तपञ्चरात्रानुवाक इवात्रापि व्याख्येयाः । तत्र सत्रधर्मातिदेशाभावेन बहुयजमानकत्वनियमाभावादेकवचनेन निर्देशः । इह तु तन्नियमसद्भावाद्बहुवचनेन निर्देशः । प्रकृतिरूपे पृष्ठ्यषडहे त्रिवृदग्निष्टोमो रथंतरसामा प्रथममहः । पञ्चदश उक्थ्यो बृहत्सामा द्वितीयः ।

---

१ घ. च. °वृनया वि° । २ ख. °नाया विषय° । ३ ख. घ च. °ण विशिष्टमु° ।

(षड्रात्रकथनम्)

सप्तदश उक्थ्यो वैरूपसामा तृतीयः। एकविंशः षोडशी वैराजसामा चतुर्थः। त्रिणव उक्थ्यः शाक्वरसामा पञ्चमः। त्रयस्त्रिंश उक्थ्यो रैवतसामा षष्ठः। तदिदं द्वादशाहान्तर्गतस्य पृष्ठ्यषडहस्य स्वरूपम्। तद्विकृतित्वादत्रापि तथाविधान्येवाहानि द्रष्टव्यानि॥

अथ सारस्वतसत्रधर्माननुवाकसमाप्तिपर्यन्तमतिदिदिक्षुस्तावदेकं धर्मं विधत्ते—

सदोहविरिति। ये यजमानाः सदोहविर्धानाभ्यां मण्डपाभ्यां युक्ताः षड्रात्रे प्रवर्तन्ते तेषां हविर्धानमाग्नीध्रं चेति मण्डपद्वयमध्वर्थ्वी भवतोऽध्वर्थ्वकाष्ठनिर्मिते उभे कार्ये। तत्राश्वत्थकाष्ठं स्वर्गसाधनम्॥ धर्मान्तरं विधत्ते—

चक्रीवती इति। यथा रथस्य शकटस्य वा चक्रं तथा चक्रं ययोराग्नीध्रहविर्धानमण्डपयोस्ते चक्रीवती। अयमर्थः—चक्रयोरक्षं प्रक्षिप्य शकटाकारं कृत्वा तस्योपरि फलकान्यास्तीर्य तेषामुपरि भूमाविव मण्डपं निर्मातव्यमिति। ईदृशं च स्वर्गप्राप्त्यै भवति। रथेनेव चक्रयुक्तेन मण्डपेन गन्तुं शक्यत्वात्॥

धर्मान्तरं विधत्ते—

उलूखलेति। यथा काष्ठमयस्योलूखलस्य मूलमतिस्थूलं समतलं भवति तथा यूपमूलं कर्तव्यम्। एतच्च यत्र यत्र यूपो नीयते तत्र तत्र भूमौ खननमन्तरेणैव प्रतिष्ठापनार्थम्॥ धर्मान्तरं विधत्ते—

प्राञ्चो यान्तीति। चक्रयुक्ताग्नीध्रादिभिः सह प्राङ्मुखा गच्छेयुः। स्वर्गलोकस्य प्राग्वर्तित्वेन प्रतिभानात्। एतच्चोक्तं सूत्रकारेण—[1] तस्मिन्संस्थितेऽध्वर्युः शम्यां प्राचः प्रास्यति स यत्र निपतति तद्गार्हपत्यं तस्मिन्षट्त्रिंशतं प्राचः प्रक्रमान्प्रक्रामति तदाहवनीयः, चक्रीवन्ति सदोहविर्धानान्याग्नीध्रं चाऽऽध्वर्थ्वी हविर्धानमाग्नीध्रं चोलूखलबुध्नो यूपः प्रकृष्येदुपोप्त एव नोपरवान्खनति' इति। एकस्मिन्नहनि समाप्ते सति परेद्युः प्रातः शम्याक्षेपकालं गत्वा तत्राहरन्तरमनुष्ठाय तस्मिन्नपि समाप्ते ततः परेद्युरपि तथेत्यर्थः॥

धर्मान्तरं विधत्ते—

सरस्वत्येति। या सरस्वत्याख्या नदी तया सह तत्तीरे प्रतिदिनं गच्छेयुः। एष सरस्वतीतीरगतो मार्गो देवयानो देवान्प्रापयितुं क्षमोऽतस्तेनैव प्राप्नुवन्ति॥ धर्मान्तरं विधत्ते—

आक्रोशन्त इति। उत्तराहुतिशयेन क्रियमाण उच्चतमो ध्वनिराक्रो-

---

१ क. घ. ङ. नीयते। २ च. °न्तमनु°। ३ ख °नुष्ठेयं त°।

(सप्तरात्रकथनम्)

शस्तं कुर्वन्तो गच्छेयुः । धनसंकोचमन्तरेण जीवनं वार्तिः । तद्वैपरीत्येन दारिद्र्यमवार्तिः । अवृत्तिरेवावार्तिः । तां चावार्तिमन्यस्मिन्वैरिणि प्रतिषज्ज्य प्रतिष्ठितत्वेन संयुक्तां कृत्वा स्वयं धनसंपन्नां प्रतिष्ठां गच्छन्ति ॥

एवमनुतिष्ठतः कालावधिरूपं धर्मान्तरं विधत्ते-

यदा दश शतमिति । एकेन वृषभेण सहिता दश गावो यावति कालेऽपत्यप्रसवेन गवां शतं संपादयन्ति तावन्तं कालं पौनःपुन्येनानुष्ठाय तदनुष्ठानादुत्थानं कर्तव्यमनुष्ठानं समापयेदित्यर्थः । सोऽयमेकः समाप्तिकालः । गोशते साते पुरुषस्य शतसंवत्सरायुष्ट्वान्नाडीशतकसंचारेण शतेन्द्रियत्वाद्वा(च्चाऽऽ) युषीन्द्रिये च प्रतितिष्ठन्ति ॥

कालावधौ पक्षान्तरं विधत्ते-

यदा शतमिति । शतं गावो यदा पूर्ववत्सहस्रं संपादयन्ति सोऽयमेक उत्थानकालः । न चातीतपक्षेण सांकर्यं शङ्कनीयम् । प्रसववैचित्र्येण न्यूनाधिककालसंभवात् । गवां सहस्रसंपत्तौ सत्यां सहस्रसंख्याकैर्भोग्यजातैः समृद्धः स्वर्गः प्राप्तो भवति ॥

कालावधावेवापरं पक्षद्वयं विधत्ते-

यदैषामिति । एषां यजमानानां मध्ये कश्चिद्यदा प्रमीयेत, सोऽयमेक उत्थानकालः । यदा वा राष्ट्रक्षोभादिना शत्रुभिरेते यजमाना जिता अपहृतसर्वस्वा भवन्ति, सोऽयमेक उत्थानकालः । उक्तविधं यदुत्थानं तत्तीर्थं पापेभ्यस्तारकम् । तस्मात्तत्पर्यन्तं षड्रात्र आवर्तनीयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः)

कुसुरुबिन्द औद्दालकिरकामयत पशुमान्स्यामिति स एतꣳ सप्तरात्रमाऽहरत्तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्ध य एवं विद्वान्त्सप्तरात्रेण यजते यावन्त एव ग्राम्याः पश-

(सप्तरात्रकथनम्)

वस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽरण्या सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेजः (१) एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्ये विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत्प्रत्यक्षं पूर्वेष्वहःसु पृष्ठान्युपेयुः प्रत्यक्षम् (२) विश्वजिति यथा दग्धामुपसादित्येवꣳ हि तमहः स्यान्नैकरात्रश्चन स्याद्बृहद्रथंतरे पूर्वेष्वहःसूप यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत्प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत् (३) ॥

(तेज उपेयुः प्रत्यक्षं द्विचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टकं द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः) ।

प्रथमेऽनुवाके षड्रात्रोऽभिहितः । अथ द्वितीये सप्तरात्रोऽभिधीयते ॥

तमिमं विधत्ते—

कुसुरुबिन्द इति । कुसुरुबिन्दो नामवः । स चोद्दालकस्य पुत्रः । पशुमान्बहुपशुयुक्तः । गोछागाश्वाविपुरुषगर्दभोष्ट्राः सप्त ग्राम्याः ॥

अथाहःसंख्यां प्रशंसति—

सप्तरात्रो भवतीति । ग्राम्या उक्ताः । द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयाः सप्ताऽऽरण्याः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्य इति सप्त च्छन्दांसि । उभयस्य पशुसमूहस्य च्छन्दसः समूहस्य च ॥

अथाहर्विशेषान्विधत्ते—

त्रिवृदिति । यथासंभवं पञ्चरात्रषड्रात्रवच्च व्याख्येयम् । श्लोकेन पुरस्तात्सदसः स्तुवन्त्यनुश्लोकेन पश्चादित्यादयो महाव्रतधर्माः । तद्धर्मोपेतत्वं महाव्रतवत्त्वम् ॥ अत्र कंचिद्विशेषं विधत्ते—

यत्प्रत्यक्षमिति । सप्तमादहनः पूर्वाण्यहानि यानि सन्ति तेष्वहःसु रथंतरबृहद्वैरूपवैराजशाक्वररैवतानि पृष्ठानि यदि प्रत्यक्षमुपेयुः, अविकृतानि तथैव प्रयुज्यन्त इत्यर्थः । तथा सति सर्वपृष्ठ इति विधानाद्विश्वजित्यपि सप्तमेऽहनि यत्प्रत्यक्षमविकृतं यथा भवति तथा पृष्ठस्तोत्राणि प्रयोक्तव्यानि । एममुभयत्रापि[1] (वि)कृतप्रयोगे सति यथा लोके सकृद्दुग्धां गां पुनरपि दोग्धुं भ्रान्तः पुरुष उपासीदत्येवमिदमुत्तमं सप्तममहः स्यात् । तथा सत्ययं विश्वजिद्दुग्धगोवन्निःसारत्वेन कंश्चिदेकरात्रयागोऽपि न भवेत्, सप्तरात्रयागान्तर्भावोऽपि न संभवतीति किमु वक्तव्यम् । तस्माद्विश्वजितः सारत्वाय वैरूपादीनि पृष्ठान्यवस्थाप्य पूर्वेषु षट्स्वहःसु बृहद्रथंतरे उभे एव पृष्ठे पर्यायेणाऽऽवर्तनीये । इयं वावेत्यादि पूर्ववत् । पूर्वानुवाके निषेधकस्य नकारस्याभावादाभ्यामेव यन्तीत्यत्र लोकाभ्यामनुष्ठानं निर्वर्तयन्तीति व्याख्यातम् । इह तु नकारस्य सद्भावादाभ्यां लोकाभ्यां नापगच्छन्तीति व्याख्येयम् । पूर्वेष्वहःसु बृहद्रथंतरे द्वे एवानुष्ठाय विश्वजित्यविकृतानां सर्वेषां पृष्ठानामनुष्ठाने सति तथा लोके प्रत्तां क्षीरं दातुं प्रवृत्तां प्रसूतां गां पुरुषो दुग्धे तादृगेवैतद्भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

---

१ क. ङ. °पि प्रकृ° । २ ख. कदाचिदे° । ३ ख घ. ङ च. तु न, न° । ४ क. घ. ङ. च. °गेत° ।

(अष्टरात्रकथनम्)

(अथ सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे (१) त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (२) ॥

(दिग्भ्य एव ब्रह्मवर्चसमव रुन्धेऽभिजित्यै)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः)

द्वितीये सप्तरात्रोऽभिहितः। अथ तृतीयेऽष्टरात्रोऽभिधीयते—

बृहस्पतिरिति। पूर्वत्र कुसुरुबिन्देन बाल्य एवाध्ययनकाले सप्तरात्रस्य गुरुमुखेन(ण) निश्चितत्वात्कामनाया ऊर्ध्वं दर्शनं नापेक्षितमिति नोक्तम्।

---

१ क. घ. ङ, च. °स्थ साश्नुमु°।

इह तु तदभावादपश्यदित्युक्तम् । गायत्र्या अष्टाक्षरत्वादिशामवान्तरदिशां च मिलित्वाऽष्टसंख्योपेतत्वात्संख्याद्वारा तदुभयमुखेन ब्रह्मवर्चसप्राप्तिः ॥

अथाहार्विशेषान्विधत्ते—

त्रिवृदग्निष्टोम इति । पूर्वत्र पञ्चैव पृष्ठ्यषडहगतान्यहानि । षष्ठः पञ्चविंशोऽग्निष्टोमः । इह तु तस्य सप्तमत्वात्षाडहिकानि सर्वाण्यप्यहानि क्रमेणैवानुष्ठेयानि । अतिरात्रोऽष्टमः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्त्स एतं नवरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अकल्पता अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान्कल्पयति तान्कल्पमानान्प्रजाभ्योऽनु कल्पते कल्पन्ते (१) अस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं [illegible] गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानाम् (२) गच्छति नवरात्रो भवत्यभिपूर्वमेवास्मिन्ते-

---

१ क. घ. ङ. सर्वत्र ।

(नवरात्रकथनम्)

जो दधाति यो ज्योगामयावी स्यात्स नवरात्रेण यजेत प्राणा हि वा एतस्याधृता अथैतस्य ज्योगामयति प्राणानेवास्मिन्दाधारोत यदीतासुर्भवति जीवत्येव (३) ॥

(कल्पन्ते प्रजानां त्रयस्त्रिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाकेऽष्टरात्रोऽभिहितः । अथ चतुर्थे नवरात्रोऽभिधीयते ॥

तमेतं विधत्ते—

प्रजापतिः प्रजा इति । न्यायचिरं प्राप्नुवन् । प्रजाभ्योऽकल्पत प्रजानां क्षुन्निवारणाय समर्थोऽभूत् । अतो यस्मिन्काले प्रजा अन्नाभावेन क्षुधं नितरां प्राप्नुवन्ति तदा नवरात्रेण यजेत । इमे भूम्यादयो लोकाः सस्यनिष्पत्त्यभावेनैतासां प्रजानां क्षुन्निवारणार्थमसमर्था यदा भवन्ति तदानीमेताः क्षुधं नितरां प्राप्नुवन्ति । नवरात्रयागेन(णे)माँल्लोकानेतासां प्रजानां क्षुन्निवारणसमर्थान्करोति लोकेषु सस्यं बहु निष्पद्यत इत्यर्थः । तान्समर्थाल्लोकाननु यजमानोऽपि प्रजानां रक्षणे समर्थो भवति । ते च लोका यजमानार्थं समर्था भवन्ति यजमानस्येच्छानुसारेण सस्यं निष्पादयन्तीत्यर्थः । ततो यजमानः प्रजास्वन्नरसं स्थापयति ॥

अथ नवरात्रं विभज्य तद्वयवैस्त्रिभिर्लोकत्रयसामर्थ्यं दर्शयन्-दृष्टान्तपुरःसरं प्रशंसति—

त्रिरात्रेणेत्यमिति । नवरात्रमध्ये योऽयमाद्यस्त्रिरात्रस्तेन भूलोकं क्षुन्निवारणसमर्थं करोति । स एव त्रिरात्रो यदा द्वितीयवारमावर्त्यते तदा तेनान्तरिक्षं समर्थं करोति । यदा तृतीयवारमावर्त्यते तेन तदा स्वर्गं समर्थं करोति । तत्र दृष्टान्तः—यथा लोके त्रिवृदज्जुं सिसृक्षुः पुरुष एकस्मिन्सूत्रे द्वितीयं सूत्रं योजयति ततस्तृतीयमपि योजयति एवमेतेन त्रिरात्रेण पुनः पुनरभ्यस्तेनैतस्मि-

लोके प्रथमं समर्थे सति ततो द्वितीयं तृतीयं च लोकं समर्थं करोति । एतच्च सर्वासां प्रजानां धारणाय लोकानामशैथिल्याय च संपद्यते ॥

इदानीमावर्त्यमानस्य त्रिरात्रस्यावयवभूतान्यहानि विधत्ते—

ज्योतिर्गौरायुरिति । ज्योतिरादिशब्दत्रयपूर्वकाः स्तोमशब्देनाभिधीयमानाः सामगैः सर्वैर्ज्ञातास्त्रयोऽहर्विशेषा विद्यन्ते । त एवात्राहर्विशेषाः कर्तव्याः। ज्योतिष्टोमः प्रथममहः, गोष्टोमो द्वितीयमहः, आयुष्टोमस्तृतीयमहः । एते चाहर्विशेषा अत्रापि गवामयनप्रसङ्गे स्पष्टी भविष्यन्ति । ज्योतिष्टोमं प्रथममुपयन्ति गोष्टोमं द्वितीयमुपयन्त्यायुष्टोमं तृतीयमुपयन्तीति ह्यभिधास्यते । एतेषां च स्तोत्रियावैषम्येण भेदः । अत एतस्मिन्प्रसङ्गे आम्नास्यते—' एकया गौरतिरिक्तः । एकयाऽऽयुरूनः ' । इति । ज्योतिष्टोमे यावत्यः स्तोत्रिया गोष्टोमे तावतीभ्योऽप्येकाऽधिका । आयुष्टोमेऽप्येका न्यूना । एवमस्यामपि शाखायां ज्ञाताः प्रसिद्धाः । सामशाखायां तु त्रिकद्रुका इति ज्ञाताः प्रसिद्धाः । त एतेऽत्रानुष्ठेयाः । ज्योतिरादीना लोकत्रयरूपत्वात्तेष्वयं प्रतितिष्ठति । किंच प्रजाना मध्ये ज्ञानं गच्छति क्षुन्निवर्तकोऽयमित्येव सर्वैर्ज्ञातत्वं ज्ञानं ख्यातिं प्राप्नोतीत्यर्थः । ज्योतिर्गौरायुरित्ययमेव त्रिरात्र आवर्त्यमानो नवरात्रः संपद्यते । अत एव सूत्रकारेणोक्तम्—' शललीपिशङ्गे नाम्नि चकामो ज्योतिर्गौरायुर्गौर्ज्योतिरतिरात्रः ' इति । चतुर्विंशेषु नवरात्रयागेष्विदानीमुच्यमानस्य शललीपिशङ्ग इत्येतन्नाम ॥

नवरात्रकर्तुं प्रशंसति—

नवरात्र इति । योऽयं ज्योतिरादिकस्त्रिरात्रः स एवाऽऽवर्त्यमानो नवरात्रो भवति । तदनुष्ठानेनाभिपूर्वमेवानुक्रमेणैव यजमाने तेजः संपादयति । सकृदनुष्ठितस्त्रिरात्रो द्विरनुष्ठितः षड्रात्रस्त्रिरनुष्ठितो नवरात्रः । एवं तेजोऽप्युत्तरोत्तरं वर्धत इत्यर्थः ॥

तदेवमन्नसंपादनद्वारा क्षुन्निवारणार्थं नवरात्रो विहितः । अथ दीर्घरोगनिवृत्त्यर्थमपि तमेव विधत्ते—

यो ज्योगामयावीति । ज्योगामयावी चिरकालिकरोगयुक्तः । तस्य पुरुषस्य प्राणा यदा धातुवैषम्याद्धृता धारयितुमशक्या भवन्ति तदानीमेतस्य पुरुषस्य ज्योगामयति दीर्घरोगो भवति । नवरात्रानुष्ठानेन प्राणानस्मिन्धारयत्येव अपि च रोगाधिक्यान्मूर्च्छया पुनः मुहूर्तमात्रं याममात्रं वा गतप्राणो भवति, तदाऽप्येतत्क्रतुसामर्थ्यादयं पुनर्जीवत्येव ॥

(दशरात्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः)।

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत्तमजुहोत्तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रेव दशरात्रꣳ सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान्दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रः (१) य एवं विद्वान्दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ्देवताभिरासीत्स न व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतं दशरात्रं प्रायच्छत्तत्तमाऽहरत्तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान्दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वै (२) एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविꣳशः ककुत्त्रयस्त्रिꣳशो य एवं विद्वान्दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकविꣳशो यजमानस्त्रयस्त्रिꣳशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति

(दशरात्रकथनम्)

नैनमभिचरन्स्तृणुते देवासुराः संयत्ता आसन्ते देवा एताः (३) देवपरा अपश्यन्यद्दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत्ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्स्यात्स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोवोपास्ति कुरुते जामि वै (४) एतत्कुर्वन्ति यज्ञ्याया꣣꣯स꣣꣯ स्तोमꣳ꣯ सꣳ꣯हित्य कनीया꣣꣯समुपयन्ति यद्दशरात्रसामान्यवस्तांश्च परस्तांश्च भवन्त्यजामित्वाय त्रिवृद्दशरात्रो ऽग्निष्टद्दाग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे त्रिवृद्दशरात्रो वैश्वदेवीषु पुष्टिमेवाव रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते (५) एकविꣳ꣯श उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति त्रिणवावग्निष्टोमावभितऐन्द्रीषु विजित्यै त्रयस्त्रिꣳ꣯श उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (६) ॥

(प्राजापत्यो वा एष यज्ञो यद्दशरात्रस्त्रिककुद्वा एता वै जायत एकत्रिꣳ꣯शश्च)

(दशरात्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थेऽनुवाके नवरात्रोऽभिहितः। अथ पञ्चमे दशरात्रोऽभिधीयते ॥

तमेतं विधित्सुरादौ तदङ्गभूत होमं विधत्ते—

प्रजापतिरिति। प्रजाः सिसृक्षुः प्रजापतिरादौ तत्साधनभूतं दशरात्रक्रतुमुत्पादयितुं तस्यापि साधनभूतं दशहोत्रात्मकं 'चित्तिं स्रुक्। चित्तमाज्यम्'। इत्यादिकं मन्त्रमारण्यकाण्डोक्तं निश्चित्य तेन मन्त्रेण हुत्वा क्रतुं च सृष्ट्वा प्रजा असृजत। तस्मिन्मन्त्रे चित्तिः स्रुगित्यारभ्य सामाध्वर्युरित्यन्तैर्वाक्यैर्होमनिष्पादकानां स्रुगादीनां दशानामभिधानादयं मन्त्रो दशहोता। यद्वा तैन्मन्त्राभिमानी पुरुषो दशवारमाहूतः प्रत्यशृणोत्। तस्मादयं दशहोता। तथा च होतृब्राह्मणे समाम्नायते—'आत्मन्नात्मन्नित्यामन्त्रयत। तस्यै दशधा हूतः प्रत्यशृणोत्। स दशहूतोऽभवत्। दशहूतो ह वै नामैषः। तं वा एतं दशहूतꣳ सन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः'। इति। तमेतं मन्त्रं दशरात्रदीक्षार्थी जुहुयात्। तेन होमेन दशरात्रक्रतुꣳ सृष्ट्वा तेन दशरात्रेण प्रजामुत्पादयति ॥

अथ दशसंख्यामुपजीव्य क्रतुं प्रशंसति—

वैराजो वा इति। दशसंख्यायाश्च विराट्संबन्धित्वाद्विराट्छन्दःसाध्यमयं सोमोतीत्यर्थः ॥

प्रजापतिसृष्टत्वेन क्रतोस्तत्सबन्धमुपजीव्य प्रशंसति—

प्राजापत्या वा इति। प्रजोत्पादनलक्षणं फलमभिधाय पापक्षयलक्षणं फलमभिधातुं विधत्ते—

इन्द्रो वा इति। पुरा कदाचिदिन्द्रोऽन्याभिर्देवताभिः समान एवाऽऽसीत्, न तु व्यावृत्तिं प्राप्तवान्। भो इन्द्र गच्छ गच्छेत्येवमेव सर्वे देवा व्यवहरन्ति, न तु कश्चिद्राजन्त्वामिन्द्रिति व्यवहरति। ततः प्रजापतिमुपसेद्य तन्मुखाद्दशरात्रं क्रतुमवगत्य तदनुष्ठानेन व्यावृत्तिं प्राप्तवान्। एवमन्योऽप्येतदनुष्ठाय पाप्मना भ्रातृव्येण च वियोगं गच्छति ॥

विधास्यमानेषु दशस्वहःसु त्रयाणामह्नां वृषभसंबन्धिककुत्साम्येनौन्नत्यं संपाद्य प्रशंसति—

---

१ ख. घ. ङ. च. तस्मिन्म°। २ ख. च. भिधत्ते।

(दशरात्रकथनम्)

त्रिककुद्वा इति । त्रीणि ककुत्सदृशान्युन्नतस्तोमयुक्तान्यहानि यस्य दशरात्रस्य सोऽयं त्रिककुत् । किं तदुन्नतमहस्त्रयमिति, तदुच्यते—यः पञ्चदश उक्थ्यो द्वितीयमहस्तदेकं ककुत्स्थानीयम । पथमतृतीययोस्त्रिवृदग्निष्टोमयोरहनोर्नीचस्तोमयुक्तत्वात् । यथा वृषसंबन्धिककुदः पुरोवर्ती गलभागः पश्चाद्वर्ती पृष्ठभागश्चेत्युभौ निम्नौ तद्वत् । तथैकविंश उक्थ्यः पञ्चममहः । तदेकं ककुत्स्थानीयं, चतुर्थषष्ठयोः सप्तदशे कथ्यरूपयोरहनोर्निम्नस्थानीयत्वात् । तथा त्रयस्त्रिंश उक्थ्योऽष्टममहः । तदप्येकं ककुत्स्थानीय, त्रिवृदग्निष्टोमरूपयोः सप्तमनवमयोरहनोर्निम्नस्थानीयत्वात् । एत महिमानमभिज्ञायानुष्ठाने यजमानः समानानां मध्ये त्रिगुणेनौन्नत्येन प्रजापशुधनादिकृतेन युक्तो भवति । य एते पञ्चदशैकविंशत्रयस्त्रिंशास्तत्स्थानीयो यजमान इतरा अहस्थानीयाः प्रजा यजमानस्य पुरस्थानीया भवन्ति । यथा पुरां सर्वासां राजा स्वामी, एवमन्यासां प्रजानां यजमानः स्वामी भवतीत्यर्थः ॥

पूर्वं दशरात्रस्यान्नपाप्तिः पापव्यावृत्तिश्चेति फलद्वय दर्शितम् । अथाभिचारबाधनिवृत्तिरूप फलं दर्शयितुं विधत्ते—

अभिचर्यमाण इति । यमुद्दिश्य शत्रुरभिचारं करोति सोऽयमभिचर्यमाणः । स चाभिचारबाधपरिहाराय दशरात्रेण यजेत । तस्मिन्ननुष्ठिते सति देवानां यानि पुराणि बहुविधशूरभटभृत्यपरिपूर्णानि तानि सर्वाणि स्वरक्षार्थं परितः स्थापयति । यः शत्रुरभिचरति सोऽप्येनं न हिनस्ति, तस्य हिंसितुमक्षमत्वात् । न कुतोऽप्यभिचारादेर्बाध एतस्य यजमानस्य संभवति ॥

अभिचारबाधनिवृत्तिफलमुक्त्वा शत्रुजयरूपं फलमभिधातुं विधत्ते—

देवासुराः संयत्ता इति । देवाश्चासुराश्च यदा युद्धोद्यतास्तदानीं देवा विजयोपायं विचार्य यो दशरात्रस्तद्रूपाणि देवपुराण्युपायत्वेन निश्चित्य परितस्तानि स्थापितवन्तः । तेषां वैरिणां[1] कुतोऽपि भ्रातृव्याभिबाधो न भवति । ततो देवा विजयं प्राप्ता असुराश्च पराजिताः । ततो भ्रातृव्यवान्यजमानोऽपि दशरात्रेण विजयी भवति । तदीयो भ्रातृव्यश्च पराभवति । किं चात्र ककुद्रूपस्य पञ्चदशस्तोमस्य समीपवता त्रिवृदादिस्तोम उपस्तिः क्षीणो भवति । तेन भ्रातृव्यमेव क्षीणं करोति ॥

अथास्मिन्दशरात्रे कंचिद्विशेष विधत्ते—

---

१ क. घ. ङ च. वैरिण. ।

(दशरात्रकथनम्)

जामि वा इति। यथा लोके कश्चिद्राजामात्यादिर्महतीं संपदमनुभूय पश्चाद्दारिद्र्यमनुभवन्नतितमलसः क्लिष्टो भवति तथाऽत्रापि द्वितीयेऽहनि ज्यायांसं पञ्चदशस्तोमं ककुद्रूपमनुष्ठाय ततस्तृतीयेऽहनि कनीयांसं निम्नभागस्थानीयं त्रिवृत्स्तोममनुतिष्ठन्तीति यत्तदेतज्जामि कुर्वन्ति आलस्ययुक्तं कुर्वन्तीत्यर्थः। अत आलस्यपरिहाराय पञ्चदशोक्थरूपाद्द्वितीयस्मादहनोऽवस्तात्पथमेऽहन्युपरिष्टाच्च तृतीयेऽह्न्यग्निष्टोमसामानि यज्ञायज्ञीयारूपाणि कुर्यात्। तेनाऽऽलस्यं परिहृतं भवति। एवमेकविंशोक्थरूपात्सप्तदशादहनः पूर्वोत्तरदिनयोः। त्रयस्त्रिंशोक्थरूपादष्टमादहनः पूर्वोत्तरदिनयोरप्यग्निष्टोमतत्स्थाप्रयोजि(ज)कानि यज्ञायज्ञीयसामानि कुर्यात। तेन सर्वत्राऽऽलस्य परिहृतं भवति।

अथास्य दशरात्रस्य प्रथममहर्विधत्ते—**त्रिवृदग्निष्टोम** इति।

अग्निर्विषयो यज्ञायज्ञीयसामसाध्योऽन्तिमस्तोत्रगतः स्तोमो यस्य सोऽयमग्निष्टोमः। तस्यैवावान्तरविशेषः कश्चिदग्निष्टदित्युच्यते। तत्र सर्वेष्वपि स्तोत्रेष्वग्निरेव स्तूयते। च सर्वोऽपि त्रिवृत्स्तोमेनैव युक्तः। सर्वत्राग्निरेव स्तुत्यत्वादाग्नेयीष्वृक्षु सोऽग्निष्टुद्भवति। तदिदं प्रथममहः। तेन तेजः प्राप्नोति॥

अथ द्वितीयमहर्विधत्ते—

पञ्चदश इति। सर्वासामृचामिन्द्रविषयत्वादिन्द्रियप्राप्तिः।

अथ तृतीयमहर्विधत्ते—

त्रिवृदग्निष्टोम इति। सर्वासामृचा वैश्वदेवत्वेन पुष्टिप्राप्तिः।

अथ चतुर्थमहर्विधत्ते—

सप्तदश इति। तीव्रसोमो नाम कश्चिदुक्थावान्तरविशेषः। यस्मिन्नाशीर्यं गवां शतं दुहन्ति तमुक्थ्यमग्निष्टोमरूपतामापाद्यानुतिष्ठेत्। पञ्चदशतु स्तोत्रेष्वन्तिमस्तोत्रत्रये परित्यक्ते सति द्वादशस्तोत्रत्वेनाग्निष्टोमता संपद्यते। स्तोत्राणि च सर्वाणि प्राजापत्यारूपेषु प्रयोक्तव्यानि। तीव्रसोमत्वादन्नप्राप्तिर्ऋचां प्राजापत्यत्वात्प्रजोत्पत्तिश्च भवति। अथ पञ्चममहर्विधत्ते—

एकविंश इति। स्तोत्रैरेकविंशत्वेन प्रतिष्ठाप्राप्तिः। ऋचां सौरित्वाद्दीप्तिधारणम्। अथ षष्ठमह[illegible]

सप्तदशोऽग्निष्टोम[illegible] नाम कश्चिदेकाहविशेषः। तदनुष्ठानेनात्रोपहवं सर्वेषामनुज्ञां पू[illegible] प्राप्नोति।

---

१ च °दन्नाद्यप्रा°।

(एकादशरात्रकथनम्)

अथ सप्तमनवमे अहनी विधत्ते—

त्रिणवाविति । वक्ष्यमाणस्य त्रयस्त्रिंशाख्यस्याहनः पूर्वोत्तरदिनयोस्त्रिण-वस्तोमयुक्तावग्निष्टोमौ कार्यौ । तत्र सर्वा अप्युच ऐन्द्र्यस्तेन विजयो भवति ।

तयोरहर्नोर्मध्यमषष्ठमहर्विधत्ते—

त्रयस्त्रिꣳश इति । ऋचां सर्वासा वैश्वदेवत्वेन प्रतिष्ठासिद्धिः ।

अथ दशममहर्विधत्ते—

विश्वजिदिति । गतम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः) ।

ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽका-मयन्त प्रजाꣳ सृजमहि प्रजामव रुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रम-पश्यन्तमाऽहरन्तेनायजन्त ततो वै ते प्रजामवारु-न्धत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभ-वन्तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मात् (१) आर्तवा उच्यन्ते य एवं विद्वाꣳस एकाद-शरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते प्रजावन्ता भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्धते सुवर्गस्य लोकस्या-नुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतव. षट्-पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति चतुर्विꣳशो भवति चतुर्विꣳशत्यक्षरा गायत्री (२) गायत्रं ब्रह्मव-

(एकादशरात्रकथनम्)

वर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रतिं तिष्ठन्ति चतुश्चत्वारि॑शो भवति चतुश्चत्वारि॑शदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप्त्रिष्टुभ्येवेन्द्रिये प्रतिं तिष्ठन्त्यष्टाचत्वारि॑शो भवत्यष्टाचत्वारि॑शदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रतिं तिष्ठन्त्येकादशरात्रो भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवाऽऽर्तवेषु संवत्सरे प्रतिष्ठाय प्रजामव रुन्धतेऽतिरात्रावभितो भवतः प्रजाये परिगृहीत्यै (६)।

(एते पुत्रास्तस्माद्वायव्येकान्न पंञ्चाशच्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके षष्ठेऽनुवाकः)।

पञ्चमे दशरात्रोऽभिहितः। अथ षष्ठ एकादशरात्रोऽभिधीयते। तमेतं विधत्ते—

ऋतवो वा इति। वसन्ताद्यृतवभिमानिनो देवाः पुरा प्रजामिच्छन्तोऽपि नालभन्त। ते चतुर्विधां कामनामकुर्वत। प्रजां स्रष्टुं समर्थाः स्यामेत्येका कामना। ततोऽवरोद्धुं नियन्तुं समर्थाः स्यामेति द्वितीया कामना। तत उत्पादनेन प्रजां लभेमहीति तृतीया कामना। ततो बह्वीभिः प्रशस्ताभिश्च प्रजाभिर्युक्ता अवतिष्ठमेति चतुर्थी कामना। तेषामृतूनामेकादशरात्रेण तत्सर्वं सिद्धम्। ततस्ते वसन्ताद्या ऋतवोऽभवन्। प्रजारूपां भूतिमैश्वर्यं प्राप्ताः। यस्मादेते सर्वे प्राणिन ऋतूनां पुत्रास्तस्मादार्तवा इत्युच्यन्ते। ऋतवदन्येषामपि यजमानानामेतत्सर्वं सिध्यति। अस्य चैकादशरात्रस्य सत्रलक्षणभूतयाऽपि चोदनया विधानात्तत्सत्रं द्रष्टव्यम्। नह्यत्र साध्यानां षड्त्रिंश इव धर्मातिदेशार्थोयमासिचोदना। तद्वदविदेश्यानां धर्मविशेषाणामश्रवणात्। तस्मादयमृतूनामेकादशरात्रः सत्रम्। द्वितीऽन्ये शाखान्तरविहिता एकादशरात्रा अहीनाः।

(एकादशरात्रकथनम्)

एतस्मिन्नृतूनामेकादशरात्रे प्रथममहर्विधत्ते-

ज्योतिरतिरात्र इति । पूर्वं ज्योतिर्गौरायुरितिज्योतिःशब्दाभिधेयो य एकाह उक्तस्तमेकाहमत्रातिरात्रसंस्थारूपं कुर्यात् । तथा सति प्रथममेव ज्योतिर्विधानात्स्वर्गं जिगमिषोर्यजमानस्य पुरस्तादेव प्रकाशः कृतो भवति । तच्च स्वर्गलोकप्रकाशनाय भवति ॥

अथ द्वितीयादिसप्तमान्तान्यहानि विधत्ते-

पृष्ठ्यः षडह इति । द्वादशाहे द्वितीयादेनमारभ्य सप्तमान्तेषु दिनेषु रथंतरादिभिः षड्भिः पृष्ठैर्युक्तानि षडहानि विहितानि । तानि चास्माभिः साध्यानां षड्रात्रप्रसङ्गेनोदाहृतानि । तथा संघः पृष्ठ्यः षडहः, सोऽत्र कर्तव्यः । तथा सति षट्संख्याद्वारेणर्तुप्राप्तिः । तद्द्वारा संवत्सरप्राप्तिः ॥

अथाष्टममहर्विधत्ते-

चतुर्विꣳश इति । चतुर्विंशस्तोमयुक्तो रथंतरसामा य उक्थ्यः सोऽयमत्राष्टममहः । तथा सति चतुर्विंशतिसंख्याद्वारा गायत्रीप्राप्तिः । तद्द्वारा च ब्रह्मवर्चसप्राप्तिः ॥

अथ नवममहर्विधत्ते-

चतुश्चत्वारिꣳश इति । चतुश्चत्वारिंशस्तोमयुक्तो बृहद्रथंतरसामा य उक्थ्यः सोऽयमत्र नवममहः । तदनुष्ठानेन संख्याद्वारा त्रिष्टुप्प्राप्तिः । तद्द्वारा चेन्द्रियप्राप्तिः ॥

अथ दशममहर्विधत्ते-

अष्टाचत्वारिꣳश इति । अष्टाचत्वारिंशस्तोमयुक्तो बृहत्सामा य उक्थ्यः सोऽयमत्र दशममहः । तेन संख्याद्वारा जगतीं प्राप्य तद्द्वारा पशुषु प्रतितिष्ठन्ति । तान्येतानि त्रीण्यहानि सूत्रकारेण स्पष्टमुदाहृतानि-' ततस्त्रींश्छन्दोमानुक्थ्यानन्वहमुपयन्ति चतुर्विंशं चतुश्चत्वारिंशमष्टाचत्वारिंशमिति, रथंतरसामा प्रथमो बृहद्रथंतरसामा द्वितीयो बृहत्सामा तृतीय.' इति । छन्दोभिर्गायत्रीत्रिष्टुब्जगतीभिरक्षरसंख्याद्वारा मीयन्ते परिच्छिद्यन्त इति चतुर्विंशादिस्तोमाश्छन्दोमाः । तत्र चतुर्विंशस्तोमस्य विष्टुतिः सामब्राह्मण एवमाम्नायते-' अष्टाभ्यो हिं करोति स तिसृभिः स चतसृभिः स एकया, अष्टाभ्यो हिं करोति स एकया स तिसृभिः स चतसृभिः, अष्टाभ्यो हिं करोति स चतसृभिः स एकया स तिसृभिः, चतुर्विंशो वै स्तोमो यदष्टाभ्यो हिं करोत्यष्टाशफाः पशवः ' इति ।

(एकादशरात्रकथनम्)

स एकस्मिंस्तुचे प्रथमपर्याये प्रथमामृचं त्रिः पठेत् । द्वितीयां चतुः पठेत् । तृतीयां सकृत्पठेत् । द्वितीयपर्याये सकृत्त्रिश्चतुश्चेति क्रमः । तृतीयपर्याये चतुः सकृत्त्रिश्चेति क्रमः । चतुश्चत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते—' पञ्चदशभ्यो हिं करोति स तिसृभिः स एकादशभिः स एकया, चतुर्दशभ्यो हिं करोति स एकया स तिसृभिः स दशभिः, पञ्चदशभ्यो हिं करोति स एकादशभिः स एकया स तिसृभिः ' इति । अत्र प्रथमपर्याये त्रिरेकादशकृत्वः सकृदितिक्रमः । द्वितीयपर्याये सकृत्त्रिर्दशकृत्वः । तृतीयपर्याये एकादशकृत्वः सकृत्त्रिः । अष्टाचत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते—' षोडशभ्यो हिं करोति स तिसृभिः स द्वादशभिः स एकया, षोडशभ्यो हिं करोति स एकया स तिसृभिः स द्वादशभिः, षोडशभ्यो हिं करोति स द्वादशभिः स एकया स तिसृभिः, अन्तो वा अष्टाचत्वारिंशः पशवश्छन्दोमाः ' इति । अत्र प्रथमपर्याये त्रिर्द्वादशकृत्वः सकृत् । द्वितीयपर्याये सकृत्त्रिर्द्वादशकृत्वः । तृतीयपर्याये द्वादशकृत्वः सकृत्त्रिः । एवं विंशैश्छन्दोमैरष्टमनवमदशमान्यहानि निष्पाद्यानि ।

वक्ष्यमाणमेकादशमप्यहर्हृदि निधाय तेन सहितमेकादशरात्रं प्रशंसति—

एकादशरात्र इति । अस्य क्रतोर्द्रष्टारो वसन्ताद्यृतुदेवताः(वाः) पञ्चसंख्याकास्तैर्दैवैः संपादिताः पुष्पोद्गमादय ऋतुसंबन्धिनः स्वभावाः पञ्चसंख्याकाः। एवं मिलित्वा दश संपन्नाः । संवत्सर एकादशः । एतेन सर्वेष्वेकादशरात्रानुष्ठानेन प्रतिष्ठां प्राप्य पश्वात्मजां प्राप्नुवन्ति ।

अथैकादशमहर्विधत्ते—

अतिरात्राविति । एकोनविंशस्तोमयुक्तो योऽयमतिरात्र एकाहविशेषः सोऽयमत्रैकादशमहः । ज्योतिरतिरात्रो भवतीत्युक्तेन प्रथमेनाहना सह निर्देशादतिरात्राविति द्विवचननिर्देशः । सत्रलिङ्गस्योभयतोऽतिरात्रत्वस्य ख्यापनाय प्रजासाधनस्य क्रतोरुभयतोऽतिरात्रत्वे सति फलभूतायाः प्रजाया उभयतो रक्षा परिगृहीता भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

---

१ क. घ ङ. च. एता । २ क. घ ङ. च °शाः पं° ।

(अथ सप्तमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः)।

ऐन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्त यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायाꣳसं कनीयानतिं क्रामत्यैन्द्रवायवाग्रान्गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽमयति प्राण ऐन्द्रवायवः प्राणेनवैनꣳ समर्धयति मैत्रावरुणाग्रान्गृह्णीरन्येषां दीक्षितानां प्रमीयेत (१) प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परिहरन्त आश्विनाग्रान्गृह्णीताऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्येतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परिणयतः शुक्राग्रान्गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः (२) श्रियै गत्वा नि वर्ततेऽन्तादेवान्तमा रभते न ततः पापीयान्भवति मन्थ्यग्रान्गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्छत्याग्रयणाग्रान्गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यः (३) भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान्

(द्वादशरात्रकथनम्)

यान्भवत्युक्थ्यांग्रान्गृह्णातीमे वै सर्वेषां वा एतत्पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै (४) सरस्वती वाचैवैनमति प्र युङ्क्ते मा त्वत्क्षेत्र ण्यरणानि गन्मेत्याह मृत्यावै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान्ग्रहान्गृह्णीयादामयाविनः प्राणान्वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान्ग्रहान्गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत्प्राणान्वा एतर्हि प्रजानाꣳ शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक्प्र वर्षति (५) ॥

(प्रमीयेत मनुष्यं क्रुध्यते यस्य पिता पितामहः पुण्यो वाग्वा एव पूर्णान्ग्रहान्पञ्चविꣳशतिश्च) ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके एकादशरात्रोऽभिहितः । अथ सप्तममारभ्य दशमान्तेषु चतुर्ष्वनुवाकेषु द्वादशरात्रोऽभिधीयते । तत्रास्मिन्सप्तमे काम्यग्रहानुष्ठानप्रकारा उच्यन्ते ।

तत्र प्रथममेकं प्रकारं विधत्ते—

ऐन्द्रवायवाग्रानिति । पूर्वे पितृपितामहादयो यादृश आचारे प्रवृत्तास्तादृश एवाऽऽचारे पुत्रपौत्रादीनां प्रजानां च प्रवृत्तिर्यथापूर्वत्वम् । एतत्कामय-

मानो द्विदेवत्यग्रहेष्वादावैन्द्रवायवग्रहं गृह्णीयात् । यद्यपि नित्यप्रयोगेऽपि तदग्रत्वमस्ति तथाऽपि कामसंयोगार्थं पुनर्विधानम् । यथाऽग्निहोत्रे दध्ना जुहो-तीति सत्यपि नित्यविधा दध्नेन्द्रियकामस्येति पुनर्विधानं तद्वत् । यज्ञस्य सम्य-क्प्रवृत्त्या तत्फलभूतानां प्रजानां प्रवृत्तिः समीचीना भवति । यज्ञस्य विपर्यये प्रजानामपि विपर्ययो भवति । तस्मादैन्द्रवायवाग्रत्वे प्रजा यथापूर्वमेव प्रवर्तन्ते। न तु ज्यायांसं पितरं पितामहं वा कनीयान्कश्चिदप्यतिक्रामति ।

उक्तमेव प्रकारं रोगनिवृत्त्यर्थं विधत्ते—

ऐन्द्रवायवाग्रान्गृह्णीयादिति । यस्य पुरुषस्य रोगो भवति स प्राणेन वियुक्तो भवति, प्राणस्य निर्गन्तुमुद्युक्तत्वात् । **ऐन्द्रवायवस्य** प्राणरूपत्वं प्राण ऐन्द्रवायव इत्यादिश्रुतिबलादवगन्तव्यम् । वायुरपि हि प्राणविशेष एव । अत ऐन्द्रवायवस्य प्राथम्येन प्राणस्य समृद्धौ सत्यां रोगो निवर्तते ।

अथ नैमित्तिकं कंचिद्ग्रहपकारं विधत्ते—

मैत्रावरुणाग्रानिति । सत्ररूपे द्वादशाहे दीक्षितानां मध्ये यदि कश्चि-न्म्रियेत तदा तस्मिन्मरणं निमित्तीकृत्येतरे दीक्षिताः प्रथमं मैत्रावरुणं गृहीत्वा पश्चादैन्द्रवायवं प्रयुञ्जीरन् । सर्वैः सहानुष्ठातुमुपक्रान्तत्वादेकस्मिन्नपि मृते सत्य-न्येषां प्राणापानौ शिथिलाविव भवतः । मित्रावरुणयोः प्राणापानाभिमानि-त्वात्तदीयग्रहस्य प्राथम्ये सत्यादित एव प्राणापानौ परितः समादधते ।

अथापकर्षपरिहारार्थं प्रकारान्तरं विधत्ते—

आश्विनाग्रानिति । स्वयं सर्वेषामग्रजत्वेन पूज्यः सन्नप्यनुजवदवरो भूत्वा यः सर्वैस्तिरस्क्रियते सोऽयमानुजावरः । स चाऽऽश्विनं ग्रहं प्रथमं प्रयुज्य पश्चादैन्द्रवायवादीन्प्रयुञ्जीत। देवानां मध्येऽश्विनावानुजावरौ स्वयं देव-त्वेन पूज्यौ सन्तावपि भिषक्त्वेनावरत्वमापन्नौ । अत एवान्यत्राऽऽम्नातम् । 'अपूतौ वा इमौ मनुष्यचरौ भिषजाविति' इति । तथाविधावश्विनौ पश्चा-त्कालान्तरेऽग्रमिव पर्येतां श्रैष्ठ्यमेव प्राप्तवन्तौ । एतदपि तत्रैवाऽऽम्नातम्—'तौ बर्हिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन्' इति । एवं सति य आनु-जावरोऽस्त्येतस्य समानरूपभावत्वादश्विनौ देवता । तदीयग्रहस्याग्रत्वे सत्यश्व-नावेवैनं यजमानं श्रैष्ठ्यं प्रापयतः ॥

अथ प्रतिष्ठार्थं प्रकारान्तरं विधत्ते—

शुक्राग्रानिति । यो नष्टश्रीकः सन्पुनः प्रतिष्ठां कामयते सोऽयं शुक्रमादौ

(द्वादशरात्रकथनम्)

गृह्णीयादिति । दीप्तिमत्त्वादसावादित्यः शुक्रः । एष एव प्रकाशानामन्तः काष्ठाऽन्तिमः । न ह्यादित्यादधिकः प्रकाशोऽस्ति । अतः शुक्राग्रत्वेन मनुष्यश्रिया अन्तं काष्ठां प्राप्य पूर्वस्माद्दारिद्र्यान्निवर्तते । प्रकाशपरमकाष्ठारूपादादित्यादेव संपत्परमकाष्ठां प्राप्नोति । तत ऊर्ध्वं कदाचिदपि दरिद्रो न भवति ॥

अभिचारहेतुं प्रकारं विधत्ते—

मन्थ्यग्रानिति । अभिचरन्साग्निमादौ गृह्णीयात् । परस्याऽऽर्तत्वापादनादिदमार्तपात्रम् । तदग्रत्वेन वैरिणं मृत्युगृहीतं करोति । स च वैरी तदानीमेव मृत्युं प्राप्नोति ॥

स्वकीयपित्रादिसमानोत्कर्षप्राप्त्यर्थं प्रकारान्तरं विधत्ते—

आग्रयणाग्रानिति । यस्य यजमानस्य पितृपितामहौ धनविद्यादिभिर्गुणैरुत्कृष्टौ, स्वयं तु तमुत्कर्षं यदि नाऽऽप्नोति, तादृश आग्रयणं प्रथमं गृह्णीयात् । पित्रादेरुत्कर्षे सति स्वयमुत्कर्षहीनः सभामध्ये वाक्पाण्डित्येनेतरव्यवहारेष्विन्द्रियसामर्थ्येन वियुक्तः, आग्रयणस्तु यज्ञस्योरःप्रदेशवत्सामर्थ्याधारो वागिन्द्रियवदुत्कर्षहेतुश्च । अतस्तदग्रत्वेनैनं यजमानं सदा पाण्डित्यरूपया वाचा व्यवहारान्तरसामर्थ्यरूपेणेन्द्रियेण च समृद्धं करोति । तत ऊर्ध्वं कदाचिदपि तदुभयहीनो न भवति ॥

परकीयाभिचारनिवृत्त्यर्थं प्रकान्तरं विधत्ते—

उक्थ्याग्रानिति । यान्येतानि सोमपात्राणि सन्ति तेषां मध्ये यदुक्थ्यपात्रं तदिन्द्रियसामर्थ्योपेतम् । अतस्तस्याग्रत्वे सत्यभिचारकर्तारमेनं सर्वेणापि सामर्थ्येनातिक्रम्य स्वयमनुतिष्ठति ॥

अत्र मन्त्रविशेषं विधत्ते—

सरस्वत्यभि न इति । सोमरसग्रहणात्पूर्वं पठितव्या पुरोरुक्तां च पुरोरुचमत्र सरस्वतीत्यादिकां पठेत् । मन्त्रोक्ता सरस्वती वाग्देवता । अतो वाचैवैनमभिचरितारमतिक्रम्यानुतिष्ठति । इयमृग्ब्राह्मणग्रन्थे द्वितीयकाण्ड उपहोमाख्ये प्रपाठक एवमाम्नाता—

' सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या च । मा त्वत्क्षेत्राण्यरणानि गन्म ' । इति ॥

अस्यायमर्थः—हे सरस्वति नोऽस्मान्वस्यो वरिष्ठं प्राणधारणरूपं जीवनमभिनेष्याभिमुख्येन प्रापय । मा पस्फरीरस्मान्मा हिंसीः । मा न आधक्, अ-

स्मान्मा धाक्षीः । अपि तु सरूपा सरूपेण वेशा च प्रवेशानि(नी)पतया च नेऽस्माञ्जुषस्वास्मासु प्रविश्य सख्यं कुर्वित्यर्थः । किंच त्वत्प्रसादादरणाणि क्षेत्राणि अरमणीयानि स्थलानि मा गन्म मा प्राप्नुयामेति ॥

तमिमं चतुर्थपादमनूद्य व्याचष्टे—

मा त्वत्क्षेत्राणीति । तेन मन्त्रपाठेन मृत्युसंबन्धीन्यरणानि यानि स्थानानि तानि न प्रामोति न प्रमीयत इत्यर्थः ॥

अथ रोगपरिहाराय प्रकारान्तरं विधत्ते—

पूर्णान्ग्रहानिति । यान्यैन्द्रवायवादीनि पात्राणि तानि सोमरसेन पूर्णानि यथा भवन्ति तथा रोगनिवृत्त्यर्थं गृह्णीयात् । यस्य रोगो वर्तते तस्य प्राणाञ्शुक्रशोक उपद्रवः प्राप्नोति । ततः पूर्णानां ग्रहाणां प्राणरूपत्वादस्य यजमानस्य प्राणान्पूर्णग्रहैः शोका-मोचयति । तथा सति यद्यपि मुहूर्तमात्रं गतप्राणस्तथाऽपि पुनर्जीवत्येव ।

एतमेव प्रकारं पुनरपि वृष्ट्यर्थं विधत्ते—

पूर्णान्ग्रहान्गृह्णीयादिति । यदा स्वकाले वृष्टिर्न भवेत्तदा वृष्ट्यर्थमैन्द्रवायवादिपात्राणि सोमरसेन पूरणीयानि । यदा वृष्ट्यभावस्तदा प्रजानां प्राणा अन्नाभावाच्छोकेन प्राप्यन्ते । ग्रहपूरणेन शोको निवर्तते । तदानीमेव यकर्षेण वर्षणात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः)।

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमह-
स्तस्मात्प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैन-
मायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमह-
स्तस्माद्द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने

---

१ ख. व्यथ्यन्ते ।

(द्वादशरात्रकथनम्)

गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात्तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै (१) यज्ञमानपय्यच्छन्दाꣳस्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदꣳशन्तत एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथंतरो वा ऐन्द्रवायवो राथंतरं पञ्चममहस्तस्मात्पञ्चमेऽहन्नै (२) ऐन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतꣳ षष्ठमहस्तस्मात्षष्ठेऽहन्शुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यज्ञमानपय्यच्छन्दाꣳस्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदꣳशन्तत एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः (३) शुक्रो यत्सप्तमेऽहन्शुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येतत् (४) वै तृतीयं यज्ञमानपय्यच्छन्दाꣳस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदꣳशन्तत एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु

(अनुवाकक्रमणम्)

पर्यावर्तन्ते पथो वा एतेऽध्वपथेन यन्ति येऽन्येनै-
न्द्रवायवात्प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य
यद्दर्शममहर्दर्शमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्य (५)
एवान्तं गत्वा पथात्पन्थामपि यन्त्यथो यथा वहीं-
यसा प्रतिसारं वहन्ति तादृगेव तच्छन्दांस्यन्योऽ-
न्यस्य लोकमभ्यध्यायन्त्यन्येतेनैव देवा व्यवा-
हयन्नैन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमह-
स्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने
नवमेऽहन्नैन्द्रवायवो गृह्यत शुक्रस्य वा एतदायतनं
यत्पञ्चममु (६) अहस्तस्मिन्नैन्द्रवायवो गृह्यते
तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहञ्छुक्रो गृह्यत
आग्रयणस्य वा एतदायतनं यत्षष्ठमहस्तस्मिञ्छुक्रो
गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो
गृह्यते छन्दांस्येव तद्विवाहयति य वस्यसो विवा-
हमाप्नोति य एवं वेदार्धो देवतास्य एव यज्ञे संविदं
दधाति तस्मादिदमन्योऽन्यस्मै ददाति (७) ॥

(एतदै पञ्चमेऽहन्त्रैष्टुभ एतद्वै यज्ञस्य पञ्चमन्यस्मा एकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमेऽनुवाके द्वादशाहगताः काम्यग्रहपकारा उक्ताः । स च द्वादशाहो विविधः—समूढो व्यूढश्च । तत्र समूढप्रकारः सूत्रक्रमेण दर्शितः—' व्यनीकां व्याख्यास्याम ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ दर्शं चाहः । अथेतरेषां नवा-नामैन्द्रवायवाग्रं पथममहः । अथ शुक्राग्रस्याऽऽग्रयणाग्रमेवं विहिता विरूप-

नीका परिवर्तते यद्व्यूढः' इति । एवं समूढप्रकारमुक्त्वा व्यूढप्रकारोऽपि तेनैव दर्शितः—'व्यूढ त्वैन्द्रवायवदाग्नौ प्रायणीयेऽहनीयावथेतरेषां दशानामैन्द्रवायवाग्र प्रथममहः । अथ शुक्राग्रथ द्वे अथ ग्रयणाग्रे अथैन्द्रवायवाग्रमथ द्वे शुक्राग्रे अथाऽऽश्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे' इति । तत्रास्मिन्नष्टमेऽनुवाके व्यूढप्रकारोऽभिधीयते ।

तत्र प्रायणीयाद्यहर्वायौ परित्यज्य यानीतराण्यहानि प्रथमवर्तीनि दशसंख्याकानि तेषु प्रथमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

गायत्रो वा इति । यानि मुख्यानि उक्थ्यानि गायत्रीत्रिष्टुब्जगतीरूपाणि तेषां मध्ये गायत्री प्रथमा । अग्रत्वेन चात्रैन्द्रवायवशुक्राग्रयणा विकल्प्यन्ते । तेषां च मध्य ऐन्द्रवायवः प्राथम्येन प्रकृतावाम्नातः । ततः प्राथम्यसाम्यादैन्द्रवायवो गायत्रः । निरूपणीयानां दशानामहनां मध्ये यत्प्रायणीयं प्रथममाख्यहस्तदपि प्राथम्यस्य साम्याद्गायत्रम् । एवं च सति तस्मिन्प्रायणीये दशानां मध्ये प्रथमेऽहन्यैन्द्रवायव आदौ ग्रहीतव्यः । ऐन्द्रवायवस्य गायत्रत्वसाम्यात् । एवं च सति स्वसंबन्धिन्येवाऽऽयतने प्रथमाहःस्वरूपस्थाने तमैन्द्रवायवं गृह्णाति ।

अथ दशस्वहःसु द्वितीयेऽहनि शुक्राग्रत्वं विधत्ते—

त्रैष्टुभो वा इति । त्रिष्टुप्छन्दसः शुक्रस्य द्वितीयस्याहनश्च पूर्वन्यायेन द्वितीयत्वसाम्यं योजयित्वा व्याख्येयम् ।

अथ तृतीयेऽहन्याश्रयणाग्रत्वं विधत्ते—

जागतो वा इति । पूर्ववद्योजनीयम् ।

एतदेवाऽऽश्रयणाग्रत्वं प्रशंसति—

एतद्वै यज्ञमिति । यदाश्रयणाग्रं छन्दांस्याप्नोति गायत्र्यादिच्छन्दोरूपाणि त्रीण्यहानि व्याप्नोति त्रयाणामहनामनेनाऽऽश्रयणाग्रत्वेन समाप्तत्वादेतदेवाऽऽश्रयणाग्रत्वं यज्ञमापत्प्रथमत्र्यनीकारूपं त्रिरात्रं यज्ञं प्राप्नोति । त्रीण्यनीकान्यग्रत्वान्यैन्द्रवायवाग्रत्वशुक्रत्वग्रत्वाश्रयणाग्रत्वरूपाणि यस्यां क्रियायां सा क्रिया त्र्यनीका । तद्रूपं त्रिरात्रयज्ञोऽनेनाऽऽश्रयणाग्रत्वेन समाप्यते । किं चोत्तरस्मिंश्चतुर्थेऽहन्याश्रयण एवाऽऽद्यो गृह्यते । यस्मादेवं तस्मात्रयैवाऽऽश्रयणा-

---

१ ख. °कल्प्यन्ते

त्वे यज्ञमदृशंस्त्रिरात्रसमाप्तिं दृष्टवन्तस्तत एवाऽऽग्रयणाग्रत्वादेनं यज्ञं पुनः प्रयुक्तवान्भवति तस्मादिदं प्रशस्तम् ।

अथ चतुर्थेऽहन्याग्रयणाग्रत्वमेव विधत्ते—

जगन्मुखो वा इति । समूढे द्वादशाह व्यनीका त्रिरावृत्ता । तत्रैकाऽऽवृत्तिः प्रथमस्त्रिरात्रो द्वितीयाऽऽवृत्तिर्द्वितीयस्त्रिरात्रः । स च यद्यपि समूढे द्वादशाह ऐन्द्रवायवोपक्रमत्वादैन्द्रवायवस्य च गायत्रत्वाद्गायत्रीमुखो भवति, तथाऽप्यत्र जगन्मुखो जगत्युपक्रमः कर्तव्यः । आग्रयणाग्रश्च जागत इति पूर्वमेवोपपादितम् । तस्माच्चतुर्थेऽहन्याग्रयणाग्रत्वे गृह्यते सति स्वकीय एव स्थाने तद्गृहीतं भवति । अपि चाऽऽग्रयणाग्रत्वं स्वकीयमेव जगतीछन्दोऽनुसृत्य पुनरावृत्तं भवति ।

अथ पञ्चमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

राथंतरो वा इति । प्रकृतिरूपे ज्योतिष्टोमे यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्गृह्णीयादित्यैन्द्रवायवाग्रत्वं प्रति रथंतरसाम्नो निमित्तत्वश्रवणादैन्द्रवायवस्य राथंतरत्वम् । पञ्चमस्याह्नो रथंतरसंबन्धस्य शाखान्तरे प्रसिद्धत्वाद्राथंतरत्वम् । तस्मादैन्द्रवायवस्याह्नश्च राथंतरत्वसाम्यात्पञ्चमेऽहन्यैन्द्रवायवः प्रथम गृह्यते । तथा सत्येनमैन्द्रवायवं स्वकीय एव स्थाने गृह्णाति ।

अथ षष्ठेऽहनि शुक्राग्रत्वं विधत्ते—

बार्हतो वा इति । शुक्रग्रहस्य षष्ठस्याह्नश्च बृहत्सामसंबन्धः शाखान्तरे प्रसिद्धः । शेषं पूर्ववद्व्याख्येयम् ॥

तदेतच्छुक्राग्रत्वं प्रशंसति—

एतद्वै द्वितीयामिति । व्यनीकाया द्वितीयावृत्तिरूपस्त्रिरात्रो द्वितीयो यज्ञः । शेषमाग्रयणवाक्यवद्व्याख्येयम् ।

अथ सप्तमेऽहन्यपि शुक्राग्रत्वमेव विधत्ते—

त्रिष्टुङ्मुखो वा इति । यद्यपि समूढे तृतीयस्य त्रिरात्रस्याऽऽद्येऽहन्यैन्द्रवायवाग्रत्वाद्गायत्रीमुख एवायं त्रिरात्रस्तथाऽप्यत्र त्रिष्टुङ्मुखः कर्तव्यः । शुक्रश्च त्रैष्टुभ इति पूर्वमेवोपपादितम् । तस्मात्सप्तमेऽहनि शुक्रः प्रथमो गृह्यते । शेषं पूर्ववद्व्याख्येयम् ।

अथाष्टमेऽहन्याग्रयणाग्रत्वं विधत्ते—

(द्वादशरात्रकथनम्)

वाग्वा आग्रयण इति। षष्ठकाण्ड आग्रयणग्रहब्राह्मणे वाग्वै देवेभ्योऽपाक्रामदित्युपक्रम्य साऽऽग्रयणं प्रयागच्छदित्युक्तत्वादाग्रयणस्य वायूपत्वमर्थवादान्तरे द्रष्टव्यम। अतो वायूपत्वसामान्यादृष्टमेऽहन्नाग्रयणः प्रथमं प्रयोक्तव्यः।

अथ नवमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

प्राणो वा इति। प्रकृतो ग्रहब्राह्मणे वाग्वा एषा यदैन्द्रवायव इत्युक्त्वाद्वागिन्द्रियस्य च प्राणावान्तरभेदत्वादैन्द्रवायवस्य प्राणत्वम्। नवमस्याहनोऽपि प्राणत्वेन स्तुतिरन्यत्र द्रष्टव्या। अतः प्राणत्वसाम्यान्नवमेऽहन्यैन्द्रवायवः प्रथमं ग्रहीतव्यः।

तदेतदैन्द्रवायवाग्रत्वं प्रशंसति—

एतद्वै तृतीयमिति। त्र्यनीकायास्तृतीयावृत्तिरूपस्त्रिरात्रस्तृतीयो यज्ञः। शेषमाग्रयणवाक्यवद्व्याख्येयम्।

अथ दशमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

पथो वा एत इति। द्वादशाहस्य प्रायणीयोदयनीययोर्मध्यवर्ती योऽयं दशरात्रस्तं दशरात्रं ये यजमाना ऐन्द्रवायवाग्रत्वादन्येन शुक्राग्रत्वादिना प्रतिपद्यन्ते प्रारभन्ते त एते यजमानाः पथः सकाशाद्भ्रष्टा अविकेनापथा कुमार्गेण गच्छन्ति। तस्मादैन्द्रवायवाग्रत्वेनैव दशरात्र उपक्रान्तव्यः। तथैव ह्यनुवाकादौ वर्णितम्। यदेतद्दशममहरस्ति स एष ऐन्द्रवायवाग्रत्वेनोपक्रान्तस्य दशरात्ररूपस्य यज्ञस्यान्तः खलु वै समाप्तिभूमिरेव। ततः प्रथमदिनवदन्तिमदिनेऽप्यैन्द्रवायव एव प्रथमं ग्रहीतव्यः। तथा सति यज्ञस्य परिसमाप्तिपर्यन्तं कुमार्गं परित्यज्य सम्यङ्मार्गमेव प्राप्नुवन्ति। अपि च यथा लोके वहीयसा प्रौढभारवाहिना बलीवर्दसमूहेन युक्ता वणिजः प्रतिसारं वहन्ति पार्श्वद्वयगतान्क्षुद्रमार्गान्परित्यज्य प्रसिद्ध एव राजमार्गे बलीवर्दः पङ्क्त्याकारो यथा भवति तथा नयन्ति तद्वदत्राप्यैन्द्रवायवोपक्रमोपसंहारौ द्रष्टव्यौ।

तमिममैन्द्रवायवाग्रत्वादिरूपं व्यूढप्रकारं लोकप्रसिद्धविवाहसाम्येन प्रशंसति—

छन्दाꣳसीति। यथा लोके काश्यपगोत्रोत्पन्नाः पुरुषा विवाहार्थं भारद्वाजगोत्रोत्पन्नां कन्यकामभितो विचारयन्ति, भारद्वाजगोत्रोत्पन्नाश्चेतरां विचार्य तद्वदेव विवाहं कुर्वन्ति, एवमत्रापि च्छन्दोभिमानिनो देवाः स्वकीयानामैन्द्रवा-

यवाग्रत्वादीनामन्योन्यस्य स्थानमभिध्यायन्तस्तानि सर्वाण्यैन्द्रवायवत्वादीन्ये-तेनैव पूर्वोक्तप्रकारेण विवाहयन्ति विवाहं कारयन्ति स्थानविपर्यासेन प्रापय-न्तीत्यर्थः ।

तथैन्द्रवायवाग्रयणयोरन्योन्यस्थानविपर्यासं दर्शयति—

ऐन्द्रवायवस्येति । समूढो हि द्वादशाहो व्यूढस्य प्रकृतिः । समूढे हि प्रायणीयोदयनीयदशमाहानि परित्यज्यावशिष्टेषु नवसु दिनेषु त्र्यनीका त्रिरा-वृत्ता । तत्र द्वितीयायास्त्र्यनीकाया मध्यवर्तिना नवरात्रस्य चतुर्थेऽहन्युक्तान्त-व्यत्वात्तदहरैन्द्रवायवस्याऽऽयतनं, तस्मिन्नहनि पूर्वोक्तव्यूढप्रकारेण द्वितीय आग्रयणो गृहीतः । नवमं चाहः समूढ आग्रयणस्याऽऽयतनम् । तत्र व्यूढप्र-कारेण द्वितीय ऐन्द्रवायवो गृहीतः । सोऽयमैन्द्रवायवाग्रयणयोः परस्परं विवाहः ।

अथ शुक्रैन्द्रवायवयोः परस्परं विवाहं दर्शयति—

शुक्रस्य वा इति । समूढगते नवरात्रे यत्सप्तमहस्तदेतद्द्वितीयायास्त्र्य-नीकाया मध्यवर्तित्वाच्छुक्रस्याऽऽयतनम् । तस्मिन्नहनि व्यूढप्रकारेणैन्द्रवायवो गृहीतः । यत्तु सप्तमहस्तदेतत्तृतीयायास्त्र्यनीकायाः प्रथमदिनत्वादैन्द्रवाय-वस्याऽऽयतनम् । तस्मिन्नहनि द्वितीयवारमावर्त्यमानः शुक्रो गृहीतः । सोऽयं शुक्रैन्द्रवायवयोर्विवाहः ।

अथ शुक्राग्रयणाग्रयोः परस्परं विवाहं दर्शयति—

आग्रयणस्येति । यदेतत्षष्ठमहस्तदेतद्द्वितीयायास्त्र्यनीकाया अन्तिम-त्वादाग्रयणस्याऽऽयतनं, तस्मिन्नहनि व्यूढप्रकारेणाऽऽवर्त्यमानः प्रथमः शुक्रो गृहीतः । यत्त्वष्टमहस्तदेतत्तृतीयायास्त्र्यनीकाया मध्यवर्तित्वाच्छुक्रस्याऽऽ-यतनं, तस्मिन्नहनि व्यूढप्रकारेणाऽऽग्रयणो गृहीतः । सोऽयं शुक्राग्रयणयो-र्विवाहः ।

एतद्वेदनं प्रशंसति—

छन्दाꣳस्येवेति । यः पुमानेवमैन्द्रवायवाग्रयत्वादीनां विवाहं जानाति स तेन वेदनेन च्छन्दोदेवतानामेव विवाहं कृतवान्भवति । स्वयं च धनिकतमा-त्कुलाद्विवाहं प्राप्नोति । अपि च यज्ञानुष्ठानकाले देवताविषयमभिज्ञानं दधाति धारयति । यस्मादेवं छन्दसां विवाहः प्रवृत्तस्तस्माल्लोकेऽपीदं कन्यकारूपमपत्य-मन्यः पिताऽन्यस्मै जामात्रे ददाति ।

(द्वादशरात्रकथनम्)

अथ मीमांसा -

दशमाध्यायस्य पञ्चमपादे त्रयोविंशाधिकरणे चिन्तितम्—

त्र्यनीकायमैन्द्रवायवशुक्राग्रानुवादता।
परिसंख्या वाऽर्थवादो वा विधिर्वा न हि त्रयम्॥
वैयर्थ्येन त्रिदोषत्वाल्लक्षणापत्तितस्तथा।
विधिराग्रयणाग्रत्व इवानैमित्तिको हि सः॥

अस्ति द्वादशाहे त्र्यनीका। ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः। अथेतरेषां नवानामह्नामैन्द्रवायवाग्रं प्रथममहः। अथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमिति। तत्र द्वादशाहगतेषु द्वितीयतृतीयचतुर्थेषु त्रिष्वहःसु क्रमेणैन्द्रवायवाग्रत्वशुक्राग्रत्वाग्रयणाग्रत्वानि विहितानि। तेष्वाद्यं रथंतरनिमित्तम्। द्वितीयं बृहन्निमित्तम्। एतच्च प्रकृतौ व्यवस्थितम्। तदुभयमत्र चोदकेन प्राप्तम्। तत्र चतुर्धा संशयः—अनुवादो वा परिसंख्या वाऽर्थवादो वा विधिर्वेति। तत्र प्राप्तत्वादनुवाद इति चेत्। न, वैयर्थ्यापत्तेः। तर्हि गुणान्तरपरिसंख्याऽस्त्विति चेत्। न, दोषप्रसक्तेः। चतुर्थेऽह्न्यप्राप्तस्याऽऽग्रयणाग्रत्वस्य विधितस्तस्य प्रशंसार्थोऽयमर्थवाद इति चेन्न। लक्षणावृत्तिप्रसङ्गात्। तस्मादाग्रयणाग्रत्वे यथा विधिस्तथेतरयोरपि द्रष्टव्यः। न च प्राप्तत्वादविधिरिति वाच्यम्। तस्य विधेरनैमित्तिकत्वाभ्युपगमात्। रथंतरादिनिमित्तकयोरेव हि चोदकेन प्राप्तिः। प्रयोजनं तु द्वादशाहविकृतिषु यत्र क्वापि रथंतरादिनिमित्तत्वाभावेऽप्यैन्द्रवायवाग्रत्वसिद्धिः।

तत्रैवान्यच्चिन्तितम्—

व्यूढोऽपि प्रकृतिः किं वा विकृतिः स्याद्धि पृष्ठवत्।
विधिसाम्यादादिमोऽन्त्यो लिङ्गात्कामे विधेरपि॥

द्विविधो हि द्वादशाहः—समूढो व्यूढश्च। तत्र समूढः पूर्वमुदाहृतः। अथ व्यूढ उदाह्रियते—ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ। अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः। अथ शुक्राग्रमथ द्वे आग्रयणाग्रे। अथैन्द्रवायवाग्रमथ द्वे शुक्राग्रे अथाऽऽग्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे इति। तत्र समूढस्य तावत्प्रकृतित्वमविवादम्। तद्वद्व्यूढोऽपि किं प्रकृतिः किं वा विकृतिरिति संशये

१ ख. °त्कामवि°।

प्रकृतिरिति प्राप्तम् । कुतः । विधिसाम्यात् । यथा समूढप्रकारः कृत्वर्थो विहितस्तथा व्यूढप्रकारोऽपि । न चात्र कश्चिद्विशेषोऽस्ति, येन तयोः प्रकृतिविकृतिभावो निश्चीयेत । न च प्रकारद्वयस्य प्रकृतित्वमदृष्टचरम् । रथंतरबृहत्पृष्टयोर्ज्योतिष्टोमप्रकारयोस्तदृर्शनादिति पूर्वः पक्षः । व्यूढः समूढस्य विकृतिः । कुतः । लिङ्गदर्शनात् । 'ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः' इति व्यूढे श्रूयते । एतच्च विकृतित्वे सति भवति नान्यथा । तथा हि व्यूढे प्रायणीयोदयनीयव्यतिरिक्तेषु दशस्वहःसु यच्चतुर्थं तदाग्रयणाग्रत्वादैन्द्रवायवस्याऽऽयतनम् । समूढे तु तदहर्नवानामह्ना मध्ये द्वितीयत्रिकादित्वादैन्द्रवायवाग्रम् । तच्च व्यूढस्य विकृतिता[1] चोदकेन प्राप्यमाणं विधित्सिताग्रयणाग्रवस्तुतयेऽनूद्यत इति युक्तम् । किं च यः कामयेत बहु स्या प्रजायेयेति कामाय व्यूढो विधीयते । तथा च सति समूढवत्कृत्वर्थे विध्यभावाद्यंतरबृहत्पृष्ठवैषम्येण विकल्पितप्रकृतित्वं नास्ति । ततः समूढस्य द्वादशाहस्य विकृतिः । अहर्गणेष्वनयोरन्यतरस्यातिदेशः पूर्वपक्षिणः प्रयोजनम् । समूढस्यैवातिदेशः सिद्धान्तः।

तत्रैवान्यच्चिन्तितम्—

व्यूढे भक्षादिमन्त्राणामर्थानां च व्यतिक्रमः ।
मन्त्राणामेव वाऽऽद्यः स्याद्विशेषेण कीर्तनात् ॥
छन्दसां व्यत्ययः प्रोक्तो नार्थानां तेन मन्त्रगाः ।
गायत्र्याद्या विपर्यास्या अर्थपूर्तिः प्रशस्यते ॥

व्यूढे द्वादशाहे भक्षपवमानतदुभयसं[+]त्रारिधिकपालानि चोदकप्राप्तानि । तत्र भक्षमन्त्रेषु सवनत्रयगतेषु गायत्रीछन्दस्त्रिष्टुब्छन्दसो जगतीछन्दस इति पदत्रयं श्रुतम् । तथा पवमानत्रयविषयेऽन्यारोहमन्त्रेषु गायत्रीछन्दास्त्रिष्टुप्छन्दा जगतीछन्दा इति श्रुतम् । तथा परिधेरपि[2] कर्मण्यर्थवादे पठ्यते—'गायत्रो मध्यमः परिधिस्त्रैष्टुभो दक्षिणो जागत उत्तरः' इति । तथा कपालविषयं वाक्यं पठ्यते—'अष्टाकपालः प्राःसवनीय एकादशकपाले माध्यंदिनीयो द्वादशकपालस्तृती(स्तार्ती)यसवनिकः' इति । अत्राष्टत्वादिभिस्त्रिभिः संख्याभिर्गायत्र्यादिच्छन्दांसि तत्तत्पादाक्षरस्मृतिद्वारेणोपस्थाप्यन्ते । एवं स्थिते

+ न्यायमालायां मन्त्रेतिपदं न विद्यते ।

१ स. च. °कृतिषु अ°। २ क. घ ड. °यत्रच्छ°। ३ क. घ. ड. °यत्रच्छ°।

(द्वादशरात्रकथनम्)

सति व्यूहपकरणे छन्दोव्यतिक्रमः पठ्यते— 'छन्दांसि वा अन्योन्यस्य लोकमभ्यध्यायन्, गायत्री त्रिष्टुभमत्रिष्टुब्जगत्या जगती गायत्र्याः' इति। तत्र संशयः—सोऽयं छन्दोव्यतिक्रमो भक्षपवमानपरिधिकपालरूपाणामर्थानामुभयविधमन्त्रगतच्छन्दोवाचिशब्दानां च कर्तव्यः, किं वा तेषां शब्दानामेवेति। तत्र मन्त्रगतानामेवेति विशेषाश्रवणात्सर्वत्र व्यतिक्रम इत्याद्यः पक्षः। तेन गायत्रीशब्दनिर्दिष्टः प्रातःसवनीयो भक्षस्त्रिष्टुप्शब्दितस्य माध्यंदिनीयस्य भक्षस्य स्थाने[1]। स च तृतीयसवनीयस्य [2]., सोऽपि प्रातःसवनीयस्य स्थाने। तथा बहिष्पवमानो माध्यंदिनपवमान, माध्यंदिनपवमानस्तृतीयसवने। आर्भवपवमानः प्रातःसवने। तथा मध्यमः स्थविष्ठः परिधिर्दक्षिणतः, अणीयान्द्राघीयानुत्तरतः, अणिष्ठो ह्रसिष्ठो मध्यतः। तथाऽष्टाकपालो माध्यंदिने सवने, एकादशकपालस्तृतीयसवने, द्वादशकपालः प्रातःसवने। सोऽयमर्थव्यतिक्रमः। मन्त्रद्वयशब्देष्वेवं योजनीयमिति प्राप्ते ब्रूमः—छन्दांसीति वाक्येऽर्थानां व्यतिक्रमो नोक्तः। अतो मन्त्रगतगायत्र्यादिशब्दानामेव व्यतिक्रमः। यस्त्वर्थेषु गायत्र्यादिशब्दप्रयोगः स प्रशंसार्थः। भक्षाद्यर्थानां पुरुषच्छन्दस्त्वाभावादिति सिद्धान्तः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

अथ सप्तमाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः।

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति

---

१ क. ख. ङ. °यत्रश°। २ ख. च °ने। माध्यंदिनीयो जागतस्य स्थाने, जागतो गायत्रस्य प्रातःसवनिकस्य स्थाने। त°।

चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ यत् (१) अग्निष्टोमं पूर्वं प्रयुञ्जीरन्बर्हिर्वा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्रयुज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति यो वे गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गं लोकम् २) एति प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत्प्राणानेव स्पृणोति सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात्पृच्छन्ति किमेते सत्रिण इति प्रियः प्रजानामृत्विजो भवति य एवं वेद (३) ॥

(अग्निष्टोमौ यत्सुवर्गं लोक प्रियः प्रजानां पञ्च च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके द्वादशाहस्य व्यूढप्रकारो निरूपितः । अथ नवमे द्वादशाहस्याहर्विशेषा उच्यन्ते ।

तत्राऽऽदौ द्वादशाहं विधत्ते—

प्रजापतिरिति । अथ प्रश्नोत्तरमुखेन(ण) प्रथममहर्विधत्ते—

ब्रह्मवादिनो वदन्तीति । अग्निष्टोमः प्रायणं प्रथममावी येषां सोमपा-

---

१ ख च 'भावि ये' ।

(द्वादशरात्रकथनम्)

गानां तेऽग्निष्टोमप्रायणाः। अत एवास्य काण्डस्याऽऽद्यानुवाकेऽभिहितम्—'तस्मादाहुर्ज्येष्ठयज्ञ इति'। इति। एवं सति तमग्निष्टोमं परित्यज्य द्वादशाहस्य प्रथमेऽहनि कस्मात्कारणादतिरात्र. प्रयुज्यत इति ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञा उत्तरमेवमाहुः—पुरुषस्थानीयस्य द्वादशाहयज्ञस्य चक्षुर्गोलकस्थानीयावतिरात्रौ। कनीनिकास्थानीयावग्निष्टोमौ। कृष्णमण्डलस्य मध्ये यदवान्तरं पृथक्शुक्लमण्डलमतिकृष्णं तद्दर्शनशक्तिस्थानं, सेयं कनीनिकेत्युच्यते। एवं सति यदि यजमानाः प्रथममग्निष्टोमं प्रयुञ्जीरंस्तदानीमाधरभूतं गोलकं विना बहिरेवाऽऽकाशप्रदेशे कनीनिके स्थापयेयुः। तस्मात्कारणादतिरात्र एव प्रथमेऽह्नि प्रयोक्तव्यः। तथा सति पुरुषरूपे द्वादशाहयज्ञे गोलकद्वयं प्रथमं स्थापयित्वा तन्मध्ये कनीनिकाद्वयं स्थापयन्ति।

तदेवं प्रथममहर्विधायानन्तरभावीनि दशाहानि पक्षिरूपं परिकल्प्य विधत्ते—

यो वै गायत्रीमिति। अष्टाक्षरपादां गायत्रीमष्टसंख्योपेतमुक्थरूपमहरष्टकं पक्षिरूपत्वं परिकल्प्य तद्रूपां गायत्रीत्युच्यते ज्योतीरूपौ पक्षौ यस्या गायत्र्याः सा ज्योतिःपक्षा। तादृशीं यो यजमानो वेद स यजमानः पक्षरूपं ज्योतिरेव स्वर्गमार्गप्रदर्शनाय भासकं दीपकं कृत्वा तेनानुष्ठितज्योतिरारब्धेन प्रकाशेन स्वर्गं प्राप्नोति। कौ तौ पक्षौ किं तस्याः पक्षिरूपाया गायत्र्याः स्वरूपमिति तदुभयमुच्यते—द्वादशाहस्य प्रायणीयोदयनीयाख्ये प्रथमोत्तमे अहनी विहाय मध्यवर्तिनो दशरात्रस्याऽऽद्यन्तयोरहनोरनुष्ठेयौ यावग्निष्टोमौ तौ पक्षस्थानीयौ। ये च तयोरग्निष्टोमयोरभ्यन्तरेऽष्टमरूपाकेऽहःस्वनुष्ठेया अष्टाबुक्थ्याः सोऽयमुक्थसंघः पक्षिरूपाया गायत्र्या आत्मा शरीरम्। एतादृशानि दशाहानि कुर्यादित्यर्थः। एषा वा इत्यादिः प्रतिषादितस्यार्थस्योपसंहारः।

सोऽयं द्वादशरात्रो द्विविधः—सत्ररूपोऽहीनरूपश्च। तत्र सत्ररूपं तावद्विधातुं प्रस्तौति—

प्रजापतिर्वा इति। योऽयं द्वादशरात्रोऽस्ति सोऽयं द्वादशभिः प्रकारैराविर्भूतः प्रजापतिरेव। तस्य च प्रजापतेः पक्षिरूपत्वं परिकल्प्यते। पूर्वं पक्षत्वेन निरूपितयोरग्निष्टोमयोः समीपवर्तिनो प्रथमद्वादशयोरहनोरनुष्ठेयौ प्रायणी-

---

१ ख. घ. ङ. च. पक्षरू°। २ ख °त्वेन प°। ३ क. ध. ङ. च °पाङ्गाय°।

योर्दर्शपौर्णमासौ तावपि पक्षाग्रस्थानीयत्वात्पक्षावेव । अग्निष्टोमस्तहितयोरतिरात्रयोः पक्षयोर्मध्ये येऽष्टावुक्थ्याः सोऽयमुक्थ्यसंघः पक्षिरूपस्य प्रजापतेः शरीरम् । एष एवंविधो द्वादशरात्रो यथोक्तकल्पनया द्वादशविधः । प्रजापतिरेव स्वकीयेन सत्ररूपयोगेन सच्छ स्पृणोति सच्छन्दवाच्यं यदस्ति तत्प्रीणयत्येव । किं तद्वाच्यमिति तदुच्यते—प्रजानां प्राणा एव सच्छन्दवाच्याः । जन्मान्तरेऽप्यनपायेन तद्भावात् । अतः सच्छन्दवाच्यान्प्राणानेव प्रीणयति ।

अथ प्रस्तुतं सत्ररूपं विधत्ते—

सर्वासां वा इति । ये यजमाना द्वादशाहरूपं सत्रमासतेऽनुतिष्ठन्ति । आसिधातुः सत्रविषयेऽनुष्ठानमुपलक्षयति । ते यजमानाः सर्वासां प्रजानां प्राणैरेव निमित्तभूतैरनुतिष्ठन्ति । एतदनुष्ठानेनैव जगन्निर्वाहहेतुना प्राणाः प्रीता भवन्तीत्यर्थः । यस्मात्सत्रानुष्ठानं प्राणानां प्रीतिहेतुस्तस्मात्तर्वे जना अनुष्ठातॄन्दृष्ट्वा किमेते सार्वेण इत्येवमादरेण साश्चर्याः पृच्छन्ति । अतः प्रशस्तमिदं सत्रमनुष्ठेयमित्यर्थः ।

अथ वेदनं प्रशंसति—

प्रियः प्रजानामिति । सत्रस्य वेदिता सर्वासां प्रजानां प्रियो भूत्वा जगत्युत्कृष्टोऽवतिष्ठते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमे काण्डे द्वितीयप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्रायणवद्ध्वो ह वा एष आतत आसीत्ते देवा एतं वैश्वानरं पर्यौहन्त्सुवर्गस्य लोकस्य प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन्तेष्वार्ध्नोदधि तद्ध्नोति ह वा ऋत्विक्षु य एवं विद्वान्द्वादशाहेन यजते

(द्वादशरात्रकथनम्)

तेऽस्मिन्नैच्छन्त स रसमहं वसन्ताय प्रायच्छत् (१) यवै ग्रीष्मायौषधीवर्षाभ्यां व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां तेनेन्द्रं प्रजापतिरयाजयत्ततो वा इन्द्र इन्द्रोऽभवत्तस्मादाहुरानुजावरस्य यज्ञ इति स ह्येतेनाग्रेऽयजतेष ह वै कुणपमत्ति यं मत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं येन पात्रेणान्नं बिभ्रति यत्तन्न निर्णेनिजति ततोऽधि (२) मलं जायत एक एव यजेतैको हि प्रजापतिराप्नोद्द्वादश रात्रीर्दीक्षितः स्याद्द्वादश मासाः संवत्सरः सांवत्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रया यद्वा दशोपसदो याः प्रथमा यज्ञं ताभिः सं भरति या द्वितीया यज्ञं ताभिरा रभते (३) यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो वा अस्य पशुमत्तिं मा॑स॒ꣳ सोऽत्ति यः पुरोडाशं॑ मस्तिष्क॒ꣳ स यः परिवापं पुरीष॒ꣳ स य आज्यं॑ मज्जान॒ꣳ स यः सोम॒ꣳ स्वेद॒ꣳ सोऽपि ह वा अस्य शीर्षण्या निष्पदः प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद्द्वादशाहेन न याज्यं पाप्मनो व्यावृत्त्यै (४)॥

(अयच्छदधि रमते द्वादशाहेन चत्वारि च)।

(द्वादशरात्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके दशमेऽनुवाकः) ।

नवमेऽनुवाके द्वादशाहगतान्येकादशाहानि विहितानि । अथ दशमे द्वादशमहर्विधत्ते—

न वा एष इति । वैश्वानराख्येनाग्निना दृष्टत्वादतिरात्रो वैश्वानरः । अन्यत एकस्मिन्नेव भागे वैश्वानरशब्दवाच्योऽतिरात्रो यस्य द्वादशाहस्य सोऽयमन्यतोवैश्वानरः । आदावेवातिरात्रयुक्तो न त्ववसान इत्यर्थः । एतादृश एष द्वादशाहः स्वर्गलोकं संपादयितुं न समर्थः । कुतो न समर्थ इति तदुच्यते— एष द्वादशाह ऊर्ध्वाभिमुखोऽतिविस्तृत आसीत् । तस्यावसाननियामकाभावात् । अतोऽयमपर्यवसितः सन्स्वर्गस्य प्रभुर्नाऽऽसीत् । तदानीं देवा एतं वैश्वानरशब्दवाच्यमतिरात्रं पर्यौहन्परितोऽवसानस्थाने नियामकत्वेन स्थापितवन्तः । अतोऽतिरात्रेण नियमितत्वादेवायं द्वादशाह इति तत्परिमाणस्य पर्यवसितत्वात्स्वर्गलोकं संपादयितुमयं प्रादुर्भवति । तस्मादुपरिष्टादतिरात्रः कर्तव्य इति विध्युन्नयः ।

अथैतस्य द्वादशाहस्याहीनरूपतां विधत्ते—

ऋतवो वा इति । पुरा कदाचिद्वसन्ताद्यृतवो देवा ऋत्वियो भूत्वा प्रजापतिं यजमानमेतेन द्वादशाहेनायाजयन् । तेन द्वादशाहेन स प्रजापतिस्तेष्वृतुषु मध्येऽधिकां समृद्धिं प्रामोत् । तद्वदन्योऽप्यृत्विक्षु मध्ये द्वादशाहयागेन समृद्धिं प्राप्नोति । पूर्वत्र यजमानबहुत्वादासिचोदनया विधानाच्च द्वादशाहस्य सत्रत्वम् । इह तु यजमानैकत्वाद्यजतिचोदनया विधानाच्चाहीनत्वमिति विशेषः ।

तमिमं द्वादशाहं प्रशंसितुं पूर्वोक्तामेव प्रजापतेः समृद्धिं प्रपञ्चयति—

तेऽस्मिन्नैच्छन्तेति । ते वसन्ताद्या ऋतवोऽस्मिन्समृद्धे प्रजापतौ भागमैच्छन् । स च प्रजापतिर्वसन्ताय रसमह सर्वमपि भोग्यवस्तुगतं सारं दत्तवान् । वसन्तकाले हि भोगातिशयः प्रसिद्धः । तथा यवादीन्धान्यविशेषान्ग्रीष्मादिभ्यः प्रायच्छत् । ते हि तत्तत्काले प्रभूता भवन्ति ।

एवमुत्कर्षहेतुत्वेन द्वादशाहः प्रशस्तः । अथापकर्षनिवारकत्वेन द्वादशाहं प्रशंसति—

(द्वादशरात्रकथनम्)

तेनेन्द्रं प्रजापतिरिति । इन्द्र उत्तमत्वेनाग्रजभ्रातृवत्पूज्योऽपि सन्पुरा कदाजिदनुजवदवरः सैर्वैर्दै वैस्तिरस्क्रियमाणो भूत्वा तत्परिहारोपायं वोढुं प्रजापतिमुपसेवितवानित्येतावदत्र बहिरेव द्रष्टव्यम् । अत एवान्यत्राऽऽम्नातम् 'इन्द्रो वै देवानामानुजावर आसीत्स प्रजापतिमुपाधावत्' इति । स च प्रजापतिस्तेन द्वादशाहेनेन्द्रमयाजयत् । ततो द्वादशाहप्रभावादयमिन्द्रस्तदानीमिन्द्रोऽभवत्स्वकीयपरमैश्वर्यलक्षणमिन्द्रत्वं प्राप्तवान् । तस्माद्याज्ञिका आनुजावरस्य यज्ञ इति द्वादशाहमाचक्षते । यस्मादिन्द्र आनुजावरो भूत्वा तन्निवृत्तये प्रथममेतेन द्वादशाहेनायजत तस्मादानुजावरयज्ञत्वमस्योपपन्नम् ।

इदानीं सत्ररूपे द्वादशाहप्रयोगे दक्षिणानिषेधं निन्दयोन्नयति—

एष ह वा इति । सत्रे हि ये यजमानास्त ऋत्विज इत्येवं यजमानत्वव्यवहारवदृत्विक्त्वव्यवहारोऽप्यस्ति । अत एव शाखान्तरे 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इत्यादावध्वर्युब्रह्मादिशब्दैर्व्यवहियन्ते । एवं सति ऋत्विक्त्वबुद्ध्या यागान्तरवदत्र यो दक्षिणां प्रतिगृह्णाति स प्रतिग्रहीता शवभक्षणेन यः प्रत्यवायस्तं प्राप्नोति । नात्र पञ्चनखशवो विवक्षितः, किंतु पुरुषाश्वादिशवः । किंचानेन यदन्नं भक्ष्यते तद्गौरेव भवति गोमांसभक्षणसमः प्रत्यवायो भवतीत्यर्थः । किंचैनं प्रतिग्रहीतारमुद्दिश्य यस्मिन्कांस्यपात्रे भाण्डे वाऽन्नं धारयन्ति तत्पात्रं यदि शास्त्रोक्तमार्गेण शोधितं न भवेत्ततः शोधनाभावात्तद्युक्तगृहेऽधिकं मलं जायते, तेन पात्रेण व्यवहर्तॄणामधिकः प्रत्यवायो भवतीत्यर्थः ।

एवं दक्षिणानिषेधेन सत्रप्रयोगं दृढीकृत्य यजमानैक्येनाहीनप्रयोगमपि दृढीकरोति—

एक एव यजेतेति । प्रजापतेरेकस्यैव समृद्धिरभूत्, न तु याजकानामृत्विजाम् । तस्मादेकस्य कर्तृत्वात्फलभाक्त्वाच्चाहीनत्वं सिद्धम् ।

अथ दीक्षाविशेषं विधत्ते—

द्वादश रात्रीरिति । द्वादशसंख्योपेतानां मासानां संवत्सररूपत्वात्संवत्सरस्य च प्रजापतिसृष्टत्वेन प्रजापतिरूपत्वादेष यजमानो द्वादशदीक्षायोगात्प्रजापतिरेव भवति । किंच यत्पूर्वं मातापितृभ्यां जननं तन्न मुख्यम् । किंतु यो यजमानो दीक्षारूपात्तपसोऽधिजायत एष एव हि जायते मुख्यजन्मवानित्यर्थः ।

अथोपसद्विशेषं विधत्ते—

चतुर्धा वा इति। अत्रानुष्ठेया द्वादशदिनसाध्या उपसदो याः सन्ति तास्तिस्रस्तिस्र एकैकराशिरूपेण चतुर्धा विभज्यन्ते । तत्र प्रथमराशिगताभिस्तिसृभिर्यज्ञसाधनसंपादनं भवति । द्वितीयराशिगताभिस्तिसृभिर्यज्ञमुपक्रमते । तृतीयराशिगताभिस्तिसृभिर्यज्ञपात्राणि शोधयति । चतुर्थराशिगताभिस्तिसृभिः स्वात्मनोऽन्तः शुद्धिं करोति ।

पुनरपि सत्रे दक्षिणाप्रतिग्रहलोभातिशयेन प्रसक्तिं निन्दति—

यो वा अस्येति। यः पुमान्द्वादशाहसत्रे दक्षिणा प्रतिगृह्णाति सोऽयं यदा स्वयं सोमयागं करोति तदा तदीययागे योऽन्य ऋत्विग्भूत्वा तस्य प्रतिग्रहीतुः संबन्धिनमग्नीषोमीयादिपशुहविःशेषमत्ति स ऋत्विक्पुरुषादिमांसभक्षणसमं प्रत्यवायं प्राप्नुयात् । यस्तदीययागे पुरोडाशशेषमत्ति स मानुष्कं पुरुषादिशिरोगतं मांसं भक्षितवान्भवति । यः परिवापं लाजरूपहविःशेषमत्ति स पुरीषमेव भक्षितवान्भवति । यस्तदीययाग आज्येडाभागं भक्षयति स मज्जानं भक्षितवान्भवति । यस्तदीययागे सोमशेषं भक्षयति स स्वेदं भक्षितवान् भवति । किं च स प्रतिग्रहीता स्वयमप्यस्य द्वादशाहकर्तुः शीर्षण्याः शिरस्युत्पन्ना निष्पदो द्वारैर्निर्गच्छन्तीर्मलिनजातीः प्रतिगृह्णाति । अथ वैतद्वाक्यं सर्वमहीनद्वादशाहविषयं व्याख्येयम् । तदानीं यो वा अस्य पशुमित्यादेरयमर्थः—यः कश्चिदृत्विग्भूत्वाऽहीनरूपद्वादशाहे पशुहविःशेषमत्ति सोऽयमस्य यजमानस्यैव मांसमत्ति । एवमुत्तरत्रापि योज्यम् । यस्मादहीनद्वादशाहे दक्षिणाप्रतिग्रहो निषिद्धस्तस्मात्कारणादृत्विग्भूत्वा द्वादशाहेन यजमानं न याजयेत् । तदेतदयाजनं पाप्मनो व्यावृत्त्यै संपद्यते । याजने तु शास्त्रोक्तं प्रायश्चित्तं कर्तव्यम् । सत्राहीनयोरेतावान्विशेषः—सत्रे तु स्वयम(स्या)पि यजमानत्वात्प्रतिग्रह एव नास्ति । अहीने तु विद्यमानेऽपि प्रतिग्रहस्य दुष्टत्वात्प्रतिगृह्य प्रायश्चित्तं कर्तव्यमिति ।

अत्र मीमांसा ॥

दशमाध्यायस्य षष्ठपादे षोडशाधिकरणे चिन्तितम्—

अहीनसत्रयोर्लक्ष्मभिदा नास्त्यस्ति वा न हि ।
आवृत्तिसाम्यादाद्यः स्यादिज्यासिद्ध्यां तयोर्भिदा ॥

अस्ति द्वादशाहस्याहीनत्वं सत्रत्वं च । तत्रैतच्चिन्त्यते—किमहीनसत्रयो-

---

१ ख. च. °क्ष्मभेदो ना° । २ ख. च. °त्रैव चिन्त्य° ।

(द्वादशरात्रकथनम्)

लक्षणभेदो नास्त्युतास्तीति। तत्र नास्तीति तावत्प्राप्तम्। कुतः, ज्योतिष्टोमावृत्तिरूपस्य समानत्वात्। यथा द्विरात्रादीनामेकादशरात्रान्तानामहीनानामावृत्तौ ज्योतिष्टोमस्वरूपं तथा त्रयोदशरात्रादीनां सत्राणामिति प्राप्ते ब्रूमः—आसीरन्नुपेयुरिति चोदनायां यजमानबहुत्वं च सत्रलक्षणं, यजतिचोदना यजमानबहुत्वचोदनाभावश्च निर्लक्षणम्। वैदिकप्रयोगेषु तयोरव्यभिचारादिति सिद्धान्तः।

तत्रैवान्यच्चिन्तितम्—

सत्रमेकः करोत्वाहो बहवः प्रकृताविव।
एकः कुर्यादिहाऽऽसीरन्नित्युक्त्या बहवो मताः॥

द्वादशाहादिसत्रस्य ज्योतिष्टोमः प्रकृतिः। तत्र कर्त्रैक्याच्चोदकेन सत्रेऽपि कर्त्रैक्ये प्राप्ते प्रत्यक्षवचनाद्बहवोऽभ्युपेयाः।

तत्रैवान्यच्चिन्तितम्—

ऋत्विजोऽन्येऽत्र यष्टृभ्यः स्युस्त एवोत चोदकात्।
अन्ये यष्टार एव स्युः प्रत्यक्षवचनादिभिः॥

अत्र सत्रे किं यजमानेभ्यो व्यतिरिक्ता ऋत्विजः कर्तव्याः किं वा यजमाना एवर्त्विजः। ज्योतिष्टोमो यजमानादन्येषामृत्विक्त्वादत्राप्यन्ये स्युरिति प्राप्ते ब्रूमः—ये यजमानास्त ऋत्विज इति प्रत्यक्षवचनाद्दक्षिणानि सत्राणीत्याहुरिति दक्षिणाराहित्यश्रवणाद्ब्रह्मयुर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारमित्यादिना ब्रह्मोद्गात्रादिनामरूपासंयोगदीक्षासंयोगयोरार्त्विज्यया यजमानद्योतकयोः प्रतिभानाच्च यजमाना एवर्त्विजः।

तत्रैव द्वितीयपादे दशमाधिकरणे चिन्तितम्—

ऋत्विजां वरणं सत्रे कार्यं नो वाऽत्र सोमवत्।
कार्यं मैव स्वकर्मत्वात्क्रियार्था प्रकृतौ वृतिः॥

अग्निर्होतेत्यादिमन्त्रैः सोमे वरणमृत्विजामाम्नातम्। सोमवत्सत्रेऽपि तत्कार्यम्। अन्यथा वरणरहितानामृत्विक्त्वाभावात्सत्रं न सिध्येत्। अत एव तत्सिद्धये सत्रप्रकरणे ये यजमानास्त ऋत्विज इति स्वतः प्रवृत्तानपि यजमानानभूय वरणाद्यमृत्विक्त्वं तेषामाधातव्यमिति विदधाति। तस्मादृत्विग्वरणं सत्रे कार्यम्। मैवम्। सत्रं सकुष्ठातृणां सर्वेषां स्वकर्म। न हि स्वकर्मणि क्रियार्थं

१ ख. च. °त्वनियमाभा°। २ क. ख. °ग्निर्म होते°। ३ ख. च. णराहितानामु°।

वरणमपेक्ष्यते । क्रयार्थं हि प्रकृतौ वरणम् । दानमेव क्रयार्थं वरणं त्वदृष्टार्थमिति चेन्न । वरणस्य भविष्यद्दानसूचनेनोत्साहजननार्थत्वात् । अन्यथा वरणकाले कश्चित्कल्याण्यो दक्षिणा इत्यृत्विजां प्रश्नः कथं संगच्छेत । न च ऋत्विक्त्वासिद्धिः शङ्कनीया । तत्र वक्तव्यमृत्विक्त्वं नाम किं कर्मकरत्वमुत यागकर्तृत्वमिति । आद्ये कर्मकराणां स्वामित्वाभावेन ये यजमानास्त ऋत्विज इति वचनं विरुध्येत । द्वितीये तु स्वत एव यागं कर्तुं प्रवृत्तत्वाद्वरणमन्तरेणाप्यृत्विक्त्वं सिध्यति । ईदृशमेवाऽऽर्त्विज्यं वचनेन विधीयते । तस्माद्दानवद्वरणं सत्रे लुप्यते ।

तत्रैवान्यच्चिन्तितम्—

क्रयः कार्यो न वा सत्रे निषेधात्कीर्तिकल्पनम् ।
नित्यानुवादेनाक्लृप्तेर्न क्रयो वरणं यथा ॥

सत्कारपुरःसरमग्निहोत्रमित्यादिमन्त्रेण प्रार्थना वरणम् । तच्च वरणं चिकीर्षुर्यजमानो वरणीयेभ्यो ब्राह्मणेभ्यः सोमं ब्रूयात् । तेभ्यः सोमं प्राहेत्यापस्तम्बवचनात् । सोमाभिधानप्रकारस्त्वत्र कल्पे दर्शितः—' ज्योतिष्टोमेनाग्निष्टोमसंस्थेन रथंतरपृष्ठेन गत्वा द्वादशशतदक्षिणेनाहं यक्ष्ये । तत्र मे त्वमुद्गाता भव ' इति । तत्र देयदक्षिणाद्रव्यनिश्चयेन ब्राह्मणाः स्वकीयाः कर्मविशेषे नियोक्तुं योग्या भवन्ति । सोऽयं क्रयः । स च प्रकृताविव सत्रे कार्यः । न च दक्षिणादानस्य निराकृतत्वेन देयद्रव्यनिश्चये लुप्ते सति तत्साध्यः क्रयोऽपि लुप्येतेति शङ्कनीयम् । निषेधमुपजीव्य क्रयानुष्ठानस्य कल्पयितुं शक्यत्वात् । तथाहि—' न ह्यत्र गौर्दीयते । न वासो न हिरण्यम् ' इति सत्रे गवादिदानं निषिध्यते । स च निषेधोऽसत्यां प्रतिपत्तौ न संभवति । ततः सोमे देयद्रव्याणां सत्रे दानप्रसक्तिरभ्युपेया । सोमे च देयद्रव्याण्येवं श्रूयन्ते—' गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा ' इति । तत्र गोवासोहिरण्यादीनां विशेषतो निषेधेन द्रव्यान्तराणां चोदकप्राप्तानामभ्यनुज्ञा प्रतीयते । ततो देयद्रव्यसद्भावात्क्रयः कर्तव्य इति पूर्वः पक्षः । ' न ह्यत्र गौर्दीयते ' इत्यनेन निषेधो न विधीयते, किं तु पूर्वोक्तेन निर्णयेन प्राप्त एव दानाभावोऽनूद्यते । ' अदक्षिणानि सत्राणीत्याहुर्न ह्यत्र गौर्दीयते ' इति

१ क. ख. षेध° स° । २ क. ख. °क्तौ स°

(द्वादशरात्रकथनम्)

श्रुतौ परोक्ष्युपन्यासस्य प्रसिद्धिवाचकहिशब्दस्य [च] प्राप्तिगमकत्वात्। तस्मान्नित्यानुवादस्य कल्पकत्वाभावाद्वरणवत्तद्विनाभूतः क्रयोऽपि न कर्तव्यः।

तत्रैवान्यच्चिन्तितम्—

आत्रेयदानर्तुयाज्यावृती सत्रेषु नाऽऽचरेत्।
कुर्याद्वाऽऽनतिलोपाऽन्ये धर्मार्थं क्रियतां द्वयम्॥

प्रकृतौ हिरण्यमात्रेयाय ददातीति श्रुतम्। ऋतुयाज्यावरणं चास्ति। तदुभयं सत्रेषु न कर्तव्यम्। द्वारभूताया आनतेर्लुप्तत्वात्। यद्यप्यात्रेयः कर्मकरेभ्यो बहिर्भूतस्तथाऽपि तद्दानेन यजमानस्यौदार्यं पश्यन्तो धनकामा ऋत्विज आनता भवन्ति। वरणस्य चाऽऽनत्यर्थत्वमृत्विग्वरणे पारम्भकालीने प्रसिद्धम्। तस्मादानत्यर्थमुभयं नाऽऽचरेदिति पूर्वः पक्षः। प्रथमवरणेनैवाऽऽनतिसिद्धेः कालान्तरे वरणमदृष्टार्थम्। धनकामानामपि कर्मकराणां प्रारम्भकाले स्वयमङ्गीकृताया भृतेरधिकं धन न लभ्यत इत्यात्रेयदानदर्शनं नाऽऽनतिकरम्। तस्मादृष्टार्थमुभय कर्तव्यम्।

षष्ठाध्यायस्य षष्ठपादे तृतीयाधिकरणे चिन्तितम्—

सत्रं वर्णत्रयस्योत विप्रस्यैवाविशेषतः।
त्रयस्य नैवं स्वामित्वं विप्राणामृत्विजां यतः॥

ऋद्धिकामाः सत्रमासीरन्नित्यत्र विप्रा इति विशेषो न श्रूयते। तस्माद्वर्णत्रयस्य सत्राधिकार इति चेन्नैवम्। विप्राणामेवाऽऽर्त्विज्यमिति द्वादशे वक्ष्यते। ऋत्विक्कार्ये यजमानाः सत्रे समाम्नाताः—'ये यजमानास्त ऋत्विजः' इति। तस्माद्विप्राणामेव सत्रम्।

तत्रैवान्यच्चिन्तितम्—

भिन्नप्रयाजादिकल्पा अपि सत्रेऽधिकारिणः।
तुल्यकल्पा एव वाऽऽद्या वसिष्ठादिविधानतः॥
नाराशंसाद्यङ्गतायां स्वामित्वोद्देशपूर्वकम्।
नाराशंसाविधौ सन्निकर्षात्साद्गुण्यतोऽन्तिमः॥

प्रयाजेषु पुरुषभेदेनानुष्ठानप्रकारो भिद्यते राजन्यवसिष्ठादीनां न(ना)राशंसो द्वितीयः प्रयाजः। तनूनपादन्येषाम्। तत्र वसिष्ठादिविध्यर्थं शुनकक-ण्वकश्यपसंकृतिगोत्रोत्पन्ना ये न(ना)राशंसप्रयाजवन्तः, येचान्ये तनूनपात्प्र-

१ क. ङ. च. तः नरा°। २ क. घ. °म्। नरा°। ३ क. घ. ङ. °ष्ठाना।

मञ्जकाः, न एते भिन्नकल्पा अपि मिलित्वा सप्तदशावराः सत्रेऽधिकारिणः स्युः। कुतः, न(ना)राशंसमुद्दिश्य तदङ्गत्वेन वसिष्ठादिविधानात्। तथा सति सत्रिणां मध्ये केषांचिद्वसिष्ठादिगोत्रजत्वेऽपि तदङ्गत्वं सिध्यतीति प्राप्ते ब्रूमः—वासिष्ठादीन्यजमानानुद्दिश्य न (ना)राशंसो विधीयते। तथा सति विधायकपदगतस्य धात्वर्थस्य विधेयत्वात्संनिकर्षः। वसिष्ठादिविधौ तु पदान्वरोपात्तत्वाद्विप्रकर्षः। अतो वसिष्ठाद्युद्देशेन नाराशंसविधौ न(ना)राशंसानुष्ठाने वसिष्ठादीनां सादृगुण्यमितरेषां तु वैगुण्यं, तन्नानादनुष्ठाने तु वैपरीत्यम्। सर्वथा भिन्नकल्पानां सर्वेषां सादृगुण्यं न सिध्यति। अतः-सादृगुण्याय तुल्यकल्पा एवाधिकारिणः।

तत्रैवान्यच्चिन्तितम्—

विप्रस्य सत्रं सर्वस्य वासिष्ठस्यैव वा भवेत्।
वैश्वामित्रस्यैव वाऽऽद्य ऋद्धीच्छुत्वेन मध्यमः॥
ब्रह्मत्वाय ह्यवासिष्ठो ब्रह्मा वा स्तोमभागतः।
वैश्वामित्रसमानानामेव होतृत्वसिद्धये॥

ऋद्धिकामस्य सत्रं विहितम्। ब्राह्मणाश्च सर्वे ऋद्धिं वाञ्छन्ति। तस्माद्विप्रस्य सर्वस्य सत्राधिकार इत्याद्यः पक्षः। वासिष्ठो ब्रह्मा भवतीति वचनाद्वासिष्ठस्य ब्रह्मत्वासंभवाद्ब्रह्मत्वाय वासिष्ठस्याधिकारो वाच्यः। तथा सति भिन्नकल्पत्ववारणाय तत्तुल्यकल्पा एवाधिक्रियन्त इति द्वितीयः पक्षः। वासिष्ठो ब्रह्मेति वाक्याच्च वासिष्ठस्य ब्रह्मता। [1]रश्मिरसि क्षयाय त्वेत्यादयो मन्त्राः स्तोमभागास्तानधीयानः स्वयमवासिष्ठोऽपि ब्रह्मतामर्हतीति स्तोमभागप्रशंसारूपोऽर्थवादे वासिष्ठो ब्रह्मेति पठितत्वात् तस्माद्वैश्वामित्रो होतेति विहितस्य होतृत्वसिद्धये वैश्वामित्रस्य तत्समानकल्पानां चाधिकारो नान्येषाम्।

तत्रैवान्यच्चिन्तितम्—

अनाधातुश्च तत्किं वाऽऽधातुरेवाग्नयो मतः।
एकस्याग्निषु तत्सिद्धिर्न स्वाग्निष्वात्मनेपदात्॥

तत्सत्रमग्न्याधानरहितस्यापि संभवति। कुतः, सत्रिणां मध्ये कस्यचिदाहिताग्नित्वे तदीयेष्वग्निषु तेन सह प्रवृत्तैरनाहिताग्निभिरपि तस्य सत्रस्य साधयितुं शक्यत्वादिति चेन्नैवम्। आदधीत्यात्मनेपदमाधानफलस्य कर्तृगामिनां

---

१ ख. घ. ङ. °न नरा°। २ क. °न्त्राः सोमगताः स्तो°। ३ ख. घ. ङ. च. °धृतेर°।

(द्वादशरात्रकथनम्)

दर्शयति । तत्फलं चाग्नीनां कर्मयोग्यता । ततो येऽनाहिताग्नयो न तेऽधिकारिणः । कथाऽऽहिताग्नेस्तस्यैव कर्मयोग्यता नान्यस्य । किं च सोमविकृतीनामिष्टिपूर्वकत्वं निर्णीतम् । इष्टिश्चाऽऽधानपूर्विका । तस्मादाधातुरेव सत्राधिकारः ।

अत्रैवान्यच्चिन्तितम्—

जुह्वादयो यस्य कस्य कार्याः सधारणा उत ।
अविरोधादग्निमात्रस्थो मृतदाहे विरोधतः ॥

साग्नीनां मध्ये यस्य कस्यचित्संबन्धिभिर्जुह्वादिपात्रैः सत्रं प्रयोक्तव्यम् । कुतः, अविरोधात् । अन्यदीयेष्वग्निष्वात्मनेपदं यथा विरुध्यते नैवमत्र विरोधः कश्चिदुपलभ्यत इति प्राप्ते ब्रूमः—यस्य जुह्वादयः स चेत्सत्रमध्ये म्रियते तदा मृतेन सह जुह्वादयो दह्यन्ते । 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च दक्षिणहस्ते जुहूमासादयति' इत्यादिवचनैस्तदवगमात् । पात्रदाहे चावशिष्टैः सत्रप्रयोगो विगुणः स्यात् । तस्मात्साधारणा भिन्ना एव जुह्वादयः सत्रे संपादनीयाः ।

एकादशाध्यायस्य चतुर्थपादे पञ्चमाधिकरणे चिन्तितम्—

द्वादशाहे सदीक्षोपसदहःसु दिनानि किम् ।
शतत्रयं द्वादश वा षट्त्रिंशद्वाऽग्निमो यतः ॥
एकैककर्मणोऽङ्गोऽस्य ज्योतिष्टोमविकारता ।
एकैकं तदनुष्ठातुं दिनानां पञ्चविंशतिः ॥
अहनां द्वादशताश्रुत्या मध्यपक्षस्तदापि किम् ।
कार्या द्वादश साद्यैस्काश्चतुष्काणामुत त्रिकम् ॥
एकैकस्यैव यागस्य विकृतित्वादिहाऽऽदिमः ।
अमुख्यकालाङ्गबाधाच्चतुष्टयं(ष्क)मिद्यते त्रिधा ॥
दीक्षा उपसदः सुत्याः प्रत्येकं द्वादश स्मृताः ।
ततः साङ्गस्य मुख्यस्य षट्त्रिंशद्दिवसा मताः ॥

द्वादशाहस्यैकैकमहः पृथक्कर्म । तस्मिंश्च सदीक्षस्य सोपसत्कस्य सप्तुत्यस्य

---

१ ख. घ. °हति यं° । २ च. °दहे दिनमानकम् । ३ ख. च. °ष्ठान दिं° । ४ क. घ. ङ. च. °स्तथाऽपि । ५ ख. ङ. च. °थस्काश्च° । ६ क. घ. ङ. °मियतां । ७ घ. ङ. श्रुताः । ८ ख. घ. °ताः । साङ्गस्य द्वादशाहस्य घ° ।

ज्योतिष्टोमस्य विध्यन्तोऽतिदिष्टः । अतिदिष्टानां दीक्षणीयाप्यसदां च प्राकृतसंख्याबाधनाय पृथग्द्वादशत्वं श्रुतम् । ततो दीक्षणीयपदार्थं चतुर्विंशतिर्दिनानि सुत्यार्थमेकं दिनमिति पञ्चविंशतिः । इष्टशस्य कर्मविशेषस्याहनां द्वादशभिरावृत्तिभिः शतत्रयं स्यादित्याद्यः पक्षः । तथा सत्यहनां द्वादशत्वं श्रूयमाणं बाध्येत । तस्माद्द्वादशैव दिवसा इति मध्यमः पक्षः । तेऽपि दीक्षोपसद्भ्यामङ्गाभ्यामुपेतस्यैकैकस्याहनः साङ्गज्योतिष्टोमविकारत्वात्तत्सर्वं सद्य एव कर्तव्यमित्येकः पक्षः । प्रकृतौ दीक्षोपसदामुख्यकालात्पागेवानुष्ठितत्वादिहापि तदेवानुष्ठानं प्राप्तम् । तच्च मुख्यकाले तदनुष्ठाने बाध्येत । तस्मादङ्गद्वयस्य प्रधानस्य च द्वादश दिनानि विभज्यानुष्ठानमिति पक्षान्तरम् । द्वादशाहस्य द्वादश दीक्षा द्वादशोपसद इत्यङ्गयोर्मुख्यं च पृथग्व्यवतिष्ठ)थग्द्वादशत्वश्रुत्या षट्त्रिंशदिति सिद्धान्तः ।

नवमाध्यायस्य प्रथमपादे नवमाधिकरणं चिन्तितम्—

पत्नीसंयाजसंस्था किं सर्वेष्वन्त्येतरेषु वा ।
अविशेषादादिमोऽन्त्योऽसंस्थितत्वोक्तिलिङ्गतः ॥

द्वादशाहे श्रूयते ' पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते ' इति । तत्र द्वादशसंख्येषु सर्वेष्वह:सु पत्नीसंयाजान्त कर्मानुष्ठायावशिष्टं पिष्टलेपादिकं न कार्यम् । कुतः, एतावत्सु पत्नीसंयाजैः समाप्तिर्नेतरेष्विति विशेषनियामकाभावादिति चेन्नैवम् । असंस्थितत्ववाक्योक्तलिङ्गेन गुणमादहनो यानीतराण्यहानि तेषु पत्नीसंयाजान्तत्वं व्यवतिष्ठते । तथाहि पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इत्यस्य विधेः शेष एवमाम्नायते—' न बर्हिरनुप्रहरति असंस्थितो हि तर्हि यज्ञः ' इति । तत्र पत्नीसंयाजैः सर्वेषामहनां समाप्तावसंस्थितत्वं व्याहन्येत । तस्मात्संतिष्ठन्त इति शब्दो न समाप्तिवचनः, किं तर्हि सत्येव तदहः संबन्धिकर्तव्यशेषे व्यापारोपरममात्रं ब्रूते । अयं च कर्तव्यशेषश्चरमेऽहन्यनुष्ठातव्यः। तथा सति द्वादशानामहनां विहितः सहप्रयोगोऽनुगृहीतो भवति । तथा हि द्वादशाहेन यजेतेति सहप्रयोगो विहितः । अत एव दीक्षोपसदादिकं तन्त्रेणा-

---

१ ख. तत्रापि । घ. ङ च तथाऽपि । २ ख तथैवा° । ३ ख. च. °सदो द्वादश सुत्या इ° । ४ च. °मुख्यस्य च । ५ क. घ ङ. °संस्थत्व स° । ६ ख. च °ष्ट हारियोजनादिकं त्याज्यम् ।

(अश्वमेधमन्त्रकथनम्)

नुष्ठीयते। तत्र प्रथममहः पत्नीसंयाजान्तमनुष्ठाय पिष्टलेपादिकं बर्हिष्प्रहरणान्तं कर्तव्यत्वेनावस्थाप्य द्वितीयमहः प्रक्रमते। एवमुत्तरत्रापि। तत्र सर्वत्रावशिष्टं कर्तव्यमुत्तमेऽहन्यनुष्ठातव्यम्। तथा सत्युपक्रमैक्यवदुपसंहारस्याप्येकत्वाद्विहितः सहप्रयोगः सिध्यति। एकैकस्याहनः पत्नीसंयाजैः समाप्तौ भिन्नाः प्रयोगाः प्रसज्येरन्। यत्तु दशमस्याहनो मानसग्रहेण समापनं तद्वाचनिकम्। तस्मादुत्तमव्यतिरिक्तानामेवाहनां पत्नीसंयाजानन्तरं व्यापारोपरमः।

षष्ठाध्यायस्य द्वितीयपादे प्रथमाधिकरणे चिन्तितम्—

सत्रे फलांशः प्रत्येकं सर्व वाऽऽद्यः समूहके।
कर्तृत्वादन्त्य एकैकस्यापि तत्त्वाद्बहुत्वतः॥

इदमाम्नायते—'ऋद्धिकामाः सत्रमासीरन्' इति। तत्र सत्रे बहूनां समुदायस्य कर्तृत्वमवगतम्। सप्तदशावराः सत्रमासीरन्निति श्रवणात् कर्तृत्वेन समुदायस्यैव फलित्वात्पुरुषाणां प्रत्येकं फलांश एव न तु सर्वं फलमेकैकस्येति चेन्मैवम्। एकैकस्यापि समुदायान्तःपातिनः कर्तृत्वसद्भावात्। अन्यथा समुदायस्यैकत्वेन सत्रमासीरन्निति श्रुतं कर्तृबहुत्वं नोपपद्येत। तस्मादेकैकस्य कर्तुः सर्वफलसद्भावात्सर्वफल[illegible]धिकारो नत्वंशफलकाधिनाम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके दशमोऽनुवाकः॥ १०॥

(अथ सप्तमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः)।

एकस्मै स्वाहा द्वाभ्यां स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाऽष्टादश-

---

१ ख. च. हारियोजनादिकं। २ ग. ङ. °शका°।

शभ्यः स्वाहैकान्नविꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्नचत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्नषष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा द्वाभ्यां शताभ्यां स्वाहा सर्वस्मै स्वाहा (१) ॥

(नवचत्वारिꣳशते स्वाहैकान्नैकविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः) ।

दशमेऽनुवाके द्वादशाहस्यान्तिममहर्दीक्षाविशेषश्चोक्तः । अथ शिष्टेषु दशस्वनुवाकेष्वश्वमेधगता मन्त्रा उच्यन्ते ।

कल्पः—' संस्थितेऽन्यमित आहवनीयं षट्त्रिंशतमाधत्थानुपर्तल्पान्विमिन्वन्त्यस्तमित आदित्ये षट्त्रिंशतमध्वर्यव उपर्तल्पानविरुह्य खादिरैः स्रुवैः सर्वाꣳ रात्रिमन्वहोमाज्जुहुवत्याज्यं मधुतण्डुलान्पृथुकाꣳजान्करम्भान्वानाः सक्तून्सुस्यानि प्रियङ्गुतण्डुलानि [1] कस्मै स्वाहेत्येतामनुवाकानामयुज आज्येन युजोऽन्नेनाऽऽज्येनान्तः ' इति ।

तत्राऽऽदौ युजामयुजां [2] [illegible]

एक॰ न स्वाहेति । अत्र त्वेकशब्देन स [illegible] जापतिरुच्यते । अत एव ब्राह्मणे समाम्नास्यते—' एकस्मै स्वाहेत्याह । प्रजापतिर्वा एकः । तमेवाऽऽप्नोति ' इति । अस्य च सर्वात्मकत्वाद्ये ये द्वित्वादिसंख्याविशिष्टाः पदार्थास्ते सर्वेऽपि प्रजापतिरूपाः तस्मात्प्रजापतिरूपानेव [illegible] नुद्दिश्येदं स्वाहुतमस्त्वित्येवं यथाम्नातं विंशदाहुतीर्जुहुयात् । अनेकपदार्थसंग्रहार्थं सर्वशब्दः ॥

---

१ च. °तल्प्यान्वि° । २ ख. °तल्प्यान° ।

(अश्वमेधगतमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

अथ सप्तमाष्टके द्वितीयप्रपाठके द्वादशोऽनुवाकः।

एकस्मै स्वाहा। द्वाभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(एकस्मै पञ्चाशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः)।

अथायुजामेकाधिकानां संघमाह—

एकस्मै स्वाहेति। एतैरयुक्संख्यैर्मन्त्रैर्विंशत्याहुतीर्जुहुयात्। न चात्र पूर्वानुवाकेन सह पुनरुक्तिः शङ्कनीया। यथावचनमनुष्ठेयत्वात्। अथवाऽनन्तेषु प्रजापत्यवयवेषु यथामति विषयभेदः कल्पनीयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अश्वमेधगतमन्त्रकथनम्)

अथ सप्तमाष्टके द्वितीयप्रपाठके त्रयोदशोऽनुवाकः)

द्वाभ्या॰ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहा-
ऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा
चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः
स्वाहा वि॰शत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय
स्वाहा सर्वस्मै स्वाहा (१) ॥

(द्वाभ्यामष्टानवत्यै षड्वि॰शतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके त्रयोदशोऽनुवाकः) ।

अथ द्विसंख्यापारभ्य युग्मसंख्यानां संघमाह—

द्वाभ्या॰ स्वाहेति । तैरेतैर्मन्त्रैस्त्रयोदशाऽऽज्याहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतै-
त्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके चतुर्दशोऽनुवाकः) ।

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा
नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः
स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहै-
काऽन्न वि॰शत्यै स्वाहा नवविं॰शत्यै स्वाहैकाऽन्न
चत्वारि॰शते स्वाहा नवचत्वारि॰शते स्वाहैकाऽन्न
षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकाऽन्नाशीत्यै स्वाहा
नवाशीत्यै स्वाहैकाऽन्न शताय स्वाहा शताय
स्वाहा सर्वस्मै स्वाहा (१) ॥

(अश्वमेधगतमन्त्रकथनम्)

(त्रिभ्योऽष्टाचत्वारिꣳशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके चतुर्दशोनुवाकः)।

अथ त्रिसंख्यामारभ्य विषमसंख्यानां संघमाह—

त्रिभ्य स्वाहेति । तैरेतमन्त्रैरेकोनविंशतिसंख्याका आहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके पञ्चदशोऽनुवाकः)।

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः
स्वाहा षोडशभ्य. स्वाहा विꣳशत्यै स्वाहा
षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै
स्वाहा (१) ॥

(चतुर्भ्यः षण्णवत्यै षोडश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके पञ्चदशोऽनुवाकः)।

अथ चतुःसंख्यामारभ्य चतुरुत्तराणां समसंख्यानां संघमाह—

चतुर्भ्यः स्वाहेति । एतैर्मन्त्रैरष्टावाहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-
दीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके षोडशोऽनुवाकः)।

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः

(अश्वमेधमन्त्रकथनम्)

स्वाहा वि॒श्भ्यः स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पञ्चभ्यः पञ्चनवत्यै चतुर्दश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके षोडशोऽनुवाकः) ।

अथ पञ्चसंख्यामारभ्य पञ्चोत्तराणां समविषमसंख्यानां संघमाह-

पञ्चभ्यः स्वाहेति । एतैर्मन्त्रैः सप्ताऽऽहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके सप्तदशोऽनुवाकः) ।

दशभ्यः स्वाहा वि॒श्भ्यः स्वाहा त्रि॒श्ते स्वाहा चत्वारि॒श्ते स्वाहा पञ्चाशते स्वाहा षष्टये स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(दशभ्यो द्वावि॒श्तिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके सप्तदशोऽनुवाकः) ।

अथ दशसंख्यामारभ्य दशोत्तराणां संघं दर्शयति-

दशभ्यः स्वाहेति । एतैर्मन्त्रैरेकादशाऽऽहुतीर्जुहुयात् ॥

(अश्वमेधातमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः)।

विꣳशत्यै स्वाहा॑ चत्वारिꣳशत स्वाहा॑ षष्ट्यै स्वाहाऽशीत्यै स्वाहा॑ शताय स्वाहा॒ सर्वस्मै स्वाहा॑ (१) ॥

(विꣳशत्यै द्वादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः)।

अथ विंशतिसंख्यामारभ्य विंशत्युत्तराणां संख्यानां संघमाह—

विꣳशत्यै स्वाहेति। एतैर्मन्त्रैः षडाहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

अथ सप्तमाष्टके द्वितीयप्रपाठक एकोनविंशोऽनुवाकः।

पञ्चाशते स्वाहा॑ शताय स्वाहा॒ द्वाभ्याꣳ शताभ्याꣳ स्वाहा॑ त्रिभ्यः शतेभ्यः स्वाहा॑ चतुर्भ्यः शतेभ्यः स्वाहा॑ पञ्चभ्यः शतेभ्यः स्वाहा॑ षड्भ्यः शतेभ्यः स्वाहा॑ सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा॑ नवभ्यः शतेभ्यः स्वाहा॑ सहस्राय स्वाहा॒ सर्वस्मै॒ स्वाहा॑ (१) ॥

(पञ्चाशते द्वात्रिꣳशत्)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठक एकोनविंशोऽनुवाकः)

अथ पञ्चाशत्संख्यामारभ्य पञ्चाशदुत्तराणां शतोत्तराणां च संघं दर्शयति-
पञ्चाशते स्वाहेति । एतैर्मन्त्रैर्द्वादशाऽहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके विंशोऽनुवाकः) ।

शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा
नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा
न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहाऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्टयै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(शतायाष्टाविंशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

साध्याः षड्रात्रं कुसुरुबिन्दः सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिः क्षुधं नवरात्रं प्रजापतिरीशंहोतारमृतव ऐन्द्रवायवाग्नायत्रो वै प्रजापतिः स द्वादशरात्रं न वा एकस्मा एकस्मै द्वाभ्यां त्रिभ्यश्चतुर्भ्यः पञ्चभ्यो दशभ्यो विंशत्यै पञ्चाशतै शतायै विंशतिः ॥ २० ॥

(अश्वमेधगतमन्त्रकथनम्)

साध्या अस्मा इमे लोका गायत्रं वै तृतीयमेकस्मै

पञ्चाशत् ॥ ५० ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके

द्वितीयः प्रपाठकः ॥ २ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके विंशोऽनुवाकः) ।

अथ शतसंख्यामारभ्योत्तरोत्तरदशगुणवृद्धियुक्तानां संख्यानां संघमाह—

शताय स्वाहेति । अत्र समुदादिशब्दाः सर्वे शतसहस्रादिशब्दवदुत्तरोत्तरदशगुणसंख्यावाचिन एव । परार्धं ब्रह्मण आयुष्यार्धस्याऽऽवृतानां मानुषसंवत्सराणामवधिभूता चरमसंख्या । न ह्यतोऽधिका काचित्संख्या क्वचिद्विद्यते । परार्धस्य द्वैगुण्ये तु परार्धद्वयमित्येव व्यवहरन्ति । तस्मात्संख्यावृद्धिविश्रान्तिस्तत्र द्रष्टव्या ।

कल्पः—' एतानन्वाकान्पुनः पुनरभ्यासं रात्रिशेषं हुत्वोषसे स्वाहेत्युषसि व्युच्छन्त्यै स्वाहेति व्युच्छन्त्या व्युष्टयै स्वाहेति व्युष्टायामुदेष्यते स्वाहेत्युपोदयमुद्यते स्वाहेत्युद्यति उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते हुत्वा ' इति । अत्र व्युच्छन्त्यै स्वाहेति शाखान्तरमन्त्रः । इतरे त्वत्रत्या एव । अत्र ब्रह्मणो रात्र्यवसाने सति त्रिधा उषःकालादयोऽत्र विवक्षिताः । यद्वा मनुष्यप्रसिद्धाः । एवं सत्युषः [illegible] औपक्रम उक्तः । व्युष्टिशब्देन सम्यक्प्रभातदशोक्ता । उदेष्यच्छब्देनासन्नोदयात्प्राचीनसमीपदशा । उद्यच्छब्देनोदयकालीनदशा । उदितशब्देनोदयादूर्ध्वभाविनी दशा । स्वर्गशब्देन द्युलोको विवक्षितः । लोकशब्देन भूम्यादिः । अन्तरिक्षयुक्तो भूरादिः । अत्रानुक्तसर्वविशेषसंग्रहार्थं सर्वस्मै स्वाहेत्यन्ते [illegible] ।

अत्र प्रपाठकस्य [illegible] संग्रहः—

षड्रात्रः स्याद्द्वितीयाद्ये द्वितीये सप्तरात्रकः ।

अष्टरात्रस्तृतीये स्याच्चतुर्थे नवरात्रकः ॥ १ ॥

दशरात्रः पञ्चमेऽस्य स्यादेकादशरात्रकः ।

[illegible] षष्ठे सन्दोऽष्टौ श्रुतः ॥ २ ॥

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

द्वादशाहगतानि स्युरहान्येकादशानि तु ।
नवमे दशमे तस्य शेषः सर्वं उदीरितः ॥ ३ ॥
अथाश्वमेधशेषाः स्युर्मन्त्राः सर्वान्होमगाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्या तीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीराजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥

(अथ सप्तमाष्टके तृतीयः प्रपाठकः)

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवं यतामर्थं [illegible] तिपद्य [illegible] स्थाणुꣳ हन्ति यो श्रेष्ठं न्येति स [illegible] यते [illegible] मेऽहन्नविवाक्य उपहन्यते स हीयते तस्य [illegible] उपहताय व्याह तमेवान्वारभ्य समश्नुतेऽथ यो व्याह सः (१) हीयते तस्माद्दशमेऽहन्नविवाक्य [illegible] न व्युच्यमथो खल्वाहुयज्ञस्य व [illegible] वाः स्वर्गं लोकमायन्यज्ञस्य व्यृद्धेनाद्धरान्पराऽभाव-

(पूर्वोक्तब्राह्मणशेषविधिकथनम्)

यज्ञिये यत्खलु वै यज्ञस्य समृद्धं तद्यज्ञपात्रस्य यद्व्यृद्धं तद्ब्राह्मणस्य स यो वै दशमेऽहन्नावि-वाक्य उपह्यते स एवातिरेचयति ते ये ब्राह्मा दृशीकवः (२) स्युस्ते ब्रि ह्रुयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युर्ध्यं यदि तत्र न विन्देयुर्गृह-पतिना व्युर्ध्यं तद्व्युर्ध्यमेवाथ वा एतत्सपराङ्गिया ऋत्विजः स्तुवन्तीयं वै सपत्नी राष्ट्री यद्वा अस्या किं चार्चन्ति यदानुचुस्तेनेयꣳ सपत्नी ते यदेव किं च ब्राह्माऽऽनृचुर्यदतोऽध्यर्चितारः (३) तदुभयमाप्त्वाऽवरुध्योत्तिष्ठाभेति तामिमेनसा स्तुवते न वा इमामश्वरथो नाश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमाꣳ सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजुꣳष्य-थैतस्यैवान्तो नास्ति यद्ब्रह्म तत्प्रतिगृणत आ चक्षीत स प्रतिगरः (४) ॥

(व्याह स दृशीकवोऽर्चितारः स एकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे तृतीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
षड्ब्राह्मणा द्वादशाहपर्यन्ता वर्णिताः क्रमात् ।
द्वितीयेऽथ तृतीयेऽस्मिन्तत्रजातमुदीर्यते ॥

(पूर्वोक्तद्वादशाहशेषेदशमेऽहन्यतिदेशकथनम्)

तत्र प्रथमेनानुवाकेन पूर्वोक्तद्वादशाहशेषत्वेन दशमेऽहनि कियानपि विशेषोऽभिधीयते ।

प्रथमं तावत्प्रमादाद्विस्मृतस्य कस्यचिदङ्गस्य स्मारणायान्येन यज्ञेन मतिषेधति—

प्रजवं वा इति । यदिदं दशममहरस्ति एतेन प्रजवं यन्ति अत्रानुष्ठेयाङ्गबाहुल्यात्तस्मिन्नेवाहनि कृत्स्नसमाप्तये प्रकृष्टो जवो वेगो यथा भवति तथैवानुतिष्ठन्ति । इयता प्रपञ्चेनैतदनुष्ठाने कारणमुच्यते—यद्दशममहरस्त्येतेन पापावहीयं भवन्ति पापस्यावहीयं हानिः पापक्षयमेतेनाहना भवन्ति प्राप्नुवन्ति । तस्मात्प्रयासं सोढ्वाऽपि त्वरया तदहरनुष्ठेयम् । त्वयाऽनुष्ठातुः स्खलने लौकिको दृष्टान्त उच्यते—चोरव्याघ्रादिभयाकुलमहारण्ये प्रजवं यतां प्रकर्षेण वेगो यथा भवति तथा गच्छतां पुरुषाणां मध्ये यः कोऽपि मन्दबुद्धिः पुरुषः पण्डितंमन्यः सन्सर्वेषां पुरस्तत्वरया गच्छन्बुद्ध्यपराधाद्राजमार्गं परित्यज्य केनाप्यमार्गेण गच्छति । यथान्यः पुरुषः सहसा गच्छन्पुरोवर्तिनं स्थाणुमदृष्ट्वा पादेन तं स्थाणुं हन्ति । योऽप्यन्यः पुरुषः कण्टकादिना रोगेण वा पीडितः सन्भ्रेषं न्येति गन्तुमशक्तो गमनश्रमं नितरां प्राप्नोति, स त्रिविधोऽपि पुरुषो हीयते रक्षाहेतोः सहायभूताद्गच्छतो जनसंघाद्धीनो भवति । यथाऽयं त्रिविधः पुरुषो हीनस्तथा दशमेऽह्न्यपि विस्मृताङ्गानुष्ठानः पुरुष ऋत्विक्संघाद्धीयते। सोऽत्र दार्ष्टान्तिक इहाभिधीयते । न यो वा एतेषां मध्ये यः कोऽप्यृत्विग्दशमेऽहन्युपहन्यतेऽस्मिन्नहन्यङ्गानुष्ठानविस्मृतिलक्षणमुपघातं प्राप्नोति । सोऽयमृत्विक्सम्यगनुष्ठातृभ्य ऋत्विग्भ्यो हीनो भवति । अविवाक्य इत्येतेन दशममहर्विशेष्यते । अन्येषु यागेषु यत्प्रमादादेकेन विस्मृतमङ्गं तदन्येन स्मारयितुं वक्तव्यं भवति । विकलं च तदङ्गं वक्तव्यं चेति विवाक्यं, न विद्यते विवाक्यमस्मिन्नहनि तदहरविवाक्यम्, एकेन विस्मृतमङ्गं जानताऽप्यन्येनास्मिन्नहनि न वक्तव्यमित्यर्थः । एवं सत्युपहताय स्खलितानुष्ठानाय तस्मा ऋत्विजे योऽन्यः कश्चिदृत्विग्ब्राह्मणो विस्मृतं त्वयेदमिति ब्रूते तमेव वक्तारमन्वारभ्यावलम्ब्य स्खलितानुष्ठानः स ऋत्विक्तमश्नुते सम्यगनुतिष्ठति । अथानन्तरं योऽन्यो व्याह विकलं ब्रूते सोऽयं विवचनेनापरावेन सम्यगनुष्ठातृभ्य ऋत्विग्भ्यो हीयते । तस्मात्कारणादविवाक्येऽस्मिन्दशमेऽहन्युपहताय स्खलितानुष्ठानाय न व्युच्यं विकलमङ्गं न वक्तव्यम् ।

पक्षान्तरमाह—

(पूर्वोक्तदर्शाहशेषविशेषकलापः)

अथो खल्वायुरिति। अभिज्ञास्त्वेवमाहुः-यज्ञस्य यत्तंपूर्णमनुष्ठानं तेन देवाः स्वर्गं गताः। यज्ञस्य यदनुष्ठानं विकलं तेनासुरा अपरमावयन्परमवं प्रापितवन्तः ॥ संपूर्णफलं यजमानगामि विकलं तु भ्रातृव्यगामि। एवं सति दशमेऽहनि यो यजमान उपहन्यते स्खलितानुष्ठानो भवति स एव यजमानोऽतिरेचयति शास्त्रीयमनुष्ठानमतिलङ्घयति। तथा सत्यनुष्ठानस्य विकलत्वेन न्यूनफलत्वात्तत्फलं भ्रातृव्यगामि स्यात्। अतस्तत्परिहाराय विरुद्धं वक्तव्यमेव। तदाऽऽर्त्विजो वक्तुः पूर्वोक्तरीत्या प्रत्यवायो भविष्यतीति तत्परिहाराय **यज्ञाङ्गभूतेभ्य** ऋत्विग्भ्यो बहिर्भूता यज्ञं द्रष्टुमागता ये केचित्पुरुषाः सन्ति तेऽत्र **विकलमङ्गं ब्रूयुः**। एवं सत्यार्त्विजः प्रत्यवायो न भविष्यति, विकलमङ्गं च समाहितं भवति।

अथ पक्षान्तरमाह—

यदि तत्रेति। तत्र तेषु द्रष्टुमागतेषु पुरुषेषु स्खलितप्रयोगाभिज्ञानृत्विग्यजमाना यदि न लभेरंस्तदानीमन्तःसदस्यात्सदसो यज्ञभूमेरन्तर्मध्ये वर्तमानैरेवर्त्विग्भिस्तद्विकलमङ्गं वक्तव्यम्।

पुनरपि पक्षान्तरमाह—

यदि तत्रेति। तत्र तेष्वृत्विक्षु वैकल्याभिज्ञान्पुरुषान्यदि न लभेरंस्तदानीं यजमानेन तद्विकलाङ्गं वक्तव्यम्।

सर्वेषां पक्षाणां तात्पर्यं निगमयति—

तदृत्विग्भ्य एवेति। किं बहुना द्रष्टुमागतैः पुरुषैर्वा तत्रत्यैर्ऋत्विग्भिर्वा यजमानेन वा सर्वथाऽपि तद्विकलमङ्गं वक्तव्यमेव। एव तर्हि विकलस्यावश्यवक्तव्यत्वाद्विवाक्यत्वविशेषणमयुक्तमिति चेन्नैवम्। अन्यथा योजयितुं शक्यत्वात्। विवाक्यं विकलाङ्गवचनं यथा प्रसक्तं न भवति तथा सावधानैरनुष्ठेयत्वाद्विशेषविवाक्यम्। इतरेष्वहःसु क्वचिद्वैकल्येऽप्यनायासेन समाधातुं शक्यम्। अत्र तु समाधानं दुःशकमित्यवश्यमप्रमत्तैर्भवितव्यमित्यर्थः।

अस्मिन्नहनि सानसग्रहकाले स्तोत्रविशेषं विधत्ते—

अथ वा एतर्हीति। अथ वा अनन्तरमेव मानसग्रहकाल इत्यर्थः। एतर्हीत्यस्मिन्नहनि सर्पराज्ञियाः सर्पस्वामिन्या भूमेः संबन्धिनीभिर्ऋग्भिर्भूमेः स्तुतिं कुर्युः। का सा सर्पराज्ञी कथं वा तस्याः सर्पराज्ञीत्वमिति तदुभयमुच्यते—**इयमेव भूमिः** सर्पतः संचारं कुर्वतः सर्वस्य प्राणिनो राज्ञी। एतेन का सा सर्प-

(पूर्वोक्तद्वादशाहशेषविशेषकेषणम्)

स्योत्तरं संवत्सरम् । अथ कथं सर्वराज्ञीत्वमित्यत्रोत्तरमुच्यते—पणिजां मध्ये परस्परोपकार्योपकारित्वस्य सद्भावात्केचिदर्चकाः [अर्चनीयाश्च] । तत्र यत्किंचित्पाणिजातमस्यां पुरुषा अर्चन्ति, यदानृचुर्येऽपि पुरुषा अर्चयितारः, तदुभयमप्यर्चनीयार्चयितृपाणिस्वरूपमस्यां पृथिव्यामेव वर्तते । तस्मात्सर्वतोऽर्चनादिव्यवहारं कुर्वाणाः पाणिजातस्याऽऽधार इति भूमिरियं सर्वराज्ञीत्युच्यते । तस्याः सर्वराज्ञ्याः संबन्धिन्य ऋचो भूमिर्भूम्नेत्यादयः । एते च मन्त्राः प्रथमकाण्डे पुनराधानप्रकरणे समाम्नाताः । ताश्च तत्रत्ये ब्राह्मण एतदाम्ना व्यवहृताः—' सर्वराज्ञिया ऋग्भिर्गार्हपत्यमादधाति ' इति । तस्माद्भूमिर्भूम्नेत्यृग्भिरेव स्तुतिं कुर्युः । स्तोतृणामत्र कोऽभिप्राय इति सोऽयमुच्यते—यदेव किंचित्पाणिजातमन्ये पुरुषा अस्यां भूमौ वाचा पूजितवन्तः, ये चास्या भूमेरुपर्यर्चितारस्तदुभयस्वरूपमपि स्तोतारो वयं प्राप्य तच्च स्वाधीनं कृत्वा पश्चादुचिताभिरेताभिर्ऋग्भिः स्तोतृणामयमभिप्रायः ।

स्तोत्रान्तरेभ्यः कांचिद्विशेषं विधत्ते—

तामिर्मनसेति । इतरैः स्तोत्रैर्वाचिकी स्तुतिः क्रियते । तामिस्तु सर्वराज्ञीभिरत्र मानसग्रहस्य प्रवर्तमानत्वान्मनसा स्तुतिं कुर्युः । तत्रायं हेतुरुच्यते—बलवद्भिरश्वैर्युक्तो रथोऽश्वरथः । अश्वतर्यस्तु संकीर्णजातयोऽश्वतरबलवत्तास्ताभिर्युक्तोऽश्वतरीरथः । तयोरन्यतरोऽप्येकस्मिन्नेव दिने भूमिमिमां कृत्स्नां व्याप्तुं नार्हति । मनस्त्वेकस्मिन्नेव क्षणे सर्वां भूमिं व्याप्तुमर्हति । अनिष्टं च सर्वं तिरस्कर्तुमर्हति । तस्माद्भूमिविषयाभिर्ऋग्भिर्मनसैव स्तोतव्यम् ।

यदुक्तं सूत्रकारेण—' होता चतुर्होतॄन्व्याचष्टे ' इति, तदिदं विधत्ते—

अथ ब्रह्मेति । पूर्वोक्ताभिर्ऋग्भिः संसदनकाले यत्र प्रथमप्रभृति प्रतिगरं प्रयुङ्क्ते तत्र तत्र प्रतिगरकाले होता ब्रह्मशब्दाभिधेयं चतुर्होतृमन्त्रं भूयात् । ' ब्रह्म वै चतुर्होतारः ' इति श्रुत्यन्तरसिद्धस्य मन्त्रस्य ब्रह्मत्वम् । ' ब्रह्मणी होता । द्यौरध्वर्युः ' इत्यादिकं आरण्यकाण्डाम्नातचतुर्होतृमन्त्रम् । एतेन सर्वेऽपि होतृमन्त्रा उपलक्षिताः । अत एव सर्वेषां होतृमन्त्राणां पृथक्प्रतिगरं सूत्रकारो दर्शयति—' ओतीति दशहोतुः प्रतिगरस्तथेति चतुर्होतुरभिस्थेति पञ्चहोतुस्तथेति षड्होतुरसस्येति होतारिति सप्तहोतुः ' इति । शंसितुः शंसनाह्वानस्य प्रतिगरः । तत्प्रतिगरविषयत्वेनारण्यकाण्डे का. सर्वे दशहोत्रादिमन्त्रा

१ क्ष घ. च ' थेचोयता ।

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

होत्रा वक्तव्याः। तस्मादमन्त्रं संगृह्य ब्रह्म वदन्तीत्यनेन वाक्येन विधीयते। मन्त्रान्तरपरित्यागेन ब्रह्मण एव वदने हेतुरुच्यते—य ऋचः पन्त्रास्ते परिमिताः क्वचित्क्वचिदेव प्रयोक्तव्यत्वात्। एवं यजुषां साम्नां च परिमितत्वम्। यत्तु ब्रह्मशब्दाभिधेयं होतुमन्त्रजातमेतस्यैवास्तः परिमितत्व आस्ति बहुषु प्रदेशेषु प्रयोक्तव्यत्वात्। तस्माद् ब्रह्मशब्दाभिधेयं होतुमन्त्रजातं प्रतिगृणते प्रतिगरार्थमृग्युक्तायाध्वर्यवे होत्रे प्रयच्छति। सोऽयं होतुमन्त्रसंघः प्रतिगीयत इति प्रतिगरः, अध्वर्युकर्तृकायां क्रियमाणक्रियायाः कर्मभूत इत्यर्थः।

अत्र मीमांसा।

दशमाध्यायस्य षष्ठपादे त्रयोदशाधिकरणे चिन्तितम्—

मानसं किमहर्भिन्नमङ्गं वा दशमेऽहनि।
भिन्नं स्तुत्यादिवदङ्गं तद्विसर्गोक्त्यादिभिर्भवेत्॥

द्वादशाहे मानसग्रहणं श्रूयते—'अनया वा पृथिव्या पात्रेण समुद्रस्य रसया प्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृह्णाति' इति। अयमर्थः—पृथिवी पात्रं समुद्रः सोमस्तद्रसः प्रजापतिर्देवता। एवं विशिष्टस्य ग्रहस्य ग्रहणे मनः साधनम्। तदिदं मानसमिति। एतच्च द्वादशाख्योऽहोभ्यो भिन्नमहस्त्रयोदशेऽहनि कर्तव्यो यागविशेषः। कुतः, स्तुत्यादिभ्यः। मानसेन द्वादशाहस्य स्तुतिरेवमाम्नायते—'द्वादशाहस्य वत्सरस्यानि च्छन्दांसि तानि मानसेनाऽऽप्याययन्ति' इति। स्तुतिसाधनं च मानसं स्तोतव्यादहिर्भवितुं युक्तम्। तथा व्यपदेशभेदोऽपि श्रूयते—'वाग्वै द्वादशाहो मनो मानसम्' इति। एवमायुरपचितिमिन्द्रियमहरिति पाने वक्ष्यामः—दशमस्याह्नोऽङ्गं वत्स्यादिवदिसर्गोक्त्यादिभ्यः। 'एष वै दशमस्याह्नो विसर्गो यन्मानसम्' इति विसर्गोक्तिः। इयं च दशमाहाङ्गत्वं गमयति। अङ्गत्वात्ते द्वादशाहसंबन्धाच्च विरुध्यते। अङ्गभूतेनापि मानसेन स्तुतिव्यतिरेकेणादिकमुपपद्यते। तस्मादङ्गम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अहीनद्वादशाहकथनम्)

(अथ सप्तमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाह्नर्त्विजां यजमानो वृङ्क्ते किं तेज इन्द्रिय-मिति किं द्वितीयेनेति प्रा[illegible]ह्मण्यमिति किं तृतीयेनेति त्रीनिमाँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरा पङ्क्तिमिति किꣳ षष्ठेनेति षडृतूनिति किꣳ सप्तमेनेति सप्तपदाꣳ शाक्वरीमिति (१) किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतꣳ स्तोममिति किं दशमेनेति दशाक्षरा विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरा जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते (२)॥

(शाक्वरीमित्येकचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके द्वादशाहगतमविधिकमर्थजातं प्रपञ्चितम्। अथ द्वितीये प्रश्नोत्तराभ्यामहीनद्वादशाह आर्त्विज्यनिन्दामुखेन तद्याजिनं यजमानं प्रशंसति—

ब्रह्मवादिने इति। अहीनस्य द्वादशाहस्यानुष्ठाता यजमान ऋत्विजां संबन्धि यच्छ्रेयोऽस्ति तत्सर्वं तैर्वर्जितं यथा भवति तथा भूतं सर्वमादत्त इत्येवमर्थं(+सिद्धवत्कृत्य केनाहर्विशेषेण किं फलविशेष इत्येवं) ब्रह्मवादिनः पप्रच्छुः। तत्राभिज्ञः कश्चित्तेजआदिकं क्रमेणाऽऽदत्त इत्युत्तरं ब्रूते।

+ धनुश्चिह्नान्तर्गतं ख पुस्तक एव।

(त्रयोदशर [illegible] नम्)

पञ्चाक्षरपादान्वितं यत्तद्भिरुक्तस्तेन साध्य फलं वृङ्क्ते । एवं तत्र तत्र यथा-योगमूह्येयम् । एतैरुक्तैर्द्वादशभिर्वाक्यैर्यावदेतच्छेष उक्तमेतावद्देवत्यिजां विद्यात्तावत् श्रेयः । अतो यावदेषामस्ति तावद्धे यजमान आदत्ते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः) ।

एष वा आप्तो द्वादशाहो यत्त्रयोदशरात्रः समानꣳ ह्येतदहर्यत्प्रायणीयश्चोदयनीयश्च व्यति-रात्रो भवति त्रयं इमे लोका एषां लोकानामा-प्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽ-पानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठ-न्ति सर्वमायुर्यन्ति य एवं विद्वाꣳसꣳस त्रयोदशरात्र-मासते तदाहुर्यद्वा एषा वितता (१) यद्द्वादशा-हस्तां वि च्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक्स्यादुपरिष्टाच्छन्दोमानां महाव्रतं कु-र्वन्ति संततामेव वाचं रुन्धतेऽनुपदासुका गृह-पतेर्वाग्भवति [illegible] छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमा [illegible] महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति (२) ॥

(वितता विंशत्यारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः) ।

द्वितीये द्वादशाहयाजिनः प्रसंशाऽभिहिता । अथ तृतीये त्रयोदशरात्रस्तोऽभिधीयते—

एष वा आप्त इति । योऽयं त्रयोदशरात्रो विधास्यमान एष एव संपूर्णो द्वादशाहः । पूर्वस्माद्द्वादशाहादेकदिनाधिक्येन फलाधिक्यमाङ्क्षिताधिक्ये सति केन साम्येन द्वादशाहत्वमिति चेत् । तदुच्यते—प्राग्वणीय उदयनीयश्चेत्युभयं द्वादशाहे यादृशं तादृशमेवात्रापीति द्विविधस्याहनः समानत्वाद्द्वादशाहत्वोपचारः ।

अथ विशेषं विधत्ते—

व्यतिरात्र इति । द्वादशाहे प्राग्वणीयोदयनीयौ द्वौ विधातिरात्रौ । अत्र तु मध्येऽपि कश्चिदतिरात्रः । येन स्तोकस्तावानेव । अभिहर्तव्यौ सूत्रकारो दर्शयति—' अतिरात्रः षष्ठ्यः षडहः सर्वस्तोमोऽतिरात्रस्तावत्स्तोमा अतिरात्रः ' इति । यद्यपि चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशत्त्वात्र एव च्छन्दोमा विद्यमानास्तथाऽप्यन्येषां वृद्धिर्वा [1]येनाष्टाचत्वारिंशस्याऽऽवृत्त्या चतुःसंख्या पूरणीया ।

अथ त्रयोदशरात्रं विधत्ते—

प्राणो वै प्रथम इति । व्यानेनोदानादीनामप्युपलक्षितत्वादुदानेनोपसंहारो न विरुद्धः ।

योऽयं मध्यमोऽतिरात्रस्तस्य च्छन्दोमानामधस्तात्सूत्रकारः स्वातन्त्र्यानुसारेण स्थानं निर्दिदेश तदिदं दूषयित्वा छन्दोमानामुपरि स्थानं विधत्ते—

तदाहुर्वाग्वा इति । योऽयं द्वादशाहोऽस्ति स [illegible] वाक्स्वरूपः । तत्रत्येष्वहःसु विद्यमानानां स्तोत्रशस्त्राणामविच्छेदस्य [illegible] भूते तस्मिन्द्वादशाहे कल्पत्वात् । एवं च सति षडहस्थे च्छन्दोमानां च मध्ये यदि कश्चिदन्यः सर्वस्तोमोऽतिरात्रोऽनुष्ठीयेत तदानीं द्वादशाहगतां कल्पां संततां वाचमनुष्ठातारो विच्छिन्द्युः । तथा सति यजमानस्य वागुपक्षीयेत । अतस्तत्परिहाराय च्छन्दोमानामुपरि यदविवाक्यमहर्द्वादशाहगतं तदेवाहः सर्वस्तोमातिरात्ररूपं कुर्यात् । तस्मिंश्च महाव्रतधर्मातिदेशाभिप्रायेण महाव्रतशब्दप्रयोगः । एवमुपरिष्टादनुष्ठाने सति संततामेव वाचं प्राप्नोति । न तु यजमानस्य वागुपक्षीयते ।

---

१ क. घ. ङ. °क्यादिना° ।

(चतुर्दशरात्रकथनम्)

तदेवोपरिष्टादनुष्ठानं प्रकारान्तरेण प्रशंसति—

पशवो वा इति। सत्रं पशु[illegible]द्घृतक्षीरादिरूपमन्नाद्यं युक्तम्। तस्मादुत्तरूपस्य महान्नत्वधर्मकस्यातिरात्र[illegible]रष्टदेवानुष्ठानं न्याय्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै त उभयोर्लोकयोरार्ध्नुवन्नस्मिꣳश्चामुष्मिꣳश्च य एव विद्वाꣳसश्चतुर्दशरात्रमाहरंत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिꣳश्चामुष्मिꣳश्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै यत्पराचीनानि पृष्ठानि (१) भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रिꣳशौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै (२)॥

(पृष्ठानि चतुस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयेऽनुवाके त्रयोदशरात्रोऽभिहितः । अथ चतुर्थे चतुर्दशरात्रोऽभिधीयते । तमेतं विधत्ते—

आदित्या इति। तत्राहनां संख्यां प्रशंसति—

चतुर्दशरात्र इति। ग्राम्याश्चाऽऽरण्याश्चासक्रुद्दृश्याख्याताः ।

प्रायणीयोदयनीययोर्मध्यवर्तीनि द्वादशसंख्याकान्यहानि विधत्ते—

यत्परार्चीनानीति । रथंतरबृहद्वैरूपवैराज शाक्वररैवतसामसाध्यैः पृष्ठस्तोत्रैरुक्तान्यहानि पृष्ठानीत्युच्यन्ते । तेषामुक्तः क्रमः पराचीनत्वं, विपरीतक्रमः प्रतीचीनत्वम् । तेन द्वैविध्येन लोकद्वयमाप्नोति ।

एतमेवाऽऽरोहावरोहप्रकारं पुनः प्रशंसति—

त्रयस्त्रिꣳशाविति। त्रिवृत्पञ्चदश. [illegible] त्रिणवस्त्रयस्त्रिꣳश इत्येष स्तोमानां षट्त्विहाऽऽरोहक्रमः । त्रयस्त्रिꣳशस्त्रि [illegible] एकविꣳशः सप्तदशः पञ्चदशस्त्रिवृदित्ययमवरोहक्रमः । एवं च सत्येषु द्वादश [illegible]ःसु मध्ये षष्ठसप्तमयोरहर्नामभिरन्तर्येण त्रयस्त्रिꣳशस्तोमौ संपद्येते । तेन च यजमानाः साम्राज्यं गच्छन्ति । किंचैतावन्येषां स्तोमानामधिराज वर्चीनानां तत्रान्तर्भावात् । अतो यजमानाः सर्वेषामन्येषामधिराजा भवन्ति ।

अथ प्रायणीयोदयनीयावहर्विशेषौ विधत्ते—

अतिरात्राविति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः)।

**प्रजापतिः सुवर्गं लोकमैत्तं देवा अन्वायन्ता-
नादित्याश्च पशवश्चान्वायन्त देवा अब्रुवन्यान्पशू-
नुपाजीविष्म त इमेऽन्वागन्निति तेभ्य एतं चतु-
र्दशरात्रं प्रत्यौहन्त आदित्याः पृष्ठैः सुवर्गं लोक-**

(अन्यच्चतुर्दशरात्रकथनम्)

माऽरोहन्त्यहाभ्यामस्मिँल्लोके पशून्प्रत्यौहन्पृष्ठैरा-
दित्या अमुष्मिँल्लोक आर्ध्नुवन्त्यहाभ्यामस्मिन्(१)
लोके पशवो य एवं विद्वाꣳसश्चतुर्दशरात्रमासत
उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिꣳश्चामुष्मिꣳश्च
पृष्ठैरवामुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिँल्लोके
ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योति-
रन्तरिक्षं गौरसावायुरिमानेव लोकान्भ्यारोहन्ति
यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मध्ये पृष्ठानि
भवन्ति सविवधत्वाय (२) ओजो वै वीर्यं पृष्ठा-
न्योजं एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां
यन्तीयं वाव रथंतरमसो बृहदाभ्यामेव यन्त्यथो
अनयोरेव प्रतिष्ठित्यै ते वै यज्ञस्यार्ञ्जसायनी
स्तुती ताभ्यां [illegible] लोकं यन्ति पराञ्चो वा
एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि
पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या
अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति चतु-
र्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्-
विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो
दिक्ष्वेव प्रतिष्ठन्त्यतिरात्रावभितो भवतः परि-
गृहीत्यै (३) ॥

(आर्ध्नुवन्त्यहाभ्यामस्मिन्त्सविवधत्वाय प्रतिष्ठित्या
एकत्रिꣳश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अन्यच्चतुर्दशरात्रकथनम्)

(अथ सप्तमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः)

चतुर्थेऽनुवाक एकश्चतुर्दशरात्रोऽभिहितः । अथ पञ्चमेऽन्यश्चतुर्दशरात्रोऽभिधीयते ।

तमेव विधातुं प्रस्तौति—

प्रजापतिः सुवर्गमिति । यदा प्रजापतिः स्वर्गं गतस्तदा प्रजापतिमनु सर्वेऽपि देवा गताः । तान्देवाननु पश्चादादित्याः पशवश्च गताः । तानादित्यान्पशूनुभयविधान्दृष्ट्वा ते देवाः परस्परमिदमब्रुवन्—यान्पशूनुपेत्य मनुष्यैः सहिताः सर्वे वयमजीविष्म ते पशवः सर्वेऽप्यस्माकं पृष्ठत एव समागताः । आगतानामादित्यानां पशूनां च मध्य आदित्याः स्वर्गमारोहन्तु, पशवः प्रतिनिवृत्य भूमौ स्थास्यन्ति, तत्र क उपाय इति विचार्यैतं चतुर्दशरात्रं प्रत्यावृत्तिगुणयुक्तमनुष्ठितवन्तः । तत्रयमहःक्लृप्तिः—आदावेकोऽतिरात्रः । ततो ज्योतिर्गौरायुरित्यारोहरूपस्त्रिरात्रः । ततः पृष्ठ्यः षडहः । तत आयुर्गौर्ज्योतिरित्यवरोहरूपस्त्रिरात्रः । ततोऽतिरात्र इति । तस्मिन्ननुष्ठिते सति पृष्ठशब्दाभिधेयैः षड्भिरहोभिरादित्याः स्वर्गमारोहन् । प्रत्यावृत्तियुक्ताभ्यां त्र्यहाभ्यां देवाः पशूनस्मिँल्लोके प्रतिनिवर्तितवन्तः । तत्राऽऽदित्याः पृष्ठैः स्वर्गं प्राप्य तत्र समृद्धिं गताः । पशवस्तु त्र्यहाभ्यामस्मिँल्लोके समृद्धिं गताः ।

तदिदानीं विधत्ते—

य एवं विद्वानिति । अथाऽऽरोहरूपं प्रथमं त्र्यहं विधत्ते—

ज्योतिर्गौरायुरिति । ज्योतिष्टोमगोष्टोमायुष्टोमरूपा अहर्विशेषा मिलित्वा त्र्यहः । तेन च त्रित्वसाम्यात्लोकत्रयप्राप्तिर्भवति ।

अथ षडहगतान्यहानि विधत्ते—

यदन्यतः पृष्ठानीति । विवधशब्देनोभयतः शिक्यपाशितः क्षीराज्यादिवाही काष्ठविशेष उच्यते । तस्य चोभयतो भारः समानः । एवं सत्यत्रायं पृष्ठ्यः षडह आदावन्ते वा यद्येकस्मिन्पार्श्व [illegible] विवधलक्षणमिदं कर्म स्यात् । अतो विवधसदृशत्वात्पृष्ठ्यान्यहानि मध्ये कृतानि । किंचैतानि पृष्ठानि शरीरबलस्येन्द्रियसामर्थ्यस्य च हेतुत्वात्तद्वन्ति, तस्मात्तेषां मध्यवोऽनुष्ठाने सत्योजो वीर्यं च मध्ये धृतं भवति ।

अथ तेष्वहःसु चोदकप्राप्तानि वैरूपवैराज[illegible]सामान्यपवादेन विधत्ते—

बृहद्रथंतराभ्यामिति । प्रथमतृतीयपञ्चमेष्वहःसु रथंतरसाम्ना पृष्ठस्तोत्रं

(पञ्चदशरात्रकथनम्)

निष्पादनीयम्। द्वितीयचतुर्थषष्ठेष्वहःसु बृहत्साम्नेति विवेकः। अवशिष्टं वाक्यम् 'साध्या वै देवाः सुवर्गकामाः' इत्यस्मिन्ननुवाके व्याख्यातम्।

अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते -

पराञ्चो वा इति। ये यजमाना अनुक्रमगतानि पृष्ठाख्यान्यहान्यनुतिष्ठन्त्येते यजमानाः प्रत्यावृत्तिरहिताः स्वर्गमारोहन्ति। अतः स्वर्गात्प्रत्यवरोहाय प्रत्यावृत्त आयुर्गौर्ज्योतिरित्येवंनिरूढः कर्तव्यः। अपि चायं त्र्यहोऽस्मिँल्लोके प्रतिष्ठायै संपद्यते। तस्मादुभयारोपे लोकयोः समृद्धिं प्राप्योत्कर्षेण तिष्ठन्ति।

अहर्गतां संख्यां प्रशंसति—

चतुर्दशैतास्तामामिति। चतुर्दशरात्रक्रतुगता या रात्रय एताश्चतुर्दशसंख्याकास्तासां या रात्रयो दशसंख्याकास्ताभिः संख्यासाम्याद्विराड्द्वाराऽन्नप्राप्तिः। यास्तूपरिष्टाच्चतस्रो रात्रयस्ताभिः संख्यासाम्याच्चतुर्दिक्षु प्रतितिष्ठन्ति।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

(अथ सप्तमाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः।)

इन्द्रो वै सदृङ्देवताभिरासीत्स न व्यृध्यमानोऽच्छत्स प्रजापतिमुपाधावत्तस्मा एतं पञ्चदशरात्रं प्रायच्छत्तमाहरत्तेनायजत ततो व सोऽन्याभिर्देवताभिर्व्यार्धिगच्छद्य एव विद्वाꣳसः पञ्चदशरात्रमाहरत एवादृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षम् (१) गौरसावायुरेष्वेव लोकेषु प्रतितिष्ठत्यथो वा एतयदंछन्दोमं यच्छ-

स्तोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरर्धं रुन्धते पशूञ्छन्दोभिरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यतिरात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै (२) ॥

(अन्तरिक्षमिन्द्रियस्यैकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमे द्वि[illegible]पञ्चतुर्दशरात्रोऽभिहितः [illegible] पञ्चदशरात्रोऽभिधीयते । तमेतं विधत्ते—

इन्द्रो [illegible] इति । देवस्वामि[illegible] स्वामित्वमलभमानोऽन्याभिर्देवताभिः स[illegible] ऽऽसीच्च तु[illegible] । ततः प्रजापतिं गत्वा प्रजापत्युपदेशाच्च [illegible]मनुष्ठाय [illegible] । तद्वदेवापि तमनुष्ठाय पाप्मना भ्रातृव्येण च व्यावृत्ता भवन्ति ।

तत्रैकं व्यूह[illegible]—

ज्योतिर्गौरायु[illegible] । अत्र चतुश्छन्दोऽन्तर्गतं षडहं च विधत्ते—

अमत्रं वा इ[illegible] । [illegible] च्छन्दोरहितस्य सत्रत्वनिषेधे तात्पर्यं, किंतु च्छन्दोमवतः प्रशंसनार्थं तत्र [illegible] । अत एतस्य च्छन्दोमवत्त्वे सति प्रशस्तं सत्रं भवति । किंच पृष्ठस्तोमैरहोभिर्देवताः प्राप्नुवन्ति । छन्दोमैश्चतुर्भिः पशून्प्राप्नुवन्ति । किंच पृष्ठाना षण्णामहनामोजोवीर्यरूपत्वाच्छन्दोमानां चतुर्णामहनां पशुरूपत्वाच्च तदनुष्ठानेनोभे(भय)ओजआदिषु प्रतितिष्ठन्ति । तस्मात्पृष्ठयः षडहश्चत्वारश्छन्दोमा इत्येतानि दशाहान्यनुष्ठेयानीत्यर्थः ।

अथ क्रतुगतामहःसंख्यां प्रशंसति—

पञ्चदशरात्र इति । पञ्चदशस्तोमस्य हिंसाहेतुत्वाद्वज्रत्वम् । तद्धेतुत्वं च होतृब्राह्मणे समाम्नातम् ' तं पञ्चदशः स्तोमो मध्यत उदतृणत् ' इति । एत-

(द्वितीयपञ्चदशरात्रकथनम्)

त्संख्यासाम्येन पञ्चदशरात्रस्यापि वज्ररूपत्वात्तदनुष्ठातारो भ्रातृव्येभ्यो वज्रं प्रहरन्त्येव ।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति । अस्य क्रतोरिन्द्रेणानुष्ठि त्वेन्द्रियपरिग्रहः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये [illegible] कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्त[illegible] तृ[illegible] पाठके षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तम [illegible] तृ[illegible] पाठ [illegible] नुवाकः

इन्द्रो वै [illegible] [illegible] तिष्ठित [illegible] [illegible] सु-रेभ्योऽबिभेत्[illegible] [illegible] [illegible] वावत्तस्मा [illegible] [illegible] रात्रं वज्रं [illegible] [illegible] सुरान्पराभाव्य [illegible] गत्य श्रियमगच्छ[illegible] [illegible] [illegible] ष्मानं निरदहत्[illegible] [illegible] रात्रेणौजो [illegible] [illegible] न्द्रियं वीर्यमात्मन्नधत्त य एवं विद्वा२ꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव परा-भाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं निः (१) दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्दधत एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरं पशवोऽनुप्र जायन्ते तस्मात्पशव्या एता एव सं[illegible] पञ्चदश वा अर्धमासस्य रात्रयोऽर्ध-मास [illegible] त्सर आप्यते संवत्सरः सुवर्गो लो[illegible] [illegible] त्सुवर्गो ज्योतिर्गौरायुरिति त्र्यहो भव-तीयं [illegible] व ज्योतिरन्तरिक्षम् (२ गौरसावायुरिमा-नेव लोकान्भ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विवि-धꣳ स्या[illegible] [illegible] नि भवन्ति सविधत्वायौजो

वै वीर्यं पृष्ठान्योर्ज एव वीर्यं मध्यतो दधते बृह-द्रथंतराभ्यां यन्तीयं वाव रथंतरमसा बृहदाभ्या-मेव यन्त्यथो अनयोरेव प्रतिष्ठित्यै वै यज्ञ-स्यौज सार्धनी स्तः ताभ्यामेव सुवर्गं लोकम् (३) यन्ति परांचो वा एते सुवर्गं लोकमभ्यारोहन्ति ये परांचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङ्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरुद्-द्ध्वोरिति पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रतिष्ठित्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै पशूनां परि-गृहीत्यै (४) ॥

(गच्छन्त्यग्निष्टुता पाप्मानं निरन्तरिक्षं लोकं प्रजायै द्वे च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टक तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके प्रथमः पञ्चदशरात्रोऽभिहितः । अथ सप्तमे द्वितीयः पञ्चदश-रात्रोऽभिधीयते ।

तमेतं विधत्ते-

इन्दो वै शिथिल इति । इन्द्रः कदाचिच्छिथिलो दौर्बल्यात् शोदुधुमसमर्थः सेना-रहित एकाकी दरिद्र इवैकत्रावस्थातुमसुरोपद्रवरहितं स्थानमलभमान आसीत् । सोऽसुरेभ्यो भीतः सन्प्रजापत्युपदेशाद्वज्रसाधनं वक्ष्यमाणं पञ्चदशरात्रकतुम-नुष्ठाय तेन तानसुरान्पराभूतान्कृत्वा स्वयं विजितः श्रियमाप्नोत् । तस्मिन्कर्तौ यदिदमग्निष्टुदाख्यं द्वितीयमहस्तेन स्तोमसाधनहेतुं पाप्मानं निर्दग्धवान् । अवशिष्टेन

(द्वितीयपञ्चदशरात्रकथनम्)

पञ्चदशरात्रकतुभागेन बलहेतुमेजोरूपं सम्पादयितुं शारीरं बलमिन्द्रियपाटवं युद्धे विजयोत्साहं च स्वस्मिन्सम्पादितवान्।

वेदनं प्रशंसति—

य एवं विद्वाꣳस इति। इन्द्रवदग्नेऽपि यजमानाः फलं प्राप्नुवन्ति।

एतस्मिन्क्रतौ विद्यमानाः पञ्चदशसंख्याका रात्रीः प्रशंसति—

एता एव पशव्या इति। अस्मिन्क्रतौ या रात्रय एताः पशुभ्यो हिताः तत्प्राप्तिहेतुत्वात्। कथमिति तदुच्यते—एकस्यार्धमासस्य पञ्चदश रात्रयः सन्ति। स चार्धमासः क्रमेण वर्तमानः संवत्सरत्वमापद्यते। पशवश्च संवत्सरमात्रं गर्भे स्थित्वा प्रजायन्ते। तस्माच्चा रात्रयः संख्याद्वारा पशुहेतुभूताः।

पुनरपि प्रकारान्तरेण प्रशंसति—

एता एव सुवर्ग्या इति। पूर्वोक्तरीत्या संख्याद्वारा संवत्सरसंपत्तौ सत्यां स संवत्सरो वसन्तकालीनज्योतिष्टोमानुष्ठानद्वारा स्वर्गप्राप्तिहेतुः। तस्मादेता रात्रयः स्वर्गाय हिताः।

अथाहर्विशेषा विधातव्याः। तत्राग्निष्टुदाख्यमेकमहः स्तुत्यैवोन्नीतविधिकमिति द्रष्टव्यम्। अग्निष्टुता पाप्मानं निरदहनेति स्तुतिः पूर्वमुदाहृता। अत ऊर्ध्वं त्र्यहं विधत्ते—

ज्योतिर्गौरायुरिति। पूर्ववद्व्याख्येयम्।

अथ पृष्ठ्यषडहगतान्यहानि विधत्ते—

यदन्यतः पृष्ठानीति। एतदपि पूर्ववद्व्याख्येयम्।

आरोहरूपस्त्र्यहः पूर्वं विहितः। इदानीमवरोहरूपं त्र्यहं विधत्ते—

पराञ्चो वा इति। एतदपि पूर्ववद्व्याख्येयम्।

अथ क्रतुगतां रात्रिसंख्यां प्रशंसति—

पञ्चदशैतास्तासामिति। ऊर्ध्वया सह दिशां पञ्चत्वम्। अन्यत्पूर्ववद्व्याख्येयम्। प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। इन्द्रेणानुष्ठितत्वादिन्द्रियहेतुत्वं, वज्ररूपत्वाच्च वीर्यहेतुत्वं, पशव्यत्वस्य च पूर्वमुक्तत्वात्तस्य चोपलक्षणत्वात्पशुहेतुत्वम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

१ ख. निर्दहन्त इति। २ ख. घ. ङ. च. तत।

(सप्तदशरात्रकथनम्)

(अथ सप्तमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

प्रजापतिरकामयतान्नादः स्यामिति स एतꣳ सप्तदशरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वाꣳसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतिं तिष्ठन्त्यथा पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धतेऽसत्रं वा एतत् (१) यदंछन्दोमं यच्छंन्दोमा भवन्ति तेनं सत्रं देवता एव पृष्ठैरवं रुन्धते पशूञ्छंन्दोमैरोजो वै वीर्यं पृष्ठानिं पशवश्छन्दोमा ओजस्येव वीर्यें पशुषु प्रतिं तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः । प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिंगृहीत्यै (२) ॥

(एतत्सप्तविꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमे द्वितीयः पञ्चदशरात्रोऽभिहितः । अथाष्टमे सप्तदशरात्रोऽभिधीयते । तमेतं विधत्ते-

प्रजापतिरिति । अथैतदीयेष्वहःसु ज्योतिर्गौरायुरित्येवंविधमहनां पञ्चकं विधत्ते-

पञ्चाहो भवतीति । द्विरावृत्ते ह्यहे द्वितीयज्योतिर्वर्जितोऽवशिष्टः पञ्चाहः । हेमन्तशिशिरयोरेकीभावादृतूनां पञ्चत्वम् ।

अथ पृष्ठ्यं षडहं चतुरश्छन्दोमांश्च विधत्ते-

असत्रं वा इति । पूर्ववदुव्याख्येयम् ।

(विंशतिरात्रकथनम्)

ऋतुगतां रात्रिसंख्यां प्रशंसति—

सप्तदशरात्र इति। आश्रावयेत्यादिसप्तदशाक्षरात्मकत्वात्प्रजापतेः सप्तदशत्वम्।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। अन्नाद्यस्य फलत्व विधिवाक्ये स्पष्टम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमाष्टके तृतीयप्रपाठके नवमोऽनुवाकः)।

सा विराड्विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभयꣳ सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता विꣳशतिꣳ रात्रीरपश्यन्ततो वै त उभयꣳ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन्य एवं विद्वाꣳस एता आसत उभयमेव सं वृञ्जते ब्रह्म चान्नं च (१) ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत्तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकान्भ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं (२) लोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते

(विंशतिरात्रकथनम्)

बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिं तिष्ठन्त्येते वै यज्ञस्यांञ्जसायनी स्तुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङयहो भवति प्रत्यवरूढचा अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्योत्तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चसस्याव्यात्यै परिगृहीत्यै (३) ॥

(वृञ्जते ब्रह्म वार्चं च सुवर्गमेवे सुवर्गं त्रयोविंशतिश्च)

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः) ।

अष्टमे सप्तदशरात्रोऽभिहितः । अथ नवमे विंशतिरात्रोऽभिधीयते । तत्रेतं विधत्ते—

सा विराडिति । दशरात्राभिमानिनी काचिद्विराड्देवता रूपद्वयेन विभज्यातिष्ठत्—देवेषु ब्रह्मवर्चसरूपेणासुरेषु चान्नरूपेण । तदानीं देवा असुरेभ्योऽन्नमपनीय तदेतदुभयं वयमेव लभेमहीत्यकामयन्त । ततस्तत्साधनत्वेन वक्ष्यमाणा विंशतिसंख्याका रात्रीर्निश्चित्य तदनुष्ठानेनासुरेभ्यस्तदपनीय स्वयमेवाधिकेन ब्रह्मवर्चसेनान्नेन च संपन्ना अभवन् । एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नुवन्ति । पूर्वत्राहःसंघप्राधान्येन सप्तदशाहपञ्चदशरात्रादीनामेकवचनेन निर्देशः । अत्र तु ऋत्ववयवभूतरात्रिप्राधान्येन बहुवचननिर्देशः ।

ऋतुगतां विंशतिरात्रिसंख्यां [illegible]

द्वे वा एते इति । दशसंख्योपेते द्वे एते अहोरात्रे भवेते । तयोश्च ब्रह्मवर्चसान्नसाधनभूतयोः [illegible] फलान्तरनिरपेक्षत्वेनैव संपूर्णं लभत इत्यर्थः । [illegible] ब्रह्मवर्चसम् ।

(विंशतिरात्रकथनम्)

धनिकसभायामुपयुक्ताऽन्नसमृद्धिः । एवं नानाविधा प्रतिष्ठा । किंच पुरुषस्य हस्तपादगताङ्गुलिसंख्यासाम्याद्यावान्गुणसंघः पुरुषे संभावितस्तं सर्वं प्राप्नोति।

अथात्र नवाहानि विधत्ते—

ज्योतिर्गौरायुरिति । यथा प्रथमरूपहो ज्योतिरादिक एवं द्वितीयतृतीयाऽपि ज्योतिरादिकौ न त्वत्र कश्चिदप्यायुरादिकोऽस्ति । एवं सत्यनुक्रमेणैवं स्वर्गमभ्यारोहन्ति ।

एतेषां त्र्यहाणां वक्ष्यमाणत्र्यहस्य च मध्ये पृष्ठ विधत्ते

यदन्यतः पृष्ठानि स्युरिति । पूर्वोक्तेषु त्र्यहेषु योऽयमन्त्यरूपहो यश्च भावी त्र्यहस्तयोरुभयोर्मध्यवर्तित्वेन विवक्षसाम्यम् । अन्यत्पूर्ववद्व्याख्येयम् ।

अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते -

पराञ्चो वा इति । पूर्ववद्व्याख्येयम् ।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति । फलद्वयं विधिवाक्य एव विस्पष्टम ।

अत्र मीमांसा ।

चतुर्थाध्यायस्य तृतीयपादेऽष्टमाधिकरणे चिन्तितम्—

स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहाग्निमः ।
पूर्ववत्स्यात्प्रतिष्ठाऽत्र श्रुता तेनाश्रुताद्वरम् ॥

सत्रकाण्डे श्रूयते—' प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति ' इति, 'ब्रह्मवर्चसिनोऽन्नादा भवन्ति ' इति, ' य एता उपयन्ति ' इति च । द्वादशाहादूर्ध्वभाविनस्त्रयोदशचतुर्दशरात्रादयः सर्वे सत्रविशेषाः । त्रयोदशसंख्पाका रात्रयो यस्मिन्सत्रविशेषे सोऽयं त्रयोदशरात्र इति समुदायप्राधान्येनैकवचनान्ततया प्रायेण निर्देशो भवति । क्वचित्तु समुदायेना रात्रिविशेषाणां प्राधान्यमभ्युपेत्यैक एव सत्रविशेषो बहुवचनान्तेन रात्रिशब्देनाऽऽम्नायते । तद्यथा—' त एता विꣳशतिꣳ रात्रीरपश्यन् ' इति । तादृशे रात्रिसत्रे विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति प्राप्ते ब्रूमः-अस्य रात्रिसत्रविधेस्तावदर्थवादे प्रतिष्ठा श्रुता । सा चास्मिन्वाक्येऽत्यन्ताश्रुतात्स्वर्गात्पूर्वा सत्रा । तस्मात्प्रतिष्ठाकामो रात्रिसत्रं कुर्यादित्येवं प्रतिष्ठैव फलत्वेन कल्पनी[4] ॥

---

१ क °वत्सा प्रति° । २ क. घ. ङ. 'ता नेहाश्रुतात्पर° । ३ ग्व °णां प्रत्येकं प्रा° । ४ ख. °विधेः स्तावकेऽर्थ° ।

(एकविंशतिरात्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः) ।

असावादित्योऽस्मिल्लोक आसीत्तं देवाः पृष्टैः परिगृह्य सुवर्गं लोकमगमयन्परैरवस्तात्पर्यगृह्णन्दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन्परैः परस्तात्पर्यगृह्णन्पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मिल्लोके परैरुभयतः परिगृहीतो यत्पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात्परिगृह्णन्ति दिवाकीर्त्येन (१) सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात्परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत्परे परस्तान्न स्युः परांचः सुवर्गाल्लोकान्निष्पद्येरन्यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्ये परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यꣳ संवत्सरः परःसामानोऽभितो दिवाकीर्त्ये परःसामानो भवन्ति संवत्सर एवोभयतः (२) प्रति तिष्ठन्ति पृष्ठे वै दिवाकीर्त्ये पार्श्वे परःसामानोऽभितो दिवाकीर्त्ये परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठꣳ ह्यस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्रꣳसाय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधति यत्पराचीनानि पृष्ठानि

(एकविंशतिरात्रकथनम्)

भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न (३) प्रत्यवरोहेयुरुद्वा मार्येयुर्यजमाना. प्र वा मीयेर-यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनु-न्मादायेन्द्रो वा अप्रतिष्ठित आसीत्स प्रजापतिमुपाधावत्तस्मा एतमेकविꣳशतिरात्रं प्रायच्छत्त-माऽहरत्तेनायजत ततो वै म प्रत्यतिष्ठद्ये बहुयाजि-नोऽप्रतिष्ठिताः (४) स्युस्त एकविꣳशतिरात्रमा-सीरन्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असा-वादित्य एकविꣳश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत्तस्मा एतमेकविꣳशतिरात्रं प्राय-च्छत्तमाऽहरत्तेनायजत ततो वै सोऽरोचत य एवं विद्वाꣳस एकविꣳशतिरात्रमासते रोचन्त एवैक-विꣳशतिरात्रो भवति रुग्वा एकविꣳशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविꣳशोऽति-रात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृ-हीत्यै (५)।

[गुह्यन्ति दिवाकीर्त्यनैवोभयतो नाप्रतिष्ठिता आसत एकविꣳशतिश्च]

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया सप्तमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः)।

नवमेऽनुवाके विंशतिरात्रोऽभिहितः। अथ दशम एकविंशतिरात्रोऽभिधी-यते। तत्र तावदियमहःकल्प्तिः—आदावतिरात्रः। ततः पृष्ठ्यः षडहः। ततः

स्वरसामानस्त्रयोऽहर्विशेषाः। ततो दिवाकीर्त्यमेकमहः। पुनरपि त्रयः स्वरसामानः। पुनरपि पृष्ठ्यः षडह.। ततोऽतिरात्रः, इति।

तमिमं विधातुं प्रस्तौति—

असावादित्य इति। अयो स्वर्गे दृश्यमान आदित्यः पुरा भूलोक एव तिष्ठति स्म। तमादित्यं देवाः परिगृह्य पृष्ठाख्यैः षड्भिरहोभिः स्वर्गं प्रापितवन्तः। तत्र च परशब्देन स्वरसामशब्देन च तत्र तत्र व्यवह्रियमाणैस्त्रिभिरहोभिरवस्तात्पर्यगृह्णन्, आदित्यो यथाऽवस्तान्नाऽऽगच्छति तथा व्यवधानं कृतवन्तः। परशब्दाभिधेयं किंचित्साम, तेन साम्ना निष्पाद्यमाना अहर्विशेषाः परा इत्युच्यन्ते। तथा दिवैव कीर्तनीय किंचित्साम, तेन च निष्पाद्यमहरपि दिवाकीर्त्यमित्युच्यते। तेन चाहना तमादित्यं स्वर्गे प्रतिष्ठापितवन्तः। पुनरप्यनुष्ठीयमानैः परशब्दाभिधेयैरहोभिः परस्तादादित्यं पर्यगृह्णन्, यथा तत ऊर्ध्वमादित्यो न गच्छति तथा प्रतिबन्धं कृतवन्तः। एवं कृत्वा पुनरनुष्ठीयमानैः पृष्ठाख्यैः षड्भिरहोभिः स्वर्गादुपावारोहन्। सोऽयो दिवि दृश्यमान आदित्यः स्वर्गे लोके पराख्यैरहोभिरुभयतो नियमितत्वान्नोर्ध्वं गच्छति नाप्यधस्तादागच्छति।

तान्येतान्यहानि विधत्ते—

यत्पृष्ठानीति। आदित्यवाक्यवद्यजमानवाक्यं व्याख्येयम्।

दिवाकीर्त्यस्योभयतोऽनुष्ठेयान्पराख्यानहर्विशेषान्व्यतिरेकमुखेन(ण) प्रशंसति—

यत्परे परस्तादिति। यद्युपरितनाः पराख्या अहर्विशेषा न स्युस्तदानीं स्वर्गं गता यजमानास्ततोऽप्यूर्ध्वं गमनस्य निवारकाभावात्स्वर्गादूर्ध्वं निर्गच्छेयुः। यदि चावस्तनाः पराख्या नानुष्ठीयेरंस्तदानीं व्यवधायकाभावादादित्यात्मकाः सर्वे यजमाना भूमिवर्तिनः प्रजाः सर्वा निमिषेण दहेयुः। तस्मादिवाकीर्त्यस्य पुरस्ताच्चोपरिष्टाच्च परःसामानोऽनुष्ठेयाः। ते चैनान्यजमानान्स्वर्गमिवाधस्तादुपरिष्टाच्च निरुध्य स्थापयन्ति।

प्रकारान्तरेण दिवाकीर्त्यं परःसामाख्यान्यहानि प्रशंसति—

यजमाना इति। दिवाकीर्त्यस्य यजमानस्थानीयत्वात्परःसाम्नां च संवत्सरस्थानीयत्वादुभयतस्तदनुष्ठाने यजमाना अवस्ताच्चोपरिष्टाच्च संवत्सरदेवतायामेव प्रतितिष्ठन्ति।

---

१ क. घ. ङ. च. अय।

(एकविंशतिरात्रकथनम्)

पुनरपि प्रकारान्तरेण प्रशंसति—

पृष्ठं वै दिवाकीर्त्यमिति । यथा लोके पुरुषस्य पृष्ठभागो मध्यवर्ती पार्श्वभागावभयतो वर्तिनावेवमत्रापि दिवाकीर्त्यो पृष्ठस्थानीयं परःसामानस्तूभयपार्श्वस्थानीयाः । किं चैतस्मिन्दिवाकीर्त्ये परःसामानि चातिग्राह्या ग्रहा अपि भूयिष्ठा गृह्यन्ते । तथा हि दिवाकीर्त्ये परःसामानश्च गवामयन उत्पन्नाः । तत्र हि चोदकपाशेभ्योऽतिग्राह्येभ्योऽधिकास्त्रयोऽतिग्राह्यास्तृतीयकाण्डोक्ता अद्भ्यस्त्वौषधीभ्य इत्यादिमन्त्रसाध्या निहिताः सन्ति । तद्विकृतित्वादत्रापि तेऽधिका ग्रहा गृह्यन्ते । अत एव मन्त्रसाध्यानधिकं गृह्यते । तत्तेनाधिकानुष्ठानेन यज्ञस्यैकविंशतिरात्ररूपस्य ग्रन्थिं ग्रथ्नन्ति दृढबन्धनं कुर्वन्ति । तच्च यज्ञस्य विस्रंसनपरिहाराय भवति ।

पुनरपि दिवाकीर्त्ये विशेषं दर्शयति—

सप्त गृह्यन्त इति । दिवाकीर्त्यात्प्रतीचीनेषु दिनेष्वेकैकस्मिन्नेकैकोऽतिग्राह्य इत्यनुक्रमेण त्रयो गृह्यन्ते । उत्तरेषु दिनेषु त एवावरोहक्रमेण गृह्यन्ते । त एते षडपि दिवाकीर्त्यदिने तथैव गृह्यन्ते । तेषां मध्ये सौर्यं उदुत्यं जातवेदसमिति मन्त्रसाध्यः सप्तमो गृह्यते । तदेवं तस्मिन्दिने सप्ताधिका ग्रहाः । ते च संरूपायामूर्ध्वगतसप्तच्छिद्रवर्तिपात्रसमाः । अतस्तदनुष्ठानेन यजमानेषु प्राणान्स्थापयन्ति । तदेवं दिवाकीर्त्यमहः प्रशस्तम् । यद्वा भूयिष्ठा ग्रहा इत्यादि गवामयनगतानामत्रत्यानां चाहना प्रकृतिविकृतिभावद्योतनाय तल्लिङ्गं दर्शयितुं विधिरेवास्तु ।

अथावरोहरूपं पृष्ठचषडहं विधत्ते—

यत्परांचीनानीति । दिवाकीर्त्यसदृशेभ्यः परःसामभ्यः पूर्वमनुष्ठितानि परांचीनान्यारोहरूपाणि यानि पृष्ठसामान्यहानि सन्ति तैर्यजमानाः स्वर्गं लोकमारोहन्त्येव । अत ऊर्ध्वमिमं लोकं प्रति यद्यवरोहसाधनानि कानिचिदहानि नानुतिष्ठेयुस्तदानीं ते यजमानास्तं लोकं व्यवहारक्षमं विस्मृत्योन्मत्ता मृता वा भवेयुः । तस्मात्प्रतीचीनान्यवरोहरूपाणि पृष्ठस्तोत्रियान्यनुष्ठेयानि । तैरहोभिरिमं लोकं प्रत्यवरोहन्ति । अपि चामुष्मिन्लोके पशवः अनुन्मत्ताश्च भवन्ति ।

पूर्वं सुवर्गमेव तैर्लोकं यजमानः स्तोत्रियादिना क्रतवश्चवानामहर्विशेषाणां फलोपन्यासमुखेन स्वर्गायनयं क्रतुर्विधत्तः । अथ षाण्मास्यमिमं क्रतुं विधत्ते—

---

१ क. घ. ङ. च. °नीयौ । किं च । २ क. घ. ङ. च. °नामनुना अन्ते ।

इन्द्रो वा इति। पुरा यथेन्द्रः प्रजापत्युपदेशादिमं क्रतुमनुष्ठाय प्रत्यतिष्ठत्, एवं बहुयागान्कृत्वाऽप्यप्रतिष्ठिता यजमाना एतं क्रतुमनुष्ठायाहर्गतैकविंशतिसंख्यासाम्याद्द्वादशमासाभिमानिदेवस्थानेषु पञ्चसम्वत्सराभिमानिदेवस्थानेषु त्रिषु पृथिव्यादिलोकेष्वेकस्मिन्नादित्यलोके च तेष्वेकविंशतिस्थानेषु यथापूर्वं प्रतितिष्ठन्ति तल्लोकवासिनः सर्वे प्राणिनो यथाप्रतिष्ठितास्तद्वत्प्रतितिष्ठन्तीत्यर्थः।

एवं प्रतिष्ठार्थं क्रतुं विधाय फलान्तरार्थं पुनर्विधत्ते—

असावादित्यो नेति। पुरा कदाचिदादित्यः स्वर्भान्वाख्येनासुरेण तमसा विद्धोऽन्येन वा मेघहिमादिना निरन्तरमावृतः सन्विरोचेन नादीप्यत। ततः प्रजापत्युपदेशादेतं क्रतुमनुष्ठायादीप्यत। तदनुसारेण जमानाः पूर्वं विद्याधनादिभिर्मनुष्येष्वप्रकाशमाना एतं क्रतुमनुष्ठाय पश्चात्प्रकाशन्ते। किंचाहोनैकविंशतिसंख्यासद्भावात्तेनैकविंशतिस्तोमेन क्रतुमुखे हेतुत्वाद्ब्रह्मवर्चसं परिगृहीतम्। स च विवृद्याद्यपेक्षया प्रौढत्वाद्दीप्यमानः। अतस्तत्साम्यादेतदनुष्ठायिनोऽपि प्रकाशं प्राप्नुवन्ति, एकविंशतिस्ते वस्त्वन्तरप्रतिष्ठाधारत्वात्।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। अस्य विद्यादिप्रकाशहेतुत्वाद्ब्रह्मवर्चसमत्र परिगृहीतं भवति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः)।

अर्वाङ्यज्ञः सं क्रामत्वमुष्मादधि भाभि।
ऋषीणां यः पुरोहितः। निर्देवं निर्वीरं कृत्वा
विष्कन्धं तस्मिन्हीयतां योऽस्मान्द्वेष्टि। शरीरं
यज्ञशमलं कुसींदं तस्मिन्त्सीदतु योऽस्मान्द्वेष्टि।
यज्ञं यज्ञस्य यत्तेजस्तेन सं क्रममामाभि। ब्राह्म-
णानृत्विजो देवान्यज्ञस्य तपसा तेसवाहमा हुवे।
इष्टेन पक्व पं (१) ते हुवे सवाहम्। सं तें वृञ्जे

(अश्वमेधगतमन्त्रकथनम्)

सुकृतꣳ सं प्रजां पशून्। प्रैषान्त्सामिधेनीरांघारा-
वाज्यभागावाश्रंतं प्रत्याश्रुतमा शृणामि ते। प्रया-
जानुयाजान्त्स्विष्टकृतमिडांमाशिष आ वृञ्ज सुवः।
अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः।
याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यज्ञमा दंदे
ते वषट्कृतꣳ। स्तुतꣳ शस्त्रं प्रतिगरं ग्रहमिडां-
माशिषः (२) आ वृञ्ज सुवः। पत्नीसंयाजानुप
ते हुवे सवाहꣳ समिष्टयजुरा ददे तव। पशून्त्सुतं
पुरोडाशान्त्सवनान्योत यज्ञम्। देवान्त्सेन्द्रानुप ते
हुवे सवाहमग्निꣳखान्त्सोमवतो ये च विश्वे
(३)॥

(उप ग्रहमिडांमाशिषो द्वाविꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ सप्तमकाण्डे तृतीयप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाक एकविंशतिरावोऽभिहिवः। अथावशिष्टेष्वनुवाकेष्वश्वमेध-
गता मन्त्रा उच्यन्ते। तत्रास्मिन्ननुवाक आप्त्याख्यानामष्टाहुतीनां मन्त्रा उ-
च्यन्ते। अत एव ब्राह्मणे विनियोगः पठ्यते—'अर्वाङ्यज्ञः संक्रामत्वि-
त्याप्वीर्जुहोति' इति।

तत्र प्रथमामाह—

अर्वाङ्यज्ञ इति। योऽश्वमेधाख्यो यज्ञः स ऋषीणां ज्ञानवतां पूर्वसि-
द्धानां यजमानानां पुरोहितः सर्वार्थसाधनत्वेन पुरस्तादवस्थापितः। स यज्ञो-
ऽस्मान्मद्व्यतिरिक्तं देवदत्तादेर्यजमानादाक्रम्य मामभि मामुद्दिश्यार्वाङभिमुखः
सन्नधिसंक्रामतु आधिक्येनाऽऽगतिक्रियेण सम्यगागच्छतु।

अथ द्वितीयामाह—

निर्देवं निर्वीरामिनि। यः पुरुषोऽस्मान्द्वेष्टि तस्य शरीरं निर्देवादिविशे-

पणविशिष्टं कृत्वा तस्मिन्द्वेष्यपि पुरुषे हीयतां हीमत्वेनावस्थाप्यताम् । कीदृशं शरीरम्, निर्देव निर्गता यज्ञाङ्गभूता देवा यस्मात्तन्निर्देवं देवताभक्तिरहितमित्यर्थः । निर्गता वीराः पुत्रा भृत्याश्च यस्मात्तन्निर्वीरम् । विरूपाः स्कन्धाद्यवयवा यस्य तद्विष्कन्धम् । किं च योऽस्मान्द्वेष्टि तस्मिन्द्वेषिणि पुरुषे यज्ञशमलं यज्ञानुष्ठाने मलिनं कदाचिदप्यनुष्ठानरहितमित्यर्थः । तादृशं यत्कुसीदं निरन्तरं धनवृद्ध्याद्यर्जनेन यज्जीवनं तत्सीदतु द्वेषी पुमान्यज्ञे विमुखः केवलो वणिग्भूत्वा यथाकथंचित्तिष्ठत्वित्यर्थः ।

अथ तृतीयामाह—

यज्ञ यज्ञस्येति । हे अश्वमेधारूप यज्ञ सम्यगनुष्ठितस्य यज्ञस्य तव यत्तेजः फलं तेन फलेन सह मामभि संक्रामाभिमुखा भूत्वा मां प्रविश । सूयतेऽभिषिच्येऽत्रेत्यभिषेकयुक्ता यज्ञः सवः । हे सव सम्यगनुष्ठितस्य यज्ञस्य ते तव तपसा सामर्थ्येनानुग्रहरूपेणानगृहीतोऽहं ब्राह्मणान्सदस्यानृत्विजोऽध्वर्युप्रभृतीन्देवान्यष्टव्यानाहुव इहकर्मण्याह्वयामि ।

अथ चतुर्थीमाह—

इष्टेन पक्रमिति । हे सव यज्ञ त इष्टेन त्वदीयेन यजनेनाहं पक्रमन्नमुपहुवे समीप आह्वयामि । ते तवानुग्रहात्सुकृतं संभृज्ञे सम्यगावर्जितं कुर्वे पुण्यं संपादयामीत्यर्थः । तथा प्रजां पशून्संपादयामि ।

अथ पञ्चमीमाह—

प्रैषान्त्सामिधेनीरिति । प्रैषादीनि यज्ञाङ्गानि यस्मिन्नाने, तानि सर्वाणि तद्वत्तिसद्ध्यर्थमाशृणामि सर्वतः श्रास्त्रुस्त्रुत्वा संपादयामि । तथा प्रयाजादीनि यज्ञाङ्गानि सुवः फलरूपं स्वर्गं धाऽऽभृज्ञे सर्वतः संपादयामि ।

अथ षष्ठीमाह—

अग्निनेन्द्रेणेति । हे सव यज्ञ तवाग्नेये ये देवा उक्ता याश्चानुक्ता अन्याः सर्वा देवताः, ये च तद्देवतासंबंधे ऋत्विजोक्ते, तैः सर्वैः संहितोऽहं ते त्वत्तिसद्ध्यर्थमुपहुवे समीप एवाध्वर्युप्रभृतिभिर्ऋत्विग्भिर्नाह्वयामि । तथा ते त्वत्तिसद्ध्यर्थं वषट्कृतं वषट्कारसहितं यज्ञं कुर्वन्त यजमानं स्वी करोमि

अथ सप्तमीमाह—

स्तुतश्च शस्त्रमिति । स्तोत्राणीति यज्ञाङ्गानि सुवः फलरूपं स्वर्गं धाऽऽभृज्ञ सर्वतः संपादयामि । स्वर्गस्य पावमानीरभिधानम् । हे सव त्व-

(अश्वमेधगतमन्त्रकथनम्)

त्तिदृष्ट्यर्थं पत्नीसंयाजानुद्दिश्योपहुव ऋत्विजः समीपमाहूवयामि । तथा तव त्वत्तिदृष्ट्यर्थं समिष्टयजुः स्वी करोमि ।

अथाष्टमीमाह—

पशून्त्सुतामिति । येऽग्नीषोमीयादयः पशवः, यश्चाभिषुतः सोमो ये च सवनीयपुरोडाशा यानि च प्रातःसवनादीनि, यश्च तैर्निष्पाद्यः क्रतुस्तौ यज्ञस्तान्सर्वानावृङ्क्त इत्यनुवर्तते । हे सव ते त्वत्तिदृष्ट्यर्थमहं देवानुपहुवे समीप आहूवयामि । किंदृशान्देवान्, इन्द्रेण सह वर्तन्त इति सेन्द्रान् । अग्निर्येषां देवेऽग्निमुखास्तान् । सोमो येषामस्ति ते सोमवन्तस्तान् । अपि च येऽन्ये विश्वे देवास्तान्सर्वानिष्युपहुवे ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः) ।

भूतं भव्यं भविष्यद्वषट्त्स्वाहा नम ऋक्साम यजुर्वषट्त्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्त्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्त्स्वाहा नमोऽग्नये सूर्यो वषट्त्स्वाहा नमः प्राणो व्यानोऽपानो वषट्त्स्वाहा नमोऽन्नं क्षत्रं वृष्टिर्वषट्त्स्वाहा नमः पिता पुत्रः पौत्रो वषट्त्स्वाहा नमो भूर्भुवः सुवर्वषट्त्स्वाहा नमः (१) ॥

(भूर्भुवश्च द्वे च) ।

इति कृष्णयजुर्वेदीये तैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः) ।

एकादश आप्त्याख्या मन्त्रा उक्ताः । अथ द्वादशे पर्याप्त्याख्या मन्त्रा उच्यन्ते ।

तथा च ब्राह्मणे विनियोगः श्रूयते—' भूतं भव्यं भविष्यदिति पर्याप्तिर्जुहोति ' इति ।

तत्र प्रथममन्त्रमाह—

भूतं भव्यं भविष्यदिति । वषट्कारादीनि त्रीणि ब्रह्मणो नामानि । एभिश्च तत्यत्वमाख्यायते । तथा सति कालत्रयवर्तीनि सत्यानीति वाक्यार्थो भवति । आदरार्थमेकार्थवाचिनां वषडादीनां त्रयाणां प्रयोगः । एतेभ्यः स्वाहेति शेषः । एवमुत्तरेष्वपि योजनीयम् ।

तानेतानुत्तरान्मन्त्रानाह—

ऋक्साम यजुरिति । वेदच्छन्दोलोकदेवपाणान्नपितृव्याहुतिविषया एवेऽष्टौ मन्त्राः पूर्वेण मन्त्रेण सहैतैर्मन्त्रैर्नवभिः पर्याप्त्याख्या आहुतयो होतव्याः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः) ।

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् । आपो देवीर्यज्ञिया मा विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् । आ मे ग्रहो भवत्वा पुरोरुक्स्तुतशस्त्रे मा विशताꣳ समीची । आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा प्र हासीत् । आ मा विशन्त्वग्निष्टोमो विशतूक्थ्यश्चातिरात्रः मा विशत्वापिशर्वरः । तिरोअह्निया मा सहसा आ वि-

(अश्वमेधगतमन्त्रकथनम्)

शन्तु सहस्रस्य मा भूमा मा प्रहासीत् (१)॥

(अग्निष्टोमो विंशत्यष्टादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः)।

पर्याप्तिनामका मन्त्रा[ः] शोऽभिहि[ता]. अथाऽऽज्ञानामका होममन्त्रास्त्रयोदशोऽभिधीयन्ते। तथाच ब्राह्मणं भवति.—'आ मे गृहा भवन्त्वित्याभूर्जुहोति' इति।

तत्र प्रथममाह—

आमे गृहा इति। मे मदर्थं गृहाः समीचीना आभवन्तु सर्वतः संपद्यन्ताम्। तथा प्रजा पुत्रादिरूपाऽपि मे मदर्थमाभवतु। तथा वीर्यावान्फलोपेतो यज्ञश्च मामाविशतु। तथा यज्ञिया यज्ञार्हा आपो देवीर्जलदेवता मामाविशन्तु। सहस्रस्य भूमा सहस्रसंख्याकस्य धनस्य बाहुल्यं मा कदाचिदपि मा प्रहासीन्मा परित्यजतु।

अथ द्वितीयमाह—

आ मे ग्रहो भवन्विति। मे मदर्थं ग्रहोऽप्यैन्द्रवायवादिकः स आभवतु सर्वतः संपद्यताम्। तथा पुरोरुग्रहं ग्रहीतुं पुरतः पठ्यमानो मन्त्रोऽप्याभवतु। तथा स्तोत्रशस्त्रे अपि समीची अनुकूले मामाविशताम्। तथाऽऽदित्याद्या देवाः सदस्या ब्राह्मणाश्च मामाविशन्तु। सहस्रस्येत्यादि पूर्ववत्।

अथ तृतीयमाह—

आ मेऽग्निष्टोम इति। सोमयागेषु प्रथमसंस्थारूपो योऽयमग्निष्टोमः स मामाविशतु। यश्च द्वितीयसंस्थारूप उक्थ्यः सोऽयं मामाविशतु। यश्चतुर्थसंस्थारूपोऽतिरात्रः सोऽपि मामाविशतु। कीदृशोऽतिरात्रः, अपिशर्वरः, अपि गतानि प्राप्तानि शर्वर्यां पठितव्यानि स्तोत्राणि यस्यासावपिशर्वरः। तथा तिरो अह्नियाऽहन्[ह]स्तिरस्कृत्य रात्रौ प्रयोक्तव्या अतिरात्रगताः सोमविशेषाः। ते च सुष्ठु हुताः सन्तो मामाविशन्तु। सहस्रस्येत्यादि पूर्ववत्।

(अश्वमेधान्तमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
त्रयोदशोऽनुवाकः । १३ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके चतुर्दशोऽनुवाकः) ।

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाण्यिन्द्रेण देवान्वातेन प्राणान्त्सूर्येण चां चन्द्रमसा नक्षत्राणि यमेन पितॄन्राज्ञा मनुष्यान्फलेन नादेयानजगरेण सर्पान्व्याघ्रेणाऽऽरण्यान्पशून्छ्येनेन पतत्रिणो वृष्णाऽश्वान्वृषभेण गा बस्तेनाजा घृष्णिनाऽवींर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान्ब्राह्मणेन वाचम् (१) ॥

(ब्राह्मणेनैकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः) ।

आभूनामका मन्त्रास्त्रयोदशोऽभिहिताः । अथानुभूनामकाश्चतुर्दशोऽभिधीयन्ते तथा च ब्राह्मणे विनियोगः—'अग्निना तपोऽन्वभवदित्यनुभूर्जुहोति' इति । पाठस्तु—

अग्निना तपोऽन्वभवदिति । अयं यजमानोऽग्निना तपोऽन्वभवदग्निरूपो भूत्वा तत्सामर्थ्येन सर्वं तपो व्यामोति । एवमुत्तरेष्वपि त्रयोविंशतिमन्त्रेषु व्याख्येयम् । तृतीयान्तैस्तत्तदात्मकत्वं यजमानस्योच्यते । द्वितीयान्तैर्व्याप्यं वस्तु । अन्वभवदिति सर्वत्रानुषज्यते । ब्रह्म धन जातम । रूपाणि प्रतिबिम्बात्मकानि । फलेन वृक्षभवेन पक्वेन । नादेयान्नदीवत्संभूतान् । मण्डूकादीनामिव पशू-

(अश्वमेधगतमन्त्रकथनम्)

श्वाणां निगरणे समर्थः प्रौढः सर्पोऽजगरः। वृषा प्रौढोऽश्वः। वाचं वेदात्मिकाम्। स्पष्टमन्यत्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके पञ्चदशोऽनुवाकः)।

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै स्वाहाऽदित्यै महि स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पुरुरूपाय स्वाहा दश च)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके पञ्चदशोऽनुवाकः)।

अनुवचामका मन्त्राश्चतुर्दशेऽभिहिताः। अथ पञ्चदशे वैश्वदेवाख्या आहुतिमन्त्रा उच्यन्ते।

कल्पः—' आकूत्यै प्रयुजेऽग्नये स्वाहेति चत्वार्यौदुम्बरगृहणानि जुहोति स्वा-

(अश्वमेधमतसन्त्रकथनम्)

हाऽऽधिमाधीताय स्वाहेति तीणि वैश्वदेवानि, सोऽयं दीक्षाहुतिकालो द्विपुरुषः तस्माद्यन्महौद्मद्रणैर्वैश्वदेवैश्चोत्तरोत्तरैः प्रचरति षडुत्तमेऽहन्यौद्मद्रणानि पुरुषे होति सर्वस्मै स्वाहेति पूर्णाहुतिकुलम्, इति ।

तत्रौद्मद्रणमन्त्राः प्रथमकाण्डे सामाम्नाताः । वैश्वदेवमन्त्रा इहाऽऽम्नायन्ते ।

तेषु प्रथमदिनमन्त्रानाह—

स्वाहाऽऽधिमाधीतायेति । एते च मन्त्रा उभयतः स्वाहाकाराः । तत्राग्नित्रस्वाहाकारो हविष्पदाने वर्तते । प्रथमस्तु स्वाहाकारो निपाता अनेकार्था इति स्वाभिप्रेतार्थं योजनीयः । आ समन्तादीयते स्थाप्यते मन्त्राद्यनुष्ठाननिर्वहोऽस्यां पुरुषनिर्वाहकुशलायां बुद्धौ स्वाहा संपादयामीत्यत्रोचितार्थः । अधीताय तस्यां बुद्धौ स्थापिताय मन्त्रार्थभावनायै देवाय स्वाहुतमिदमस्तु । आऽऽधीतं बुद्धौ संगृहीतं स्वाहा विस्मरणमन्तरेण धास्यामि । मनसे तद्धारणसमर्थायान्तःकरणाय स्वाहुतमिदमस्तु । तथा मनस्तथाविधमन्तःकरणं स्वाहा संपादितवानस्मि । धात्रापतये तस्य मनसः प्रेरकाय स्वाहुतमिदमस्तु ।

अथ द्वितीयदिनमन्त्रानाह—

काय स्वाहेति । मन्त्रपक्षपतितः कशब्दः प्रजापतिनामकः । को ह वै नाम प्रजापतिरिति श्रुत्यन्तरात् । द्वितीयमन्त्रपक्षपतितस्तु कशब्दः सर्वप्रश्नपरत्वात्प्रशस्तवाची । तेन चादित्यादि हविषे । इदमोऽयमिति केनापि ज्ञातुमशक्य इत्यर्थः । कतमशब्दो बहूनां मध्ये निर्धारणप्रश्ने वर्तते । तेन च सर्वेषु देवेषु मध्ये शास्त्रविचारणानिर्धारणीयस्वरूप इत्युक्तं भवति ।

अथ तृतीयदिनगतान्मन्त्रानाह—

अदित्ये स्वाहाऽदित्या इति । अदितिर्भूमिः । मही विस्तीर्णा । तुभृडीका शुभपदा ।

अथ चतुर्थदिनगतान्मन्त्रानाह—

सरस्वत्यै स्वाहेति । पावकायै शोधयित्र्यै ।

अथ पञ्चमदिनगतान्मन्त्रानाह—

पूष्णे स्वाहेति । पशुपतये पशूनां पालकाय हितः पथ्यः । नराणां धारयिता नराशंसः ।

अथ षष्ठदिनगतान्मन्त्रानाह—

---

१ क. प. ङ. च, °वानीति । सोऽ° । २ स. °क्विचारेण नि° ।

(अग्नेर्नामान्तरकथनम्)

स्वष्टे स्वाहेति । तूष्णीं शंसस्तूष्णीं शंसः । बहुनूर्तिर्विलेपकः पुरुषः ।

अथ [illegible]

विष्णवे स्वाहेति । विष्णवे खलु यज्ञेशादिनामभिर्यज्ञं निर्भुवः । वेषां पाता निर्भुवः । विष्वेर्भवादिसहितेन न्यग्भावयोग्या निर्भुवस्वेषां पाता निर्भूयपः ।

अथ पूर्णाहुतिमन्त्रमाह—

सर्वस्मै स्वाहेति । तर्पकस्पालकाय [illegible] ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये [illegible] पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ [illegible] षोडशोऽनुवाकः)।

[illegible] स्वाहा हनूभ्यः [illegible] स्वाहा मुखाय स्वाहा नासिकाभ्यां स्वाहाऽक्षि-भ्यां स्वाहा कर्णाभ्यां स्वाहा भ्रुवोऽ-क्षीभ्यः पक्ष्मभ्यः स्वाहाऽक्षभ्यां स्वाहाः पर्यस्यः पवस्यः स्वाहा प्रतिधे स्वाहा [illegible] स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मौलिभ्याय स्वाहा केशेभ्यः स्वाहा वहीय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्यां स्वाहा (१) अंसाभ्यां स्वाहा दोषभ्यां स्वाहा बाहुभ्यां स्वाहा जत्रुभ्यां स्वाहा श्रोणीभ्यां स्वाहोरुभ्यां स्वाहाऽष्ठीवद्भ्यां स्वाहा जङ्घाभ्यां स्वाहा भसदे स्वाहा शि-श्नखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽवभृथाय स्वाहा

(अश्वमेधगतमन्त्रकथनम्)

स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः
स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः
स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय
स्वाहा मांसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः
स्वाहा मज्जभ्यः स्वाहाऽङ्गेभ्यः स्वाहाऽऽत्मने
स्वाहा सर्वस्मै स्वाहा (२) ॥

[पार्श्वभ्याꣳ स्वाहा मज्जभ्यः स्वाहा षट्चं]

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके षोडशोऽनुवाकः) ।

पञ्चदशे वैश्वदेवाहुतिमन्त्रा उक्ताः । षोडशे पशङ्गहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम्–'दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहेत्यङ्गहोमाञ्जुहोति' इति । पाठस्तु—

दद्भ्यः स्वाहेति । अत्र दन्तहन्वादयोऽधस्यावयवाः प्रसिद्धाः । इक्षवोऽक्षिरोमाणि । ते च पार उपरिभागे वर्तन्ते । कस्मात्पार इति तदुच्यते–अवार्येभ्यः पक्ष्मभ्योऽधोभागवर्तिभ्यो रोमभ्य उपरि वर्तन्ते । एतादृशा ये सन्ति तेभ्यः स्वाहेति योजनीयम् । एवं पार्येभ्यः पक्ष्मभ्योऽवारेऽधोभागे ये केचिदिक्षवो वर्तन्ते । अत्र शिरःशब्देन ललाटादधोभागो विवक्षितः । मूर्धशब्देन चोपरिभागः । तत्रत्यं मांसं मस्तिष्कः । वहशब्देन रथयुगस्य वाहकः प्रदेश उच्यते । ग्रीवाशब्देन गलगता नाड्यः । स्कन्धशब्देन गलस्योपरिभागावयवाः । कीकसाशब्देन पृष्ठास्थिगता गुलिकाः । पृष्टिशब्देनोभयपार्श्वगता अस्थिविशेषाः । पाजो बलं तत्स्थानं हृदयं पाजस्यम् । दोःशब्देन बाहुशब्देन च पूर्वपदयोरुत्तराधरभागावुच्येते । जङ्घाशब्देन मध्यभागः । श्रोण्यादिशब्दैश्चतुर्भिः पृष्ठगतयोः पादयोश्चत्वार ऊर्ध्वाधोभागा उच्यन्ते । भसच्छब्देनापानप्रदेशः । शिखण्डा ऊर्ध्वकेशाः । वालधानं पुच्छदण्डः । प्रजननमुत्पादनसामर्थ्यम् । अङ्गान्यनुक्तावयवाः । आत्मा तत्रत्यो जीवः । सर्वं कृत्स्नशरीरम् । एवं पञ्चाशन्मन्त्रैरङ्गहोमान्कुर्यात् ॥

(अश्वमेधगतमन्त्रकथनम्)।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

अथ सप्तमाष्टके तृतीयप्रपाठके सप्तदशोऽनुवाकः।

अञ्ज्येताय स्वाहाऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिरन्ध्राय स्वाहा शितिपृष्ठाय स्वाहा शित्यृक्साय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रुवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहाऽज्ञये स्वाहा ललामाय स्वाहाऽसितज्ञवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहाऽरुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(रूपाय स्वाहा द्वे च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके सप्तदशोऽनुवाकः)।

षोडशेऽनुवाकेऽङ्गहोममन्त्रा उक्ताः। अथ सप्तदशाष्टादशयो रूपहोममन्त्रा उच्यन्ते। तथाच ब्राह्मणम्—' अञ्ज्येताय स्वाहा कृष्णैताय स्वाहा श्वेताय स्वाहेत्यश्वरूपाणि जुहोति ' इति।

तत्रैकानुवाकगतानाह—

अञ्ज्येताय स्वाहेति। अञ्जिः शुक्लः। एतः सांध्यो वर्णः। अञ्जिश्वेतावेवमेत्यञ्जेतः। मिश्रवर्ण इत्यर्थः। अञ्जिसक्थः श्वेतारुणः। शितिः

श्वेतस्वादृशमादयुक्तः शितिपात् । ककुदादयोऽपि श्वेता यस्येति योज्यम् । एन्भ्राणि कर्णादिच्छिद्राणि । पुष्पाकारलक्षणं कर्णयोर्यस्यासौ पुष्पकर्णः । श्वेताभ्यां भ्रूभ्यां युक्तः शितिभ्रुः । श्वेतेनापानेन युक्तः शितिभत्तत् । अनुकाशश्वक्षुष्यदेशः । अक्षिः श्वेतकृत्स्नशरीरः । ललाटश्वेतयुक्तो ललामः । कृष्णजानुयुक्तोऽसितज्ञुः । कृष्णमिश्रसांध्यवर्णयुक्तः कृष्णीवः । जपाकुसुमवदत्यन्तरागयुक्तः संध्यावर्णो लोहितैतः । ईषदारुण्युक्तः संध्यवर्णोऽरुणेतः । इदमिति स्पष्टरेखानवभासमानाकार ईदृशः । किमित्यनिर्धारितरेखानवभासमानः कीदृशः । [illegible] तादृशः । [illegible] विरूपः । [illegible] । आकारसामान्यं रूपम् । अनुक्तसंग्रहार्थः सर्वशब्दः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठकेऽष्टादशोऽनुवाकः) ।

कृष्णाय स्वाहा श्वेताय स्वाहा पिङ्गलाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा नीलाय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सरूपाय स्वाहाऽसरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निमकाय स्वाहा सर्वस्मै स्वाहा (;) ॥

(कृष्णाय षट्चत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमकाण्डके तृतीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

([illegible])

([illegible])।

[illegible]

पाठस्तु—

कृष्णाय स्वाहेति। कृष्णोऽपि शरीरे काष्ण्ययुक्तः कृष्णः। [illegible] मिश्रवर्णो गोरोचनवर्णः। सारङ्गः श्वेतकर्णः। हरिणकोऽश्वः। गौरो-रुरुमृगः। पृषतः कपिलः। नकुलो बकुलवर्णः। रोहितोऽश्वश्चक्रवाकः। गौरः पीतलोहितः। शबलः पिङ्गलकृष्णवर्णः। रभसो नीलः। अत्यन्तकृष्णः शबलः शोभनरूपः सुरूपः। अनुकूलरूपोऽनुरूपः। विविधरूपो विरूपः। तथाविधरूपः तत्सदृशः, भृशार्थे सुरूपो भृशार्थं कुरूप इत्यर्थः। प्रतिकूलरूपः प्रतिरूपः। मिश्रवर्णः शबलः। कपिलवर्णः कपिलः। चित्रवर्णः पृश्निः। तथाविधाभ्यां सदृशाभ्यामुपेतः पृश्निपर्णः। अपुक्तसंग्रहार्थः सर्वशब्दैः। पूर्वानुवाकोक्तैः पञ्चविंशतिमन्त्रैरनुवाकोक्तानां षोडशानां विंशतिमन्त्रैरित्येवमेकोनषष्ट्यधिकशतमन्त्रैरुक्तानि जुहुयात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकेऽ-ष्टादशोऽनुवाकः॥ १८॥

(अथ सप्तमाष्टके तृतीयप्रपाठक एकोनविंशोऽनुवाकः)।

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वलशेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽपक्वेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वेभ्यः स्वाहा (१)॥

(ओषधीभ्यश्चतुर्विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके एकोनविंशोऽनुवाकः॥ १९॥

(अथ सप्तमकाण्डे तृतीयप्रपाठक एकोनविंशोऽनुवाकः) ।

अवयविरूपमन्त्रा अष्टादशे प्रोक्ताः । अथौषधमन्त्रा एकोनविंशेऽभिधीयन्ते । तथा च ब्राह्मणम्—' ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहेत्योषधिहोमाञ्जुहोति ' इति ।

पाठस्तु—

ओषधीभ्यः स्वाहेति । तूलान्यग्राणि काण्डानि दण्डसदृशा भागाः । वल्शानि द्वैधीभावसंधयः । गृहीतानि प्राणिभिरुपयुक्तानि । अगृहीतानि प्राणिभिरनुपयुक्तानि । अवपन्नानि स्तम्बेभ्यो वियुज्य भूमौ पतितानि । शयानानि स्तम्बैः सह भूमौ पतितानि । अनुक्तसंग्रहार्थः सर्वशब्दः । एतैर्दशभिर्मन्त्रैरोषधिहोमाञ्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके विंशोऽनुवाकः) ।

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धेभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(वनस्पतिभ्यः षट्चत्वारिꣳशत्) ।

(अश्वमेधगतमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

प्रजावँ ब्रह्मवादिनः किमेष वा अ[illegible] दिव उभयोः प्रजापतिरन्वायत्त इन्द्रो वै सदृङ्डिन्द्रो वै [illegible] ज[illegible] [illegible]त्मादः सा विराडसावादित्योऽर्वाङ्भूतमा मेऽमुना ता[illegible] [illegible] दुभ्याऽऽज्येतार्थं कृष्णायौषधीभ्यो वनस्पतिभ्यो विंशतिः ॥ २० ॥

प्रजावँ प्रजापतिर्यदछ[illegible] हुवे सवाहमोषधीभ्यो

द्वे चत्वारिंशत् ॥ ४२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयः प्रपाठकः ॥ ३ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके विंशोऽनुवाकः) ।

ओषधिहोममन्त्रा एकोनविंशेऽभिहिताः। वृक्षमन्त्रा विंशेऽभिधीयन्ते । तथा च ब्राह्मणम्—' वनस्पतिभ्यः स्वाहेति वनस्पतिहोमाञ्जुहोति ' इति ।

पाठस्तु—

वनस्पतिभ्य इति । स्कधासि द्वैधीभावसंधयः । एकस्मिन्कर्मणीदानीमुपयुक्तादन्यः कालान्तर उपयोक्ष्यमाणः शिष्टः । कालेऽपि तत्कर्मोपयुक्तादन्योऽतिशिष्टः । कर्मान्तरेष्वप्युपयुक्तादन्यः परिशिष्टः । लोकव्यवहारेऽप्युपयुक्तादन्यः संशिष्टः । उपयुज्य त्यक्त उच्छिष्टः । इदानीं पूर्वैः फलैर्वर्जितो रिक्तः । तद्युक्तस्त्वरिक्तः । सर्वदा तद्वर्जितः परिक्तः । पर्णैरपि वर्जितः संरिक्तः । सर्वैः सर्वदा समृद्ध उद्रिक्तः । अनुक्तसंग्रहार्थः सर्वशब्दः । एतैस्त्रयोविंशतिमन्त्रैर्वनस्पतिहोमाञ्जुहुयात् ।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

अविवाक्यं तृतीयाद्ये द्वितीये क्रतुतस्त्रवः ।
पञ्चयोदशरात्रोऽसौ तृतीयेऽथ चतुर्थके ॥ १ ॥

---

१ ख. च सवषु ।

स्याच्चतुर्दशरात्रोऽथ पञ्चमेऽन्यश्च तादृशः ।
षष्ठसप्तमयोः स्यातां द्वौ पञ्चदशरात्रकौ ॥ २ ॥
यः सप्तदशरात्रोऽयमष्टमे नवमे पुनः ।
भवेद्विंशतिरात्रोऽथ दशमे सम्प्रदीरितः ॥ ३ ॥
एकविंशतिरात्रोऽथ मन्त्राः सर्वेऽधमेधगाः ।
अर्वाङ्निष्टावाप्तिमन्त्रा भूतं पर्याप्तयो नव ॥ ४ ॥
आभूमन्त्रास्त्रयो ह्या मे स्वनुभूमन्त्रकाः पुनः ।
चतुर्विंशतिसंख्याः स्युरग्निनेत्येवमादयः ॥ ५ ॥
दीक्षाहोमार्थमन्त्रास्तु स्वाहा द्वाविंशतिर्मताः ।
दद्भ्योऽङ्गमन्त्राः पञ्चाशदद्भि षड्विंशतिस्तथा ॥ ६ ॥
कृष्णा त्रयोविंशतिः स्युर्मिलित्वा रूपमन्त्रकाः ।
द्वादशौषधिमन्त्राः स्युस्त्रयोविंशतिरीरिता ॥ ७ ॥
वनस्पतिभ्यो वृक्षाख्यमन्त्रा उक्ताः प्रपाठके ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

(प्रथमचतुर्विंशतिरात्रकथनम्)

(अथ सप्तमाष्टके चतुर्थः प्रपाठकः)

तत्र प्रथमोऽनुवाकः।

हरिः ॐ।

बृहस्पतिरकामयत श्रन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विꣳशतिरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत्पुरोधां य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते श्रद्देभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरमावायुः (१) इमानेव लोकान्भ्यारोहन्त्यभिपूर्व त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्त्यमत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेनामत्रं दवर्ता एव पृष्ठरवं रुन्धते पशूञ्छन्दोमैरोजो व वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथंतराभ्यां बन्तीयं वाव रथंतरममो बृहदाभ्यामेव (२) बन्त्ययो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी सुती ताभ्यामेव सुवर्गं लोकं यन्ति चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै (३)॥

(अन्तरिक्षं गौरसावायुराभ्यामेव पञ्चचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे चतुर्थः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
एकविंशतिरात्रान्तं सप्तमुक्तं तृतीयके ।
चतुर्विंशतिरात्रादि चतुर्थेऽथ प्रवक्ष्यते ॥

द्वौ चतुर्विंशतिरात्रौ तयोराद्यं प्रथमेऽनुवाके विधत्ते—

बृहस्पतिरिति । पुरा कदाचिद्बृहस्पतिर्देवैरिन्द्रादिभिरविश्वसनीयः सन्मनस्येवमकामयत—एते देवा मे मदर्थं श्रद्दधीरन्नयं बृहस्पतिरस्मभ्यं हित इति विश्वासं धारयन्तु । ततोऽहं पुरोधां पौरोहित्यमाचार्यत्वरूपं मुख्यत्वं वा गच्छेयमिति । ततस्तदुपायं विचार्य शास्त्रमुखन(ण) चतुर्विंशतिरात्रं निश्चित्य तमनुष्ठाय देवैर्विश्वसनीयः सन्पुरोधां प्राप्तवान् । अयमन्येऽपि यजमाना एतदनुष्ठानेन मनुष्यैर्विश्वसनीयाः सन्त एतां प्राप्नुवन्तीति ।

तत्र कानिचिदहानि विधत्ते—

ज्यातिर्गौरायुरिति । अत्र चत्वारोऽवयवाः । विशेषाः । तावता विवक्षितसंख्यायाः पूरणात् ।

तत्र चतुर्णां स्तोमानामानुपूर्व्येण चतुर्णां

अभिपूर्वमिति । इतो निर्गतानामानुपूर्व्येणैव स्वर्गलोकारोहणम् ।

अथ पृष्ठयः षडहश्चत्वारः स्तोमाः इत्यत्र षडहगतानि दशाहानि विधत्ते—

असत्रं वा इति । पूर्ववद्व्याख्येयम् ।

अथैतावत्कृतगतामहःसंख्यां मन्त्रयते—

चतुर्विंशतिरात्र इति । संख्यासाम्यादर्धमासद्वारा संवत्सरं प्राप्य तत्कालीनकर्मानुष्ठानद्वारा स्वर्गे प्रतितिष्ठन्ति । तथा गायत्रीद्वारा ब्रह्मवर्चसं प्राप्नुवन्ति ।

(द्वितीयचतुर्विंशतिरात्रकथनम्)

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्रावितिः। गायत्रिद्वारा ब्रह्मवर्चसप्राप्तेरुक्तत्वात्तत्परिग्रहः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

यथा वै मनुष्या एवं देवा अग्रं आसन्तेऽकाम-
यन्तावार्तिं पाप्मानं मृत्युमपहत्य दैवीꣳ सꣳसदं
गच्छेमेति त एतं चतुर्विꣳशतिरात्रमपश्यन्तमाऽह-
रन्तेनायजन्त ततो वै तेऽवार्तिं पाप्मानं मृत्युमप-
हत्य दैवीꣳ सꣳसदमगच्छन्य एवं विद्वाꣳसश्चतु-
र्विꣳशतिरात्रमासतेऽवार्तिमेव पाप्मानमपहत्य श्रियं
गच्छन्ति श्रीर्हि मनुष्यस्य १) दैवी सꣳसज्ज्यो
तिरतिरात्रो भवति सुवर्गस्य लोकꣳयानरूपाय
पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवत्सरस्तं
मासा अर्धमासा ऋतवः प्रविश्य दैवीꣳ सꣳसदमग-
च्छन्य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते संव-
त्सरमेव प्रविश्य वर्ष्मन्नीꣳ सꣳसदं गच्छन्ति त्रय-
स्त्रयस्त्रिꣳशा अवमाद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः
परस्तात्त्रयस्त्रिꣳशरेवाभयतोऽवार्तिं पाप्मानमपहत्य
दैवीꣳ सꣳसदं मध्यतः (२) गच्छन्ति पृष्ठानि
हि दैवीस्ꣳ सज्जामि वा एतत्कुर्वन्ति यत्त्रयस्त्रयस्त्रि-
ꣳशा अन्वञ्चो मध्येऽनिरुक्तो भवति तेनाञ्चान्यू-
र्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्याꣳ

रूपाभ्यां॰ सुवर्गं लोक यन्त्यमंत्रं वा एतद्यदंछन्दोमं यच्छंन्दोमा भवंन्ति तेन सत्रं देवता एव पृष्ठैरवं रुन्धते पशूञ्छंन्दोमेरोजो वै वीर्यं पृष्ठानि पशवः (३) छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रि॰शा अवस्ताद्भवन्ति त्रयस्त्रय-स्त्रि॰शाः परस्तान्मध्यें पृष्ठान्युरो वै त्रयस्त्रि॰शा आत्मा पृष्ठान्यात्मन एव तद्यजंमानाः शमें नह्य-न्तेऽनार्त्यै बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्तुती ताभ्यामेव (४) सुवर्गं लोकं यन्ति परांञ्चो वा एते सुवर्गं लोक-मभ्यारोहन्ति ये परार्चीनानि पृष्ठान्युपयन्ति प्रत्य-ङ्षंडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरुद्ध्वांतिष्ठन्ति त्रिवृतोऽधि त्रिवृ-तमुप यन्ति स्तोमानां॰ संपत्त्यै प्रभवाय ज्योतिर-ग्निष्टोमा भवत्ययं वाव स क्षयोऽस्मादेव तन क्षयान्न यंन्ति चतुर्वि॰शतिरात्रो भवति चतुर्वि॰शतिरर्ध-मासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गं लोक प्रति तिष्ठन्त्यथो चतुर्वि॰शत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्च-समव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै (५) ॥

(मनुष्यस्य मध्यतः पशवस्ताभ्यामेव संवत्सरश्चतुर्वि॰शतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(द्वितीयचतुर्विंशतिरात्रकथनम्)

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके कश्चिच्चतुर्विंशतिरात्रोऽभिहितः। अथ द्वितीयेऽन्यश्चतुर्विंशतिरात्रोऽभिधीयते।

तमेतं विधत्ते—

यथा वै मनुष्या इति। यथा मनुष्या दारिद्र्यहेतुभूतपापयुक्ता एवं देवा अपि पूर्वमासन्। ते च देवाः कदाचिदेवंविधमकामयन्त। वार्तिर्वृत्तिर्जीवनोपायो धनसंपत्। तदभावोऽवार्तिः। तत्र हेतुः पाप्मा दारिद्र्यहेतुर्जन्मान्तरकृतः पापविशेषः। स एव क्लेशहेतुत्वान्मृत्युः। तमेतादृशमवार्तिं पाप्मानं मृत्युं केनापि सुकृतानुष्ठानेनापहत्य देवसंबन्धिनीं संपदपि प्राप्नुयामेति विचार्य चतुर्विंशतिरात्रं तदुपायं शास्त्रमुखान्निश्चित्य तदनुष्ठानेन तत्फलं प्राप्नुवन्। एवं मनुष्या अपि तदनुष्ठानेन दारिद्र्यहेतुपापनिवृत्तिद्वारा देवसंबन्धिनीं संसद् प्राप्नुवन्ति। देवाः सम्यक्तीदन्ति सुखेनावतिष्ठन्ते यस्मा श्रिया सा श्रीरेव दैवी संसत्। मनुष्या हि श्रियमेव देवसभां मन्यन्ते।

तत्र प्रथममहर्विधत्ते—

ज्योतिरतिरात्र इति। ज्योतिष्टोमविशेषो योऽयमतिरात्रः स एवं प्रथममहस्तेन ज्योतिषा स्वर्गः प्रकाश्यते।

अनन्तरभावीनि षडहानि विधत्ते—

पृष्ठ्यः षडह इति। षड्विधैः पृष्ठस्तोत्रैर्निष्पाद्यः पृष्ठ्यः षडहः स्तोत्रानुष्ठेयः। षट्संख्याका ऋतवस्ते च संभूय संवत्सरो भवन्ति। तं च संवत्सरं द्वादश मासाश्चतुर्विंशतिरर्धमासाः षडृतवश्चावयवत्वेन प्रविश्यातिशयेन धनसमृद्धां सभां प्राप्नुवन्ति। मनुष्या अपि तथैव पृष्ठ्यषडहयुक्तेन चतुर्विंशतिरात्रेण फलं प्राप्नुवन्ति।

अथान्यान्यपि षडहानि विधत्ते—

त्रयस्त्रयस्त्रिꣳशा इति। अत्रैयमहःकल्प्तिः सूत्रकारेण दर्शिता—'संसदा चतुर्विंशतिरात्रेण स्वर्गे लोके सीदन्त्यतिरात्रश्चतुर्विंश उक्थ्य आरम्भणीयस्त्रिवृद्वा पृष्ठ्यस्तोमो षडहस्त्रयस्त्रिꣳशमहरनिरुक्तं त्रयस्त्रिꣳशं [निरुक्तं] त्रिणवं द्वे एकविंशे त्रिणवं त्रयस्त्रिꣳशमहर्निरुक्तं त्रयस्त्रिꣳशमनिरुक्तं पृष्ठ्यस्तोमः षडहः प्रत्यङ्त्रिवृदहरनिरुक्तं ज्योतिष्टोमो वैश्वामरोऽतिरात्रः' इति। यदिदमतिरात्ररूपं प्रथममहः सूत्रेऽभिहितं तज्ज्योतिरतिरात्रो भवतीति वाक्येनाऽऽम्नातम्। यस्मा-

रम्भणीयरूपं द्वितीयमहस्तच्छाखान्तरगतम् । तृतीयमहरारम्भाष्टमान्तः परार्ध्यः पृष्ठ्यः षडहः । तत्र षष्ठमहरुत्पत्तिस्त्रिंशरूपम् । यश्चाऽऽ(श्चाऽऽ)दित आरभ्य गच्छनायामष्टममहः । ततो नवममहरनिरुक्तं त्रयस्त्रिंशं, स्पष्टलिङ्गैर्मन्त्रैर्गानं निरुक्तं, तद्विपरीतमनिरुक्तम् । ततो दशममहर्निरुक्तं त्रयस्त्रिंशम् । त एतेऽष्टमनवमदशमा अहर्विशेषास्त्रयोऽस्तात्पश्चोभागे वर्तमानास्त्रयस्त्रिंशाः । तत एकादशद्वादशत्रयोदशचतुर्दशान्यहानि त्रिणवैकविंशत्रयस्त्रिंशवरूपाणि मध्यवर्तीनि पृष्ठानीत्युच्यन्ते । ततः पञ्चदशषोडशसप्तदशा अहर्विशेषास्त्रिंशसंख्याकाः परस्तादूर्ध्वभागे वर्तमानास्त्रयस्त्रिंशाः । एषु त्रिषु मध्यमे(मे !) निरुक्तं त्रयस्त्रिंशम् । तस्मादुपरितन त्रयस्त्रिंशस्तोमयुक्तं[क्तम् निरुक्तम्] । सप्तदशसंख्यापूरकं दिनमारभ्य द्वाविंशदिनपर्यन्तमावृत्तः पृष्ठ्यः षडहः । अत एवायं प्रत्यङ्गिति निर्दिश्यते । तं ऊर्ध्वमुत्तिष्ठमहस्त्रिवृदनिरुक्त ज्योतिरभिष्टोमरूपम् । अत ऊर्ध्वमतिरात्रात्प्रभृति । एवं स्थिते सत्येकादशादिचतुर्दशान्तानां मध्यवर्तिनोऽहश्चतुष्टयादधः उपरिष्टाच्च ये त्रिसंख्याकास्त्रयस्त्रिंशास्तैरुभयतोऽवस्थितैर्दारिद्र्यहेतुं पाप्मानमपहत्य दैवीं सम्पदं मध्यवर्तिनीं गच्छन्ति । यानि मध्यवर्तीनि चत्वारि पृष्ठारख्यान्यहान्येतान्येवात्र दैवी संसदित्युच्यते । तस्मादुभयतस्त्रयस्त्रिंशयुक्तान्यहानि कुर्यादिति विध्युन्नयः ।

अथाधोवर्तिषु त्रिषु त्रयस्त्रिंशेषु यो मध्यमो यश्चोर्ध्ववर्तिषु त्रिषु मध्यमस्तस्योभयविधस्य मध्यमस्यानिरुक्तं विधत्ते—

जामि वा इति । यदनुक्तमवर्तिनः सर्वेऽपि त्रयस्त्रिंशा एकविधाः स्युस्तदानीमनुष्ठातार आलस्यं कुर्वन्ति । तस्मान्मध्ये वर्तमानमहर्विशेषमनिरुक्तत्वेनेतरस्मान्निरुक्ताद्विलक्षणं कुर्युः । तेन वैलक्षण्येनाऽऽलस्यं परिहृतं भवेत् ।

उभयतोऽवस्थितानां त्रयस्त्रिंशानां मध्यवर्तिषु चतुर्ष्वहःसु कंचिद्विशेषं विधत्ते—

ऊर्ध्वानि पृष्ठानीति । रथंतरबृहदाद्यनुक्तमपृष्ठानि पृष्ठस्तोत्राणि निष्पादनीयानि तथा चतुर्विंशचतुश्चत्वारिंशाद्यनुक्तमगवारुछन्दोमा निष्पादनीयाः । यद्यपि त्रिणवैकविंशत्रयस्त्रिंशवस्त्वभिस्तान्यहानि निष्पाद्यानीति शाखान्तरानुसारेण सूत्रेऽभिहितं, तथाऽप्यत्र वचनबलात्पवमानादिषु केषुचित्स्तोत्रेषु चतुर्विंशादयश्छन्दोमा अनुक्रमेण प्रयोक्तव्याः । एवं कुर्वन्पृष्ठ्यषडहस्य पाप्मां स्वर्गं प्राप्नुवन्ति ।

---

१ ख. "ममनि" । २ ब. क. च. "न्त आवृ" ।

(द्वितीयचतुर्विंशतिरात्रकथनम्)

तमेतं पृष्ठ्यषड्होमविधिं प्रशंसति—

असत्रं वा इति। पूर्ववद्व्याख्येयम्।

तान्येतानि मध्यवर्तीनि पृष्ठान्युभयतोऽवस्थितांस्त्रयस्त्रिंशांश्च प्रकारान्तरेण प्रशंसति—

त्रयस्त्रयस्त्रिंशा इति। य एतेऽधोवर्तिनस्त्रयस्त्रिंशा ये चोपरिवर्तिनस्ते सर्वेऽपि पुरुषशरीररूपस्योरोदेशस्थानीयाः। यानि तु मध्यवर्तीनि पृष्ठानि तानि जीवात्मस्थानीयानि। तत्तोभयविधानुष्ठानेन यजमानाः स्वार्थं शर्म नसन्ते सुखं बध्नन्ति संपादयन्तीत्यर्थः। तज्ज्ञानार्थं दुःखविनाशार्थं भवति।

उक्तेषु पृष्ठस्तोत्रेषु पर्यायेण सामद्वयमेव विधत्ते—

बृहद्रथंतराभ्यामिति। पूर्ववद्व्याख्येयम्।

अथोपान्त्यं त्रयोविंशमहर्विधत्ते—

त्रिवृतोऽधीति। आवृतः पृष्ठ्यः षडहस्त्रयस्त्रिंशादिस्त्रिवृदन्तः। तथा सति द्वाविंशे दिने त्रिवृत्स्तोमः प्राप्नोति। तस्मात्त्रिवृत्स्तोमयुक्तादह्नोऽव्यवहितपूर्वं त्रयोविंशदिने त्रिवृतमेवानुतिष्ठेयुः। तथा सति त्रिवृत्स्तोमस्य सातत्यादेषां स्तोमानां संपत्तिर्भवति। सा च संपत्तिर्यजमानस्य पुत्रादिप्रभवाय संपद्यते। स च त्रिवृत्स्तोमयुक्ताहर्विशेषो ज्योतिष्टोमः कार्यः, सप्तसंस्थारूपेऽग्निष्टोमे प्रथमसंस्थारूपं कुर्यादित्यर्थः। अयमेव मनुष्यलोकः सोऽग्निष्टोमरूपः क्षयो निवासार्थो गृहविशेषः। तेनाग्निष्टोमानुष्ठानेनास्मादमुष्मिंल्लोकवर्तिनः क्षयाद्गृहान्जयन्ति न विनश्यन्तीत्यर्थः।

अथ क्रतुगतामहःसंख्यां प्रशंसति—

चतुर्विंशतिरात्र इति। पूर्ववद्व्याख्येयम्।

अथोदयनीयमहर्विधत्ते—

अतिरात्रावितीति। पूर्वं विहितेन ज्योतिरतिरिक्तो भवतीत्यनेन प्रायणीयेन सह निर्देष्टुं द्विवचनम्। वर्णसंख्याया गायत्रीसाम्याद्ब्रह्मवर्चसफलत्वेन तत्परिग्रहः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः॥ २॥

अथ सप्तमाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ।

ऋक्षा वा इयमलोमकाऽऽसीत्साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैताꣳस्त्रिꣳशत्ꣳ रात्रीरपश्यत्ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिरिवं वा अक्षुध्यत्सैतां विराजमपश्यत्तामात्मन्धित्वान्नाद्यमवारुन्धौषधीः (१) वनस्पतीन्प्रजा पशून्तेनावर्धत स जेमानं महिमानमगच्छद्य एवं विद्वाꣳसं एता आसते विराजमेवाऽऽत्मन्धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तून्वारोहन्त्युतभिः संवत्सरं ते संवत्सर एव (२) प्रतिं तिष्ठन्ति त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽऽरभन्ते प्रतिष्ठित्यै त्रिणवो भवति विर्जित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिवृदभिष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत्तेज एवाऽऽत्मन्धत्ते पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवार्थ (३) रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते चतुर्विꣳशो भवति चतुर्विꣳश-

(त्रिंशद्धात्रकथनम्)

तिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विंशूवान्विंशूवन्तो भवन्ति य एवं विद्वाꣳसं एता आसते चतुर्विꣳशात्पृष्ठान्युप यन्ति संवत्सर एव प्रतिष्ठाय (४) देवता अभ्यारोहन्ति त्रयस्त्रिꣳशास्त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता (५) व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳसं एता आसतेऽकल्पा वा एते सुवर्गं लोकं यन्त्युच्चावचाह्येते स्तोमानुपयन्ति यदेत ऊर्ध्वाः कल्पाः स्तोमा भवन्ति कल्पा एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (६) ॥

(ओषधीः संवत्सर एवार्धं प्रतिष्ठाय व्यतिषक्तैकान्न पञ्चाशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(त्रिंशद्रात्रकथनम्)

(अथ सप्तमकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः)।

द्वितीये द्वितीयश्चतुर्विंशतिरात्रोऽभिहितः। अथ तृतीये त्रिंशद्रात्रोऽभिधीयते। तमेतं विधत्ते—

ऋक्षा वा इयमिति। ओषधयो वनस्पतयश्च पृथिव्या लोमानि, तद्रहितत्वात्कदाचिदियमृक्षा परुषाऽऽसीत्। तत ओषधिवनस्पत्युत्पादनं कामयित्वा त्रिंशद्रात्रयागानुष्ठानेनोत्पादयामास। एकमन्योऽपि तदनुष्ठानेन प्रजाः पशूंश्चोत्पादयन्ति। समुदायप्राधान्यं परित्यज्य प्रत्येकप्राधान्यविवक्षया राज्ञीरिति बहुवचननिर्देशः।

अथान्नप्राप्त्यर्थं तमेव कर्तुं विधत्ते—

इयं वा अक्षुध्यादिति। इयं भूमिरन्नाभावात्कदाचित्क्षुधिताऽभूत्। ततस्तत्परिहारं विचार्यैतां त्रिंशद्रात्रिरूपा विराजमपश्यत्। त्रिंशदक्षरत्वाद्विराट्त्वम्। तां च विराजं स्वमनसि स्थापयित्वा तदनुष्ठानेनान्नं प्राप्तवती। तच्चान्नमुदकतृणौदनरूपेण बहुविधम्। तेनौषध्यादीनवर्धयत्। वर्धयित्वा च सर्वत्र पूज्यत्वलक्षणं महित्वं च प्रापोत्। एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नुवन्ति।

तत्र प्रथममहर्विधत्ते—

ज्योतिरतिरात्र इति। अथानन्तरभावीनि षट्संख्याकान्यहानि विधत्ते—

पृष्ठ्यः षडह इति। गतम्।

अथाष्टममहर्विधत्ते—

त्रयस्त्रिꣳशादिति। पृष्ठ्यषडहे यदन्तिममहस्तदेतत्त्रयस्त्रिंशम्। तस्मादूर्ध्वं पुनस्त्रयस्त्रिंशानुष्ठानेन सजातीयत्वेन यज्ञस्य सांतत्यं भवति। अपि च त्रयस्त्रिंशस्य प्रजापतिना सृष्टत्वात्तद्रूपत्वं, तेन तदनुष्ठितैस्तेन प्रजापतिमेवानुतिष्ठन्ति। तच्च प्रतिष्ठार्थं भवति।

अथ नवममहर्विधत्ते—

त्रिणव इति। अन्यत्र ' त्रिणवेन स्तोमेनेमे लोकेभ्योऽसुरान्प्राणुदन्त ' इति श्रवणात्त्रिणवो जयहेतुः।

अथ दशममहर्विधत्ते—

एकविꣳश इति। अन्यत्र ' प्रतिष्ठा वा एकविꣳशः '। ' रुग्वा एकविꣳशः '। इति श्रवणादुभयप्राप्तिः।

---

१ घ. घ. °ने स°। २ ख. °यिनः प्र°।

(त्रिरात्रकथनम्)

अथैकादशमहर्विधत्ते—

त्रिवृदग्निष्टुदिति । अग्निरेव यत्र स्तूयते सोऽग्निष्टुत् । अर्थोऽग्निस्तमर्थमापदाहः । त्रिवृत्सामथर्थात्कान्तिप्राप्तिः ।

अथ द्वादशमहर्विधत्ते—

पञ्चदश इति । इन्द्र एव यत्र स्तूयते सोऽयमिन्द्रस्तोमस्तेनेन्द्रियप्राप्तिः ।

अथ त्रयोदशमहर्विधत्ते—

सप्तदश इति । सप्तदशस्तोमस्यान्नपजाहेतुत्वादन्नयप्राप्तिः ।

अथ चतुर्दशमहर्विधत्ते—

एकविꣳश इति । पूर्ववद्व्याख्येयम् ।

अथ पञ्चदशमहर्विधत्ते—

चतुर्विꣳश इति । संख्यासाम्यादर्धमाससंवत्सरद्वारा स्वर्गे प्रतिष्ठा । अपि चायमहर्विशेषो विषूवान्विविधा सृतिः फलोत्पत्तिरिति विषूवद्दानयम् । तस्मादेवं विदित्वाऽनुष्ठातारोऽपि विविधफलोत्पत्तिमन्तो भवन्ति ।

अथ षोडशमारभ्यैकविंशतिपर्यन्तानि षट्संख्याकान्यहानि विधत्ते—

चतुर्विꣳशादिति । प्रतिष्ठाहेतुसंवत्सरात्मकचतुर्विंशस्तोमयुक्ताद्दहन ऊर्ध्वं पृष्ठ्यषडहानुष्ठाने सति प्रथमसंवत्सरे प्रतिष्ठां प्राप्य द्वात्रिंशद्भिरहोभिरारभ्य देवताः प्राप्नोति ।

अथ द्वात्रिंशं दिनं विधत्ते—

त्रयस्त्रिꣳशादिति । पृष्ठ्ये षडहेऽन्तिमं त्रयस्त्रिंशमहर्नस्मादूर्ध्वं पुनरपि त्रयस्त्रिंशानुष्ठाने ये देवा दिव्येकादश स्थेत्यादिमन्त्रोक्तासु त्रयस्त्रिंशत्संख्याकासु देवतास्वेव प्रतिष्ठिता भवन्ति ।

अथ त्रयोविंशं दिनं विधत्ते—

त्रिणवो भवतीति । नवसंख्याविषयया त्रिसंख्यया समानत्वाल्लोकत्रये प्रतिष्ठा ।

अथ त्रयोविंशचतुर्विंशदिने विधत्ते—

द्वावेकविꣳशाविति । पूर्ववद्व्याख्येयम् ।

अथ पञ्चविंशदिनमारभ्यैकोनत्रिंशपर्यन्तानि पञ्चाहानि विधत्ते—

बहवः षोडशिन इति । षोडशस्तोमयुक्ता अहर्विशेषाः षोडशिनः । ते च बहवो नैरन्तर्येणात्र पञ्चैवानुष्ठेयाः । तावतैवापेक्षितसंख्यायाः पूरितत्वात् ।

यस्मात्प्रजोत्पत्तिहेतवः षोडशिनोऽत्र बहवोऽनुष्ठितास्तस्माल्लोके प्रजासु मध्ये वृषाणः पुंस्त्वधर्मयुक्ता बहवो दृश्यन्ते ।

एवेभ्यः षोडशिभ्य ऊर्ध्वदिनेष्वनुष्ठितान्परस्परविलक्षणान्स्तोमान्प्रशंसति—

यदेते स्तोमा इति । यस्मादेते स्तोमा न्यूनाधिकभावेन संकीर्णास्तस्मा-दृषिरपि व्यवस्थामन्तरेणौषधीभिर्वनस्पतिभिश्च सर्वत्र संकीर्णा दृश्यते ।

स्तोमव्यतिषक्तत्वेदनं प्रशंसति—

व्यतिषज्यन्त इति । एतास्त्रिंशद्रात्रीर्येऽनुतिष्ठन्ति तेषां मध्य एकस्य प्रजा अपरस्य पशव एवेति व्यवस्था नास्ति, किंतु सर्वेऽपि प्रजया पशुभिश्च संकीर्णा भवन्ति ।

अथ षोडशिष्वहःस्वेकविधस्तोमान्प्रशंसति—

अक्लृप्ता वा इति । ये यजमानाः पूर्वेषु दिनेषूच्चावचान्परस्परविलक्षणा-स्तोमाननुतिष्ठन्ति ते यजमाना अक्लृप्ता वा इदं तावत्तव भोग्यमित्येवं निश्च-यरहिता एव स्वर्गं प्राप्नुवन्ति । तस्मात्क्लृप्ताः क्लृप्तोभयविधस्तोमानुष्ठानादे-वयजमानार्थमुभयोर्लोकयोर्भोग्यं क्लृप्तं भवति ।

अथ क्रतुगताहःसंख्यां प्रशंसति—

त्रिꣳशदेता इति । गतम् ।

अथान्तिममहर्विधत्ते—

अतिरात्राविति । प्रायणीयेन सह निर्देशाद्द्विवचनम् । अन्यायक-ल्पे च विधिवाक्ये स्पष्टत्वात्तत्परिग्रहः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिता भाष्ये सप्तमकाण्डे चतुर्थप्रपाठके-तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

प्रजापतिः सुवर्गं लोकमैत्तं देवा येनेयेन छन्द-साऽनु प्रायुञ्जत तेन नाऽऽप्नुवन्त एता द्वात्रिꣳशत꣡ꣳ रात्रीरपश्यन्द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजा-पतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुꣳ

---

१ स °मग्ने स्म° ।

(द्वात्रिंशद्रात्राभिधानम्)

सुवर्गं लोकमायन्य एवं विद्वाꣳसं एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति (१) श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वागनुष्टुप्सर्वामेव वाचमाप्नुवन्ति सर्वं वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति बृहद्रथंतराभ्यां यन्ति (२) इयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिष्ठित्यै ते वै यज्ञस्यांजसायनी स्तुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये परांचस्त्र्यहानुपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरूर्ध्वो तिष्ठन्ति द्वात्रिꣳशदेतास्तासां यास्त्रिꣳशत्रिꣳशदक्षरा विराडयं विराड्विराजैवान्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्यांꣳ रूपाभ्यांꣳ सुवर्गं लोकं यन्त्यतिरात्रावभितो भवतः परिगृहीत्यै (३)॥

[गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वात्रिꣳशतिश्च]।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः॥ ४ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाके त्रिंशद्रात्रोऽभिहितः । अथ चतुर्थे द्वात्रिंशद्रात्रोऽभिधीयते । तमिमं विधत्ते—

प्रजापतिः सुवर्गमिति । यदा प्रजापतिः स्वर्गं प्रायोत्तदा प्रजापतिं स्वर्गं गच्छन्तं वयमप्यनु प्राप्नुम इति मन्यमाना देवा येन येन च्छन्दसा युक्तं यज्ञमन्वातिष्ठंस्तेन सर्वेणापि नाऽऽप्नुवन् । ततस्ते देवा द्वात्रिंशद्रात्रं तत्साधनत्वेनानुष्ठितवन्तः । तत्संख्यायाः अनुष्टुभि विद्यमानत्वात्प्रजापतेश्च मन्त्रराजानुष्टुभा सर्वसृष्टत्वस्य तापनीये श्रुत्यान्तरेणानुष्टुभं प्रजापतिं तदीयेनैव द्वात्रिंशदक्षरेण च्छन्दसा प्राप्य स्वर्गं रोहन्त्य तत्र भोगान्प्राप्नुवन्तः । एवमन्येऽपि यजमानास्तदनुष्ठानेन प्रजापतिं प्राप्य तदनुग्रहाच्छ्रेय गच्छन्ति । न चात्र स्वर्गोऽनुक्त इति शङ्कनीयम् । यस्मान्मनुष्यस्य श्रीर्देवता स्वर्गः ।

क्रतुगतामहःसंख्यां प्रशंसति—

द्वात्रिंशदेता इति । एताः क्रतुगता रात्रयो द्वात्रिंशत्संख्याकाः । अनुष्टुवक्षरसंख्याऽपि तावती । अनुष्टुप्च वाग्विशेषरूपत्वाद्वाचैव । तस्मादेतदनुष्ठानेन वाचं वेदशास्त्रादिरूपां सर्वामपि प्राप्नुवन्ति । सर्वेष्वपि यजमानाः सभारञ्जनाय वाचं वदितुं समर्था भवन्ति । तेन वक्तृत्वेन पूज्यत्वलक्षणां श्रियमपि प्राप्नुवन्ति ।

अथाहानि विधत्ते—

ज्योतिर्मौरायुषीति । त्र्यहा इति बहुवचनादिह प्रायोद्रव्यपेक्षितसंख्यापूर्तिस्तावन्तोऽनुष्ठेयाः । अत्र च नवसंख्यया तत्पूर्तिरवगन्तव्या । ते सर्वेऽप्यानुलोम्येनानुष्ठेयाः । तथा सत्यनुक्रमेणैव स्वर्गं प्राप्नुवन्ति ।

अथैतेषु सप्तविंशतिदिनेषु पृष्ठस्तोत्रार्थं सामद्वयमेव पर्यायेण विधत्ते—

बृहद्रथंतरसाम्नामिति । अथ प्रातिलोम्येनानुष्ठेयमेकं त्र्यहं विधत्ते—

पराञ्चो वा इति । पूर्ववद्व्याख्येयम् ।

क्रतुगतदिनसंख्यां पूर्वं समूहरूपेण प्रशस्य । इदानीं विभज्य प्रशंसति—

द्वात्रिंशदेता इति । अत्र त्रिंशत्संख्यया विराड्द्वारान्नप्राप्तिः । उपरितनया द्विसंख्यया ऽहोरात्ररूपाभ्यां स्वर्गप्राप्तिः ।

अथ माध्यंदिनोदमनीये विधत्ते—

अतिरात्रावितीति ।

---

१ ख. श्रीरेव ८ ।

(त्रयस्त्रिंशद्ब्राह्मणकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः)।

द्वे वाव द्वैवसत्रे द्वादशाहश्चैव त्रयस्त्रिंशदहश्च य एवं विद्वाꣳसस्त्रयस्त्रिंशदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नावविध्यति सदृङ्य एवं विद्वाꣳसस्त्रयस्त्रिंशदहमासते वि पाप्मना भ्रातृव्येणाऽऽवर्तन्तेऽहर्भाजो वा एता देवा अग्र आऽहरन् (१) अहरेकोऽभजताहरेकस्ताभिर्वै ते प्रबाहुगाध्नुवन्य एवं विद्वाꣳसस्त्रयस्त्रिंशदहमासते सर्व एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राऽऽप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतिं तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रिण्यश्विनानि भवन्ति त्रय इमे लोका एषु (२) एव लोकेषु प्रतिं तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्वजिद्भवत्यन्नाद्यस्यावरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत्पुरस्ताद्द्वादशाहमुपेयुर्नोत्ता वाचमुपेयुरुपदासुकेषां वाक्स्या दुपरि द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरि ह्युक्था वैश्वसाऽवान्तरम् (३)

(त्रयस्त्रिंशद्रात्रिकथनम्)

दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उद्दालकः शौल्बायनः सत्रस्यार्धमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका वा एता रात्रयो यजमाना विश्वजित्सहातिरात्रेण पूर्वाः षोडश सहातिरात्रेणोत्तराः षोडश य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासत ऐषा द्व्यनीका प्रजा जायतेऽतिरात्रावमितौ भवतः परिगृहीत्यै (४) ॥

(अहरन्तेष्ववान्तरꣳ षोडश सह सप्तदश च ॥)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाके द्वात्रिंशद्रात्रोऽभिहितः। अथ पञ्चमे त्रयस्त्रिंशद्रात्रोऽभिधीयते। तमिमं विधत्ते—

द्वे वाव देवसत्रे इति । देवानां प्रियं सत्रं द्वे एव योऽयं द्वादशाहो यश्चायं त्रयस्त्रिंशदहः, एतयोरुभयोरतिप्रीतिः । एतां प्रीतिं ज्ञात्वा येऽनुतिष्ठन्ति ते विलम्बमन्तरेणैव देवताः प्राप्नुवन्ति । न केवलं देवताप्राप्तिः किंतु पापव्यावृत्तिरपि । तत्र कश्चिद्व्यतिरेकदृष्टान्तः—यथा लोके श्रेयान्राजामात्यादिः प्रशस्तः पुरुषो राज्यमभ्यारूढः पुनरप्यधिकं राज्यं कामयमानस्तथा करोति यादृशेन सामभेदाद्युपायेन तद्राज्यान्तरं प्राप्स्यति तादृशं करोति । यद्यवविध्यति तस्मिन्नुपाये प्रमाद्यति तदानीं पापीयान्भवति पूर्वं विद्यमानमपि श्रैष्ठ्यमपगच्छतीत्यर्थः। यदि नावविध्यति न प्रमाद्यति तदाऽपि सदृङ्भवति पुरा यादृशः श्रेयान्पश्चादपि तादृश एव भवति । पूर्वं राजेति व्यवहरन्तः प्राणिनः पश्चादपि राजेत्येव

(त्रयस्त्रिंशद्रात्रकथनम्)

व्यवहरन्ति न तु तस्मादुत्कृष्टः कश्चिद्व्यवहारस्तस्मिन्विद्यते । सोऽयं व्यतिरेकदृष्टान्तः । इह तु पूर्वे विद्यैश्वर्यादिसंपन्ना अपि मनुष्या यजमानास्त्रयस्त्रिंशद्रात्रस्य महिमानं जानन्तोऽनुष्ठाय देवत्वप्राप्तिप्रतिबन्धकपापरूपेण भ्रातृव्येण वियुक्ताः सन्तः पूर्वसिद्धान्मनुष्यत्वादप्यधिकं देवत्वं प्राप्नुवन्तीति विशेषः ।

पुनरपि प्रकारान्तरेण प्रशंसति—

अहर्भाजो वा इति । अहानि भजन्तेऽनुतिष्ठन्तीत्यहर्भाजः । तादृशा देवा एतास्त्रयस्त्रिंशत्संख्याका रात्रीः संपादितवन्तः । कथमिति तदुच्यते—एको देव एकमहरन्वतिष्ठत् । पुनरप्येको देवोऽन्यदहरन्वतिष्ठत् । एवं त्रयस्त्रिंशत्संख्याका देवास्तत्संख्याकान्यहान्यन्वतिष्ठन्, ताभिरनुष्ठिताभी रात्रिभिरेव ते सर्वेऽपि देवाः प्रबाहुगार्ध्नुवन्समं यथा भवति तथा समृद्धिं प्राप्नुवन्, न त्वेकोऽपि तन्मध्ये समृद्धिविकलः । एवं यजमाना अपि सर्वे साम्येन समृद्धिं प्राप्नुवन्ति । सैव समृद्धिः स्पष्टी क्रियते—सर्वे ग्रामणीयं ग्रामस्वामित्वं प्राप्नुवन्ति ।

अथाहानि विधत्ते—

पञ्चाहा भवन्तीति । ज्योतिर्गौरायुरित्येवंविधो द्विरावृत्तरूपहो द्वितीयज्योतिर्विवर्जितः पञ्चाहः । तादृशाश्च पञ्चाहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः । इह तु चतुर्भिरपेक्षितसंख्यापूरणाच्चत्वारो विधीयन्ते । हेमन्तशिशिरयोरैक्यात्पञ्चसंख्याका ऋतवस्तद्द्वारेण संवत्सरे प्रतितिष्ठन्ति । किंच पञ्चसंख्यया पङ्क्तिद्वारेण यज्ञं प्राप्नुवन्ति ।

ग्रामणीयोदयनीययोरतिरात्रयोर्मध्यमे चातिरात्रे शस्त्राणि विधत्ते—

त्रीण्याश्विनानीति । आश्विनेन शस्त्रेणोपलक्षितान्यहानि त्रीण्यनुष्ठेयानि । तेन लोकत्रये प्रतिष्ठिता भवन्ति । किंच यज्ञस्येन्द्रियस्थानानि सवनानि त्रीणि, तान्यपि प्राप्नुवन्ति ।

अन्यदहर्विधत्ते—

विश्वजिदिति । विश्वजयहेतोरहहेतुत्वं सुलभम् ।

तमेव विश्वजितं विशिनष्टि—

सर्वपृष्ठ इति । रथंतरबृहदानीनि षटसंख्याकानि पृष्ठानि सर्वाण्यपि यस्यासौ सर्वपृष्ठः । तेन सर्वमपि फलं भवति ।

अथान्यान्यहानि विधत्ते—

वाग्वै द्वादशाह इति । बहुविधस्तोत्रशस्त्रोपेतत्वाद्द्वादशाहो वाग्रूपः ।

(त्रयस्त्रिंशद्ब्राह्मणकथनम्)

तथाविधं द्वादशाहं यद्युक्तेभ्योऽहोभ्यः पूर्वमनुतिष्ठेयुस्तदानीं तत्रत्यानां स्तोत्रशस्त्राणामनुक्तत्वादनाप्तामसंपूर्णां वाचमुपेयुः प्राप्नुयुः । तेषां यजमानानां वागुपक्षयशीला स्यात् । तस्मादुक्तेभ्योऽहोभ्य ऊर्ध्वं द्वादशाहमनुतिष्ठेयुः। तस्मादाप्तां संपूर्णामेव वाचं प्राप्नुवन्ति । यस्मादूर्ध्वभागे वाग्रूपस्य द्वादशाहस्यानुष्ठानं तस्मात्कारणान्नाभेरुपरिष्टान्मुखेन वयं वाचा वदामः ।

अत्र द्वादशाहशब्देन प्रायणीयोदयनीयौ वर्जयित्वाऽवशिष्टस्य दशरात्रस्य विवक्षां दर्शयति—

अवान्तरं वा इति । अवान्तरं वै द्वादशाहस्यावयवभूतेनैव दशरात्रेण पुरा कदाचित्प्रजापतिः प्रजा असृजत । अतो यद्यत्र दशरात्रो भवेत्तदा तेन यजमानाः प्रजाः सृजन्ते । तमेव दशरात्रं पुनः प्रशंसति—

एताꣳ ह वा इति । उदङ्क्ते नामतः, स च शुल्बस्यापत्यभूतः । एतस्य सत्रस्याङ्गभूतो योऽयं दशरात्रोऽस्त्येतेन क्रतस्नस्य सत्रस्यैतामृद्धिं फलमुदङ्क उवाच । अतो यदि दशरात्रोऽनुष्ठीयते तर्हि क्रतस्नसमृद्धिस्तेन भवति । अपि च पूर्वेष्वह.सु यदेवाङ्गं विकलमनुष्ठीयते तस्य सर्वस्यैषा दशरात्रानुष्ठितिरुपशमहेतुर्भवति ।

इदानीं योऽयं विश्वजित्सर्वपृष्ठो विहितस्तस्य स्थानविशेषं विधत्ते—

द्व्यनीका वा इति । अनीकं सेना, द्वे अनीके सेनारूपे यासां रात्रीणां ता द्व्यनीकाः, सेनाद्वयसमाना इत्यर्थः । तत्र प्रायणीयातिरात्रेण सह त्रयः पञ्चाहाः षोडश पूर्वभाविन्यो रात्रय एका सेना । उदयनीयेनातिरात्रेण सहैकः पञ्चाहो दशरात्रं चेत्युत्तरभाविन्यः, एताः षोडश रात्रयो द्वितीया सेना । विश्वजिद्यजमानस्थानीयत्वादुभयपार्श्ववर्तिन्योः सेनयोर्मध्येऽवस्थितो राजेव सप्तदशसंख्यापूरके मध्यमदिने प्रयोक्तव्यः । एवं विदित्वा क्रतुमनुतिष्ठतां यजमानानां बहुपुत्ररूपा बहुकन्यकारूपा च द्विविधा प्रजा सर्वतो जायते ।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति

इति श्रीमत्सायणाचार्यविरचिते माधवीये [illegible] भाष्यके कृष्णयजुर्वेदीयतैत्तिरीयसंहिता[illegible]सप्तमकाण्डे चतुर्थप्रपाठके [illegible] वाकः ॥ ५ ॥

---

१ ख. घ च दाऽनन ।

(षट्त्रिंशद्रात्रकथनम्)

(अथ सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः)।

आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन्न सुवर्गं लोकमायन्त एतꣳ षट्त्रिꣳशद्रात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्त्सुवर्गं लोकमायन्य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति ज्योतिरतिरात्रः (१) भवति ज्योतिरेव पुरस्ताद्धते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव (२) वीर्ये पशुषु प्रति तिष्ठन्ति षट्त्रिꣳशद्रात्रो भवति षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ स्वाराज्यमाश्नुताश्नुवते स्वाराज्य य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं यन्त्यतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै (३) ॥

(अतिरात्र ओजस्येव षट्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(एकोनपञ्चाशद्ब्राह्मणकथनम्)

(अथ सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाके त्रयस्त्रिंशद्ब्राह्मणोऽभिहितः । अथ षष्ठे षट्त्रिंशद्ब्राह्मणोऽभिधीयते । तमेतं विधत्ते-

आदित्या अकामयन्तेति । पुरा कदाचिदादित्याः स्वर्गं लोकं गन्तुकामा मार्गमप्यज्ञात्वा स्वर्गं न प्राप्ताः । ततस्तदुपाय विचार्य षट्त्रिंशद्ब्राह्मणं निश्चित्य तदनुष्ठानेन मार्गमवगत्य स्वर्गं प्राप्ताः । एवमन्येऽपि यजमानाः स्वर्गं प्राप्नुवन्ति ।

प्रायणीयमहर्विधत्ते-

ज्योतिरतिरात्र इति । अथोत्तराणि कानिचिदहानि विधत्ते-

षडहा भवन्तीति । ज्योतिर्गौरायुरायुर्गौर्ज्योतिरित्यभ्यासेनैकोऽभिप्लवः षडहः। तादृशाः षडहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः ।

तेषां संख्यां विधत्ते-

चत्वार इति । चतुर्भिः षडहैरत्रापेक्षिता संख्या पूर्यते ।

अथ पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येवंविधं द्वादशाहस्य दशरात्रं विधत्ते-

असत्रं वा इति । पूर्ववद्व्याख्येयम् ।

क्रतुगतामहःसंख्यां प्रशंसति-

षट्त्रिꣳशद्रात्र इति । पशूनां बार्हतत्वं चयनब्राह्मणे स्पष्टमाम्नातम्- 'छन्दाꣳसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः पशव उच्यन्ते' इति। किंच, छन्दसां मध्ये बृहती स्वाराज्यं प्राप्तवती । तस्मादेतदनुष्ठायिन इह स्वाराज्यं प्राप्य परत्र स्वर्गं प्राप्नुवन्ति ॥

अथोदयनीयं विधत्ते-

अतिरात्राविति । प्रायणीयेन सह निर्देष्टुं द्विवचनम् । स्वर्गहेतुत्वस्य विधिवाक्ये स्पष्टत्वात्तत्परिग्रहः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ।

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि

(एकोनपञ्चाशद्रात्रकथनम्)

सौदासाग्ग्वेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत्तमाऽहरत्तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳसं एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान्भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रः (१) वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशममहर्भवति वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तून्न्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रतितिष्ठन्ति द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् (२) दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठन्त्यूनातिरिक्ता वा एता रात्र्य ऊनास्तद्दर्शे न पञ्चाशदतिरिक्तास्तद्ध्रुवसीरष्टाचत्वारिꣳशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳसं एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (३) ॥

(एकोनपञ्चाशद्रात्रकथनम्)

(वज्रं आत्मन्प्रजया द्वाविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया सप्तमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः)।

षष्ठे षट्त्रिंशद्रात्रोऽभिहितः। अथ सप्तम एकोनपञ्चाशद्रात्रोऽभिधीयते। तमेतं विधत्ते—

वासिष्ठो हतपुत्र इति। विश्वामित्रशापेन हतेषु पुत्रेषु प्रजां शत्रुक्षयं च कामयमानो वसिष्ठस्तदुपायत्वेनैकस्मान्नपञ्चाशं निश्चित्य तदनुष्ठानेन प्रजां लब्ध्वा सौदासानभ्यभवत्। सुदासस्य पुत्राः सौदासास्ते च वसिष्ठस्य शत्रवः। वसिष्ठवद्यजमाना अपि तदनुष्ठानेन प्रजा लब्ध्वा भ्रातृव्यानभिभवन्ति।

अथाहानि विधत्ते—

त्रयस्त्रिवृत इति। त्रिवृत्स्तोमयुक्ता अग्निष्टोमरूपा अहर्विशेषास्त्रयः कर्तव्याः। 'त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्रहरति' इति श्रुत्यन्तरात्त्रिवृद्रूपस्य वज्रस्य मुखमनेन तीक्ष्णं कुर्वन्ति।

अथान्यानि कानिचिदहानि विधत्ते—

दश पञ्चदशा इति। पञ्चदशस्तोमयुक्ता अहर्विशेषा दशसंख्याकाः कर्तव्याः। 'त पञ्चदशस्तोमो मध्यत उदतृणत्' इत्यत्र हिंसाहेतुत्वश्रवणात्पञ्चदशस्य वज्रत्वम्।

अथान्यदहर्विधत्ते—

षोडशिमादिति। षोडशिस्तोमयुक्तं दशरात्रस्य दशमदिवाकल्पमेकमहः कार्यम्। तेन पूर्वोक्ते वज्रे वीर्यं स्थापयन्ति।

अथान्यानि कानिचिदहानि विधत्ते—

द्वादश सप्तदशा इति। सप्तदशस्तोमयुक्ता अहर्विशेषा द्वादशसंख्याकाः कार्याः। सप्तदशस्तोमस्योदरभागजन्यत्वाद्धेतुत्वम्। सप्तदशाक्षरस्य प्रजापतिरूपत्वाच्च प्रजाहेतुत्वम्।

अथ षट्संख्याकान्यहानि विधत्ते—

पृष्ठ्यः षडह इति अथान्यानि कानिचिदहानि विधत्ते—

---

१ क. घ. ङ. च. छ. ज. ञ. टा.।

(सवत्सरसत्रदीक्षाकालः)

द्वादशैकविंशा इति एकविंशस्तोमयुक्ता अहर्विशेषा द्वादश कर्तव्याः। एकविंशस्तोमस्य प्रतिष्ठाहेतुत्वं क्लान्तिहेतुत्वं चासकृदुक्तम्।

अथान्यानि कानिचिदहानि विधत्ते—

बहवः षोडाशिन इति। षोडशिस्तोत्रयुक्ता अहर्विशेषा यावन्तोऽपेक्षितास्तावन्तः कार्याः। अत्र त्रिभिरपेक्षितसंख्यायाः पूरणात्त्रयः कार्याः।

एतत्क्रतुगतेषु षट्स्वहःस्वाश्विनशस्त्रं विधत्ते—

षडाश्विनानीति। एकोनपञ्चाशद्रूपं स्तौति—

ऊनातिरिक्ता वा इति। अस्मिन्क्रतौ विद्यमाना एता रात्रय ऊनाश्चातिरिक्ताश्च भवन्ति। कथमिति तदुच्यते—यद्यस्मात्कारणादेकोनपञ्चाशदेकया रात्र्या वर्जिता पञ्चाशत्संख्या तस्मादेता ऊनाः। यद्यस्मात्कारणादष्टाचत्वारिंशत्संख्याया अधिकास्तस्मादतिरिक्ताः। प्रजापतिः पुरा क्वचिदूनादल्पाद्वीर्यास्थौढशरीररूपाः प्रजा असृजत। क्वचिच्चातिरिक्तादधिकादाकाशादेरुत्तरोत्तरन्यूनान्वाय्वादीनसृजत। तस्मादूनातिरिक्तरूपोऽयं क्रतुः प्रशस्तः।

पूर्वं विधिवाक्येऽभिहितं फलमुपसंहरति—

ये प्रजाकामा इति। क्रतुगतामहःसंख्यां प्रशंसति—

वैराजो वा इति। चतुर्व्वंहर्दशकेषु दशसंख्यासद्भावान्मुख्यं वैराजत्वम्। पञ्चमस्य दशकस्यैकेन न्यूनत्वेऽपि वैराजत्वमुपचरितुं शक्यम्। 'न वा एकेनाक्षरेण च्छन्दांसि वियन्ति न द्वाभ्याम्' इति श्रुत्यन्तरात्। अतो वैराजत्वादन्नपाप्तिः।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। उक्तन्यायेनान्नहेतुत्वादन्नपरिग्रहः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

संवत्सरायं दीक्षिष्यमाणा एकाष्टकायां दीक्षे-

---

१ क. घ. ङ. च. °ङशीस्तो°।

(सवत्सरसत्रदीक्षाकाउ.)

रन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एताꣳ रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्त आर्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावूतू भवतो व्यस्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एतत् (१) संवत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यत्सांमेध्ये विषूवान्त्सपद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छम्बट्कुर्वन्ति तेषाम् (२) पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति नानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वं राध्नुवन्ति (३)॥

(एतच्छम्बट्कुर्वन्ति तेषा चतुस्त्रिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

सप्तमेऽनुवाक एकोनपञ्चाशद्वाक्योऽभिहितः । अथाष्टमादिषु चतुर्ष्वनुवाकेषु संवत्सरसत्रमभिधीयते ।

(संवत्सरसत्रदीक्षाकालः)

तत्राष्टमेऽनुवाके संवत्सरसत्रस्य दीक्षाकालं विधत्ते--

संवत्सरायेति। ये यजमानाः संवत्सरसत्रार्थं दीक्षिष्यन्ते ते यजमाना एकाष्टकायां माघकृष्णाष्टम्यां दीक्षां कुर्युः। येयमेकाष्टकाभिमानिनी देवता सेयं संवत्सराभिमानिनो देवस्य पत्नी। एकाष्टकाया अभिमानिदेवतारूपत्वं गर्भधारणादवगम्यते। तथा चाग्निकाण्डे मन्त्र आम्नायते—'एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्' इति। संवत्सरस्य पतित्वं चान्यत्र मन्त्रान्तरेणाऽऽम्नातम्—'एकाष्टका तपसा तप्यमाना संवत्सरस्य या पत्नी दुदुहे प्रपीना' इति।

एष संवत्सराभिमानी देव एतां माघकृष्णाष्टमीं रात्रिं सर्वामप्येतस्यामेकाष्टका देवतायामेव वसति। अतस्तत्र दीक्षा कुर्वन्तो यजमाना मुख्यमेव संवत्सरमारभ्य दीक्षितवन्तो भवन्ति।

तमेतं पक्षं दूषयित्वा पक्षान्तरं विधत्ते--

आर्तं वा एत इति। ये यजमाना एकाष्टकायां दीक्षन्ते ते यजमानाः संवत्सरसत्रस्याऽऽर्तमभि विनाशमभिलक्ष्य दीक्षन्ते। तत्रायं हेतुः—पुष्य (पौष) माघरूपावृत्ववयवौ संवत्सरस्यान्त इत्येतन्नामधारिणौ। तयोः शिशिरर्तुरूपत्वात्। तेन चर्तुना पूर्वसंवत्सरस्य समाप्तत्वात्पौषपौर्णमासीमारभ्य फाल्गुनपौर्णमास्याः प्राचीनः कालः संवत्सरस्यान्तः। किंचैकाष्टकायां दीक्षमाणाः संवत्सरस्य व्यस्तमभि विपर्यासमभिलक्ष्य दीक्षन्ते। आदौ हि दीक्षा कर्तव्या। अयं च संवत्सरस्यान्तः कालः। ऋत्ववयवयोरेकयोरुक्तन्यायेनान्तनामोपेतत्वात्। तस्मादुत्तरफल्गुनीयुक्ते पूर्णमासे दीक्षां कुर्युः। तस्य च भाविसंवत्सरोपक्रमदिनत्वात्। एतदेवाभिप्रेत्याऽऽधानब्राह्मणे समाम्नातम्—'उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य। यदुत्तरे। फल्गुनी।' इति।

एतमपि पक्षं दूषयित्वा पक्षान्तर विधत्ते--

तस्यैकैव निर्येति। तस्य फल्गुनीपूर्णमासदीक्षापक्षस्यैकैव निर्या वक्ष्यमाण एक एव दोषः, न तु पूर्वोक्तार्तत्वव्यस्तत्वदोषौ। कोऽसावेको दोष इति स उच्यते—समीचीना अतिवर्षणक्षमा मेघा यस्मिन्वर्षर्तौ सोऽयं संमेघः। तस्य संबन्धी प्रत्यासन्नः कालः सांमेघ्यः अस्मिन्काले विषूवानहः(?) संपद्यते। तथा हि विषूवानिति संवत्सरस्य मध्यवर्ती मुख्योऽहर्विशेषः। ततः पूर्वे षण्मासाः। उत्तरे च षण्मासाः। तयोरुभयोर्मासषट्कयोर्मध्ये सोऽहर्विशेषः कर्तव्यः। अत्र च फल्गुनीपूर्ण-

(संवत्सरसत्रदीक्षाकालः)

मासमारभ्य द्वादश दीक्षा द्वादशोपसदश्चानुष्ठायोत्तरदिने प्रथममासोपक्रमः कार्यः। तथा सति चैत्रशुद्धनवम्यामुपक्रमो भवति । आश्वयुजशुद्धाष्टम्यां मासषट्कं समाप्य नवम्यां विषूवान्कार्यः। स च वर्षर्तोः प्रत्यासन्नः। भाद्रपदपौर्णमास्यां वर्षर्तौ समाप्ते सत्यनन्तरमासवर्तित्वात् । अतो वर्षर्तुसमीपे विषुवद्दिनसंपत्तिपरिहाराय चित्रानक्षत्रयुक्तायां पौर्णमास्यां दीक्षा कर्तव्या । सोऽपि वसन्तर्तुमध्यपातित्वात्संवत्सरस्य मुखमेव । अतो मुखत एवाऽऽरम्भः कृतो भवति । एवं सति कार्तिकशुद्धनवम्यां विषूवान्संपद्यते । तच्च दिनं वर्षर्तोर्दूरवर्ति । अतो वृष्टिशङ्कया अभावाद्विसम्भेणानुष्ठातुं शक्यत इति तस्य पक्षस्य न कोऽपि दोषोऽस्ति ।

अथ गुणविशेषमवलोक्य पक्षान्तरं विधत्ते--

चतुरहे पुरस्तादिति । माघपौर्णमास्याः पुरस्ताच्चतुरहे शुक्लैकादश्यां दीक्षेरन् । तथा सति माघकृष्णसप्तम्यां द्वादशदीक्षाणां समाप्तत्वात्तदनन्तरवर्तिन्यामेकाष्टकायां सोमक्रयः संपद्यते । तथा सत्येकाष्टकाया अप्युपयुक्तत्वात्संवत्सरपत्नीत्वेन मुख्यामेतां न च्छम्बट्कुर्वन्ति निष्क्रयोजनां न कुर्वन्ति । ततः संवत्सरपत्न्याः सत्कार एको गुणः ।

अथ गुणान्तरं दर्शयति--

तेषां पूर्वपक्ष इति । तेषामेकाष्टकायां क्रयमनुतिष्ठतां यजमानानां तद्दिनमारभ्यानुष्ठीयमाना उपसदश्चैत्रशुद्धचतुर्थ्यां संपद्यन्ते । तत उत्तरदिने क्रियमाणा सुत्या शुक्लपक्ष एवोत्क्रान्ता भवति । तत आरभ्य सर्वेऽपि मासाः शुक्लपक्षमेवाभिलक्ष्य समाप्यन्ते । तेषु समाप्तेषु ते ऋत्विणोऽपि पूर्वपक्ष एव सत्रादुत्तिष्ठन्ति । उत्तिष्ठतस्तान्यजमाननु भूम्यामोषधयो वनस्पतयश्च सत्कर्मानुष्ठानसामर्थ्यादुद्भवं गच्छति । तदुद्भवे सति तान्यजमाननु पुण्यकीर्तिरुत्तिष्ठति । कीदृशी कीर्तिरिति सोच्यते--इमे यजमाना अरात्सुः समृद्धिं प्राप्तवन्त इत्येतादृशी कीर्तिः। सत्कर्म्यानमनु सर्वे प्राणिनः समृद्धा भवन्ति । [illegible] सत्कर्मानुष्ठानेन भूमौ सर्वसस्याभिवर्धनात् । तस्मादीदृशं गुणविशेषं पक्ष [illegible] माघशुक्लैकादश्यां दीक्षेरन्नयमेव मुख्यः पक्षः ।

अत्र मीमांसा ॥

षष्ठाध्यायस्य पञ्चमपादे दशमाधिकरणे चिन्तितम्-

(दीक्षोपसत्कथनम्)

गवामयन उक्ता तु या काचित्पूर्णिमाऽथवा ।
चैत्री माघ्युत काचित्स्यादविशेषात्प्रशंसया ॥
चैत्री स्यात्क्रय एकाष्टकायामित्युपवर्णितम् ।
माघकृष्णाष्टमी त्वेकाष्टकाऽनो माघपूर्णिमा ॥

गवामयने श्रूयते—' चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः संपद्यते ' इति । पौर्णमास्याः पूर्वस्मिंश्चतुरहे दीक्षेरन्नेकादश्यां दीक्षामारभेत । तथा सति पौर्णमास्या उपरितने सप्तमे दिने द्वादश दीक्षाः पूर्यन्ते । तत उपरितन्यामष्टम्यां सोमक्रय इत्यर्थः । तत्र विशेषस्यादृष्टत्वाद्या काचित्पूर्णिमेत्येकः पक्षः । ' चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः ' इति प्रशस्यमानतया चैत्री पौर्णमासीति द्वितीयः पक्षः । याज्ञिकसमाख्यया माघकृष्णाष्टम्येकाष्टका । तत्र सोमक्रयसंपत्तये माघ्याः पौर्णमास्याः पूर्वस्यामेकादश्यां दीक्षाऽऽरब्धव्या ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः) ।

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भिर्द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां माꣳसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रधीयाꣳसः सुवर्गं लोकमयामेति (१) ॥

(सुवर्ग पञ्चाशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः)।

अष्टमे संवत्सरसत्रस्य दीक्षाकाल उक्तः । अथ नवमे दीक्षा उपसदश्चोच्यन्ते ।

ता उभयीर्विधत्ते—

सुवर्गं वा एत इति । सत्रानुष्ठायिनः स्वर्गं गच्छन्ति । अतस्तद्योग्यतायै स्वदीक्षाभिरात्मानं स्वदेहमभीन्धत एव सर्वतो ज्वलयन्त्येव । उपसद्भिस्तु श्रपयन्ते स्वदेहं पचन्ति । तस्माद्दीक्षा उपसदश्चानुष्ठेया इति विध्युन्नयः । यद्यपि द्वादशाहविकृतित्वेन प्राप्तास्तथाऽपि विकृतिलिङ्गत्वाय स्तुतये वा तदनुवादोऽस्तु ।

अथ विभज्य प्रशंसां कुर्वंस्तासामुभयविधानां द्वादशत्वं प्रकटयति—

द्वाभ्यां लोमेति । द्वाभ्यां दिनद्वयानुष्ठेयाभ्यां दीक्षाभ्यामुपसद्भ्यां च स्वकीयं लोम हविरर्थमवद्यन्ति । अनन्तरभाविनीभ्यां द्वाभ्यां त्वचमवद्यन्ति । एवं रुधिरमांसास्थिमज्जसु योजनीयम् । यदेतत्सत्रं तदेतदात्मदक्षिणं वै स्वशरीरमेव तत्र दक्षिणा, नत्वन्या गवादिरूपाऽस्ति । तस्मात्स्वशरीरमेव दक्षिणारूपेण नीत्वा स्वर्गं प्राप्नुवन्ति

यदुक्तं सूत्रकारेण—' सत्रं चेद्वपनकाले सशिखानि वपन्ते ' इति, तदेतद्विधत्ते—

शिखामनु [illegible] शिखामनुलक्ष्य प्रकर्षेण वपनं कुर्युः । तत्र मृतत्वमूपाणां केशानामपगमदृष्ट्यै भवति । अपि च केशभाररहिता रघीयांसो लघुतराः सन्तः स्वर्गमाप्नुयामित्येतेनाभिप्रायेण सशिखं वपनं कुर्युः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः)।

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमनुपू-

(प्रायणीयाख्यप्रथमाहाभिधानम्)

वर्मवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममे-वैतत्पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान्प्र युंक्ते ते (१) सप्तस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्यते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्यो रुर्विराट्त्सुवर्गमेव तेन लोकं यन्ति रथंतर दिवा भवति रथंतरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं बृहत्तन्मध्यतो दधति विधृत्यै तेनाजामि (२) ॥

(त एकान्न पञ्चाशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः) ।

नवमे दीक्षा उपसदश्चोक्ताः । अथ दशमे प्रायणीयाख्यं प्रथममहरुच्यते । तदेतद्विधत्ते—

ब्रह्मवादिनो वदन्तीति । [illegible]याख्यः क्रतुः सोऽयं यज्ञक्रतूनां परमः सोमयागरूपा ये क्रतवस्तेष [illegible] । अग्निष्टोम उक्थ्यः षोडश-तिरात्र इत्येतस्य तदीयक्रम[illegible]स्य च प्राथम्यम् । प्रजननं ज्योतिरित्यनुवाके ' तस्मादाहुर्ज्योतिष्टोमयज्ञः ' इत्याम्नातम् । एवं सत्यग्निष्टोमं परित्यज्य चरमभाविनमतिरात्रं कस्मात्कारणात्सत्रे प्रथममनुतिष्ठन्तीति ब्रह्मवादिनां प्रश्नः । तत्राग्निष्ट[illegible]मुत्तरमाहुः—नात्राग्निष्टोमः परित्यक्तः । अत्राग्निष्टोमोक्थ्यषोडश्यतिरा[illegible]पुनरोत्तरस्य पूर्वपूर्वगर्भितत्वात् । द्वादशस्तोत्रमग्निष्टोममन्तर्भाव्य पुनः स्तोत्रत्रयाधिक्येनोक्थ्यः संपद्यते । तमन्तर्भाव्य पुनरेकस्तोत्राधिक्येन षोडशी संपद्यते । तमन्तर्भाव्य पुनस्त्रयोदशस्तोत्राधिक्येनातिरात्रः

संपद्यते । अतः सत्रिणोऽतिरात्रमनुतिष्ठन्तीति यदेतद्वा एतस्मिन्सोमानुष्ठानेऽग्निष्टोमं प्रथममनुतिष्ठन्ति, अथोक्थ्यषोडश्यतिरात्रान्, तदतदनुपूर्वमेवानुक्रमेणैव यज्ञक्रतूनुपेत्यानुष्ठातुं निश्चित्य तान्क्रतूनुक्रम्य परितः स्वीकृत्य ततः सर्वत्र सोममेव पिबन्तः सत्रिण आसते । अग्निष्टोमपरित्यागाभावादतिरात्ररूपं ज्योतिष्टोमं प्रथममनुतिष्ठेयुः । स हि ज्योतिष्टोमो ज्योतिर्गौरायुरित्येतन्नामकानां स्तोमानां क्रतूनां मुखसदृशः । तस्मान्मुखत एवाऽऽरभ्य स्तोमान्क्रतून्सत्रिणः प्रयुञ्जते ।

गोष्टोमायुष्टोमाभ्यां पूर्वभावित्वं ज्योतिष्टोमस्य प्रकारान्तरेण पुनः प्रशंसति—

ते सꣳस्तुता इति । ज्योतिष्टोमे स्तोत्रगता य ऋग्विशेषाः सन्ति ते संस्तुताः सन्तो विराजं दशसंख्यामेव प्राप्नुवन्ति न तु न्यूना नाप्यधिकाः । इतरयोस्तु गोष्टोमायुष्टोमयोर्द्वे ऋचावतिरिच्येते, दशसंख्या न प्राप्नुतः । तत्कथमिति तदुच्यते—एकयर्चा गोष्टोमो दशसंख्याया अतिरिक्तः आयुष्टोमस्त्वेकया न्यूनः । तस्माद्विराड्रूपत्वं ज्योतिष्टोमस्य प्राशस्त्ये हेतुः । किंच भासकत्वाज्ज्योतिष्टोमः स्वर्गलोकात्मको विराड्रूपः । तस्मादुभयथा प्रशस्तेन तेन ज्योतिष्टोमेन स्वर्गं लोकं प्राप्नुवन्ति ।

अथास्मिन्नतिरात्रसंस्थे ज्योतिष्टोमे सामविशेषं विधत्ते—

रथंतरं दिवेति । दिवा पृष्ठस्तोत्रं रथंतरं गीयते, नक्तमपि रात्रिपर्यायेषु रथंतरं गीयते, तत्तदानीमालस्य भवति । तादृशालस्यपरिहारः केनान्येन साम्ना भवतीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा उत्तरमाहुः—सौभरारुयं यदन्यत्साम्नास्ति तत्तृतीयसवने ब्रह्मसामत्वेन गेयम् । तच्च बृहत्पौढं, तदेतद्बृहद्रथंतरयोरुभयोर्मध्ये स्थापयन्ति । तच्च यज्ञस्य धृत्यै संपद्यते । तेन विजातीयसाम्नाऽऽलस्यपरिहारो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थे प्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः) ।

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव

(मासगताहकथनम्)

तेन प्रति तिष्ठन्त्यार्द्धेन तृतीयमुप यन्त्यनुष्मिन्नेव तेन लोके प्रति तिष्ठन्तार्धं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्त्स्तामानुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति ते सꣳस्तुता विराजम् (१) अभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽर्द्धनः संवर्गो वै लोको ज्योतिरूर्ग्विराड्जमेवावं रुन्धते ते न क्षुधाऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधा इव हि सत्रिणोऽभिष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत्तदेतत्परियद्वैवचक्रं यदेतेन (२) षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति सभ्नुवते षडहेन यन्ति षडवा ऋतव ऋतष्वेव प्रति तिष्ठन्त्युभयतोज्योतिषा यन्त्युभयत एव संवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ (३) तत्पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत्प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्विꣳशतिरहानि सं पद्यन्ते चतुर्विꣳशतिरर्धमासाः संवत्सरस्तत्संवत्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः संवत्सर इति खलु वा आहुर्वर्षीयान्प्रतिष्ठाया इत्येतावद्वै संवत्सु-

(मासगताहकथनम्)

रस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतिति-
ष्ठन्तो यन्ति (४) ॥

(विराजमेतेन द्वादशावेतावद्वा अष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः) ।

दशमे प्रायणीयमहरुक्तम् । अथैकादशे मासगतान्युच्यन्ते ।

तत्राऽऽदौ तावत्त्रीण्यहानि विधत्ते—

ज्योतिष्टोमामिति । ज्योतिष्टोमगोष्टोमायुष्टोमा एकाहविशेषाः । एतैरेवानुलोमप्रतिलोमगतैरभिप्लवः षडहः संपद्यते । तस्मिन्षडहे पूर्वभागवर्तिनोऽनुलोमगवा एतेऽनुष्ठेयाः । क्रमेणैतैर्लोकत्रये प्रतिष्ठा भवति । ज्योतिरादीनां भूरादिरूपत्वादेतेषां त्रयाणामनुष्ठानेन सत्रिणो लोकत्रये प्रतिष्ठिताः सुखेन व्यवहरन्ति। पूर्वस्मिन्ननुवाके प्रथमदिनेऽनुष्ठेयः प्रायणीयाख्योऽतिरात्ररूपो ज्योतिष्टोमो विहितः । इह तु तृतीयदिनेऽनुष्ठेयोऽग्निष्टोमात्मको ज्योतिष्टोम इति विशेषः ।

तस्यैतस्याग्निष्टोमरूपस्य ज्योतिष्टोमस्य प्राथम्यं पूर्वोक्तातिरात्रवत्प्रशंसति—

ते सꣳस्तुता इति । ज्योतिष्टोमस्य स्तोत्रियागतसंख्यया विराट्संपत्तौ विराज ऊर्मूपत्वाच्चे सत्रिणः क्षुधा संपादितामार्तिं न प्राप्नुवन्ति । किं त्वक्षोधुकाः सर्वदा क्षुद्रहिता भवन्ति । सत्रिणामनुष्ठानप्रयासबाहुल्यात्प्रायेण ते क्षुत्संपादितबाधयुक्ता इव भवन्ति । तस्माच्चेषां क्षुत्परिहारायोर्मूपविराट्संपत्तियुक्तो ज्योतिष्टोम एव प्रथममनुष्ठेयः ।

इदानीमुक्तैर्ज्योतिरादिभिरनुलोमप्रतिलोमगतैर्निष्पन्नमभिप्लवं षडहं रथचक्ररूपकल्पन्या विधत्ते—

अग्निष्टोमावभित इति । लोके रथचक्रं फलकत्रयेण निष्पाद्यते । तत्र पार्श्ववर्तिनी फलके प्रधीइत्युच्येते । प्रकर्षेण धीयेते धार्येते मध्यफलकमाश्रयमिति प्रधी । मध्यफलकं तु नभ्यमित्युच्यते नाभिस्थानीयत्वात् । एवं च सत्यत्र चक्ररूपस्याभिप्लवषडहस्याभितो वर्तमानावाद्यन्तदिनयोरनुष्ठेयौ ज्योतिःशब्दाभिधेयौ यावग्निष्टोमौ तावुभौ प्रधी । ये च मध्यवर्तिनो गौरायुर्गौरित्येतन्नामान उक्थ्यरूपाश्चत्वारः कतवस्ते सर्वे मिलित्वा मध्ये स्थितं नभ्यं तद्भवति । तदेत-

(मासगताहकथनम्)

दभिप्लवषडहरूपं परियत्पुनः पवर्तमानं देवचक्रमित्युच्यते। यद्येतेन देवचक्ररूपेण षडहेन यजमाना अनुष्ठानं निष्पादयेयुस्तर्हि ते यजमाना देवचक्रमेव समारोहन्ति। तच्चाऽऽरोहणमरिष्टयै हिंसारहित्याय भवति। हिंसारहिताश्च ते स्वस्ति समश्नुवते क्षेमं प्राप्नुवन्ति।

पुनरपि षडहं प्रशंसति—

षडहेनेति। तस्य षडहस्यानुलोमप्रतिलोमरूपत्वहात्मकत्वं विधत्ते—

उभयतोज्योतिषेति। ज्योतिर्गौरायुरित्येवमानुलोम्ये सत्यादौ ज्योतिः, आयुर्गौर्ज्योतिरित्येवं प्रातिलोम्ये सत्यन्ते ज्योतिः। एवमुभयतोज्योतिषा षडहेनानुष्ठाने सति स्वर्गप्रवेशकाले फलावसानकाले च प्रतितिष्ठन्तोऽवज्ञारहिताः सन्तः संचरन्ति।

तस्य च षडहस्य द्विरावृत्तिं विधत्ते—

द्वौ षडहाविति। सक्थिशब्देन श्रोणीद्वयमुच्यते। बाहुशब्देनांसद्वयम्। आत्मा मध्यदेहः। शिरः प्रसिद्धम्। हस्तौ पादौ च मिलित्वा चत्वार्यङ्गानि। ततो द्वौ स्तनौ द्वादशसंख्यापूरकौ। तथा सत्येवं द्वादशाहानि पुरुषमनुसृत्य पर्यावृत्तानि भवन्ति।

तस्य च षडहस्य तृतीयामावृत्तिं विधत्ते—

त्रयः षडहा इति। पूर्वाभ्यां द्विरावृत्ताभ्यां सह त्रित्वम्। अष्टादशानामहर्नां द्वेधा विभागे सति नवसंख्यया नवच्छिद्रगतप्राणाननुसृत्य षडहास्त्रयः पर्यावृत्ता भवन्ति।

अथाऽऽक्षेपसमाधानमुखेन सर्वमासानुष्ठानं विधत्ते—

चत्वारः षडहा इति। संख्याद्वारेणार्धमासद्वारा संवत्सरमनुसृत्य चत्वारः षडहाः पर्यावृत्ता भवन्ति। अत्र मासपूरणाय पृष्ठ्यः षडहोऽभ्याहर्तव्यः। अत एव च्छन्दोगा आमनन्ति—'यदेष पृष्ठ्यः षडहो भवति वीर्य एवान्ततः प्रतितिष्ठन्ति' इति।

अथ पूर्वाभिस्तिसृभिरावृत्तिभिः सह चतुर्थीमावृत्तिं विधत्ते—

प्रतिष्ठितः संवत्सर इति। पूर्वोक्तन्यायेन मास एकः प्रतिष्ठितो न संवत्सरः, तस्योक्तप्रतिष्ठाहेतोर्मासाद्धर्मियस्त्वादत्यन्ताधिकत्वादित्येव केचिद्वोद्यवादिन आहुः। अत्रैतदुत्तरं—मासो ब्राह्मणं पूर्वोक्तरीत्या मासस्य प्रतिपादकं ब्राह्मणब्राह्यं यावदस्ति एतावदेव संवत्सरस्य प्रतिपादकं ब्राह्मणं, नात्रितोऽधिकं

(अश्वमेधाङ्गमन्त्रकथनम्)

किंचिदूनमस्ति । अनेनैव प्रकारेण प्रतिमासमनुतिष्ठन्तो यजमानास्तस्मिंस्तस्मिन्मासि प्रतितिष्ठन्तः क्रमेण संवत्सरं यन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृत्स्तोमैरवन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिꣳ हवामहे वसो मम (१) ॥

(मेषः षट्त्रिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

एकादशे संवत्सरगतेषु सर्वमासेष्वहानि विहितानि । अथावशिष्टेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते ।

क्रमः—'मेषस्त्वा पचतैरवत्विति पर्यग्नौ क्रियमाणेऽपाज्यानि जुहोति' इति ।

पाठः—

मेषस्त्वा पचतैरिति । अविजातो मुख्यः पुमान्यो मेषोऽस्ति तोऽयं पचतैर्हविष्पवेन पचनीयः क्षुद्रगोवादिभिः सह हेऽस्य त्वामवतु । एवमुत्तरेष्वपि मन्त्रेषु त्वामवत्वित्यनुषञ्जनीयम् । अजजातो योऽयं मुख्यो बस्तो लोहितग्रीवः तोऽयमन्यैश्छागैः सह त्वामवतु । शल्मलिरित्युन्नतो वृक्षविशेषः । स च स्वकीयया वृद्ध्या सह त्वामवतु । पर्णः पलाशवृक्षः । स च स्वाभिमानिना ब्रह्मणा

(अश्वमेधाङ्गमन्त्रकथनम्)

मन्थेन वा तह त्वामवतु । प्लक्षो यज्ञियेषु मुख्यो वृक्षः । स च मेधेन यज्ञेन तह त्वामवतु । न्यग्रोधश्चमसहेतुर्वृक्षः । स च स्वकार्यैश्चमसैः तह त्वामवतु । उदुम्बरः प्रतिष्ठः । स चोर्जा स्वकीयफलेन त्वामवतु । गायत्री चाग्नेयीछन्दो-भिः तह त्वामवतु । त्रिवृत्स्तोमश्चाग्नेयैः पञ्चदशादिस्तोमैः तह त्वामवतु। एतैर्मन्त्रैरभिमन्त्रैरेषाज्याख्या आहुतीर्जुहुयात् ।

कल्पः—' वा दक्षिणाम्केशपक्षानुद्ग्रथ्य सव्यान्मस्तस्य दक्षिणानूरुनाध्ना नाः स्त्रिभिरभिधूम्वत्यस्त्रिः प्रदक्षिणमग्निं धुवन्त्यः परियन्त्यवन्तीः स्थेति ' इति । अत्र पत्न्यन्दन राजपत्न्यः परामृश्यन्ते, तासां प्रकृतत्वात् । मृतमग्निं प्रति पत्नीभिः क्रियमाण एष उपचारः ।

पाठस्तु—

अवन्तीः स्थेति । ताः पत्न्यः परस्परं संबोध्य वदन्ति—हे राजपत्न्यो यूयमवन्तीः स्थाधस्य पालयित्र्यः स्थ । हेऽध त्वामवन्तीः पालयित्र्यः पत्न्योऽ-वन्तु रक्षन्तु । मम वसो वासयितस्तादृश हेऽध प्रियाणां मध्येऽतिप्रियं त्वां हवामह आह्वयामः । आप्यानां कामप्राप्तिहेतूनां मध्ये वर्षिष्ठमतिशयेन वृद्धं त्वां हवामहे । तथा निधीनां शङ्खपद्मादीनां मध्ये निधिपतिमत्यन्तमधिकस्य निधेः पालयितारं त्वां हवामहे ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-दीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके त्रयोदशोऽनुवाकः) ।

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विक-
र्यभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा
ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः
स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा
वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा हादुनीभ्यः
स्वाहा पुष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा

---

१ ख च. स्वकीयैश्च° । २ ख. °व्यान्विश्व° ।

(अश्वमेधाङ्गमन्त्रकथनम्)

स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्ध-
वीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः
स्वाहा (१) ॥

(कूप्याभ्यश्चत्वारिंशत्) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके त्रयदशोऽनुवाकः) ।

अपाम्यहोममन्त्रा द्वादशोऽभिहिताः । अथानुवाकद्वयेनापां होमा उच्यन्ते ।

तथा च ब्राह्मणम्—'कूप्याभ्यः स्वाहाऽद्भ्यः स्वाहेत्यपां होमाञ्जु-होति' इति ।

तत्र प्रथमानुवाकमन्त्रानाह—

कूप्याभ्यः स्वाहेति । कूपे भवाः कूप्या आपः । नदीपूरणेन कूले तीरे भवाः कूल्याः । विकरे भूविवरे भवा विकर्याः । अवटे गर्ते भवा अवट्याः । खननेन निष्पन्नाः खन्याः । ह्रदे भवा ह्रद्याः । सूदे पङ्के भवाः सूद्याः । सरसि भवाः सरस्याः । वेशन्ते भवा वैशन्त्यः । यत्र कूल्यादौ पुनः पुनरापो विशन्ति तत्रत्या इत्यर्थः । पल्वलेऽत्यल्पजलाशये भवाः पल्वल्याः । वर्षे भवा वर्ष्याः । वर्षनैरपेक्ष्येण भूमाववस्थिता अवर्ष्याः । प्रवाहध्वनिसहिता ह्रादुन्यः । अवश्यायजन्याः पृष्वाः । प्रवाहरूपाः स्यन्दमानाः । एकत्रावस्थिताः स्थावराः । नद्यां भवा नादेय्यः । सिन्धौ पुंनदे भवाः सैन्धव्यः । समुद्रे भवाः समुद्रियाः । अनुक्तसंग्रहार्थः सर्वशब्दः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके चतुर्दशोऽनुवाकः) ।

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवह-
न्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं

(अश्वमेधाहमन्त्रकथनम्)

वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा (१) ॥

(अद्भ्य एकान्न त्रिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः) ।

तस्मिन्नेवापां होमे द्वितीयानुवाकगतान्मन्त्रानाह—

अद्भ्यः स्वाहेति । उदकजातिमात्रयुक्ता आपः । प्रवाहरूपा वहन्त्यः । परिमण्डलरूपा आवर्तगताः परिवहन्त्यः । भूमेः समतलत्वेन सर्वतो गच्छन्त्यः समन्तं वहन्त्यः । निम्नाधिक्येन शीघ्रं वहन्त्यः । ईषन्निम्नत्वेन शीभं शोभनं यथा भवति तथा वहन्त्यः । पर्वताग्रादध उग्रं वहन्त्यः । दृश्यमानमकरादिजीवोपेता भीमं वहन्त्यः । अम्भोनभोमहःशब्दैर्लोकत्रयगता आप उच्यन्ते । 'अयं वै लोकोऽम्भाꣳसि' । 'अन्तरिक्षं वै नभाꣳसि' । 'असौ वै लोको महाꣳसि' इति ब्राह्मणेनोक्तत्वात् । पूर्वानुवाकोक्तैर्विंशतिमन्त्रैरेतदनुवाकोक्तैर्दशमन्त्रैश्च रात्रावग्नहोमाः कर्तव्याः । तेषामेव मन्त्रविशेषयुक्तोऽपां होम इति व्यवहारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके पञ्चदशोऽनुवाकः) ।

यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः ।
परो मर्तः परः श्वा । अहं च त्वं च वृत्रहन्त्सं बभूव सनिभ्य आ । अरातीवा चिदद्रिवोऽनु नौ

(अश्वमेधाङ्गमन्त्रकथनम्)

शूर मꣳसते भद्रा इन्द्रस्य रातयः । अभि क्रत्वेन्द्र-
भूरध ग्मन्न तें विव्यङ्महिमानꣳ रजाꣳसि ।
स्वेना हि वृत्रꣳ शर्वसा जघन्थ न शत्रुरन्तं वि-
विदद्युधा तें (१) ॥

(विविदद्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके पञ्चदशोऽनुवाकः) ।

पूर्वयोरनुवाकयोरपा होममन्त्रा उक्ताः । अथास्मिन्भ्रमहारोऽभिधीयते ।

कल्पः—' यो अर्वन्तमिति सैधकेन मुसलेन पौꣳश्चलेयः शुनः प्रहरति ' इति । पाठस्तु—

यो अर्वन्तमिति । योऽयं श्वा जले स्नप्यमानमर्वन्तं स्वयमपि जले प्रविश्य हन्तुमिच्छति तं श्वानं जलाधिपतिर्वरुणोऽभ्यमीति तर्वतो रोगग्रस्तं करोति ।

परो मर्त इति । कल्पः—'तमश्वस्याधस्पदमुपास्यति परो मर्तः परश्वेति' इति ।

परः श्वा प्रबलोऽयं श्वा परो मर्तोऽस्तु परस्ताद्गत्वा मृतो भवतु ।

कल्पः—'अहं च त्वं च वृत्रहन्निति ब्रह्मा यजमानस्य हस्तं गृह्णाति, इति ।

पाठस्तु—

अहं च त्वं चेति । हे वृत्रहन्वैरिहन्तृत्वेनेन्द्रसमान यजमान त्वं चाहं ब्रह्मा च सनिभ्यो बहुभ्यो लाभेभ्यो बहुविधद्रव्यलाभसिद्धय आ संभूव तर्वतः संमुक्तौ भवाव । हेऽद्रिवः पर्वतसदृशो वज्रोऽस्यास्तीत्यद्रिमानिन्द्रः, तत्सबुद्धिवांस्तद्रूप हे यजमान शूर शौर्योपेतेन्द्रस्य देवाधिपतेर्भद्रा रातयः कल्याणानि फलदानानि नावावामुभावनुमꣳसते, अनुमन्यन्तामङ्गीं कुर्वन्तु । कीदृशौ नौ, अरातीवा, रातिर्हविर्दानं तद्युक्तौ रातिमन्तौ तद्रहितावरातिमन्तौ, तावेवारातीवा, चिद्यद्यप्यावां हविर्दानरहितौ तथाऽपीन्द्रदत्तानि फलान्यावां प्रत्यागच्छन्तित्यर्थः ।

(अश्वमेधाङ्गमन्त्रकथनम्)

कल्पः—' अभि क्रत्वेन्द्र भूरध ग्मन्नित्यध्वर्युर्यजमानं वाचयति ' इति ।

पाठस्तु—

अभि क्रत्वेन्द्रेति । हे इन्द्र परमैश्वर्ययुक्त यजमान क्रत्वाऽनेन **क्रतुनाऽभिभूः** शत्रुमभिभूतवानसि । अधानन्तरं **ग्मन्नस्यां** भूमौ, नकारान्तस्य **ग्मन्शब्दस्य** भूमिनामसु पठितत्वात् । तस्या भूमौ ते स्वदीयं महिमानं **रजांसि** जगद्भूतानि **चरितानि** च न विव्यक्कश्चिदपि विवेक्तुं न समर्थः । **त्वं तु स्वेन शवसा** स्वकीयेन बलेन **वृत्रं** जघन्थ शत्रुं हतवानसि । स तु शत्रुर्**मृधा युद्धेन** तेऽन्तं त्वदीयं नाशं न विविदन्नेव लब्धवान् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽपञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके षोडशोऽनुवाकः) ।

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा (१) ॥

(नम एकान्नत्रिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके षोडशोऽनुवाकः) ।

पञ्चदशे शुनः प्रहारोऽभिहितः । षोडशे यज्ञाख्यो होमोऽभिधीयते ।

तथा च ब्राह्मणम्—' नमो राज्ञे नमो वरुणायेति यज्ञानि जुहोति ' इति ।

पाठस्तु—

नमो राज्ञ इति । राजा सोमः । इतरे प्रसिद्धाः । अधिपतिशब्देन धर्म-

देवतोच्यते । ' धर्मो वा अधिपतिः ' इति ब्राह्मणेनोक्तत्वात् । हे धर्मदेव त्वमधिपतिरसि मामप्यधिपतिं कुरु । त्वत्प्रसादादहं प्रजानामधिपतिर्भूयासम् । मां धेहि प्रजानामाधिपत्ये स्थापय । मयि च ताः प्रजाः पालनीयत्वेन स्थापय । तैरेतैः षड्भिर्मन्त्रनामकैरन्नहोमाञ्जुहुयात् । उपाकृतायेत्यादिमन्त्राणां त्रयाणां कालविशेषे होमो ब्राह्मणे श्रूयते—' उपाकृताय स्वाहेत्युपाकृते जुहोति । आलब्धाय स्वाहेति नियुक्ते जुहोति । हुताय स्वाहेति हुते जुहोति ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठक सप्तदशोऽनुवाकः) ।

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड । याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद । या अङ्गिरस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ । या देवेषु तनुवमैरयन्त यासाꣳ सोमो विश्वा रूपाणि वेद । ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र (१) गोष्ठे रिरीहि । प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः । शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सꣳ सदेम । इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमू षु सुत्रामाणम् (२) ॥

(इन्द्राष्टात्रिꣳशच्च) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके सप्तदशोऽनुवाकः)।

षोडशे यव्यारूयो होमोऽभिहितः। सप्तदशे गव्यारूयैर्मन्त्रैर्होमोऽभिधीयते।

तथाच ब्राह्मणम्—'मयोभूर्वातो अभि वातूस्रा इति गव्यानि जुहोति' इति।

तत्र प्रथमामाह—

मयोभूर्वात इति। मयोभूः सुखस्य भावयिता वातो वायुरूस्रा अभिसर्वा गा अभिलक्ष्य वातु असरतु, अतिवातेनोपद्रवं मा करोतु, किंतु मन्दवातेन गवां सुखं यथा भवति तथा वातु। एताश्च गाव ऊर्जस्वती रसयुक्ता ओषधीरारिशन्तामा स्वादयन्तु। जीवरूप धनं जीवधनं प्राणिजातमित्यर्थः। तदर्हन्तीति जीवधन्याः पातु योग्या आपस्ताश्च पीवस्वत्यः पानेन पुष्टिरूपस्य स्थौल्यस्य प्रापणात्तादृशीरपो गावः पिबन्तु। हे रुद्रावसायाविंतुं रक्षितुं योग्याय पद्वते पादसंचारिणे पशवे मृड सुखं कुरु।

अथ द्वितीयामाह—

याः सरूपा इति। या गावः सरूपाः समानप्रमाणदेहा विरूपा विविधवर्णा एकरूपा एकजातियुक्ताः, अग्निराहवनीयादिरूप इष्ट्या यागेन निमित्तभूतेन यासां गवां नामानि सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मेत्यादीनि, इडे रन्तेऽदित इत्यादीनि वा श्रुत्युक्तानि वेद जानाति, अङ्गिरसो महर्षयस्तपसा स्वकीयेन तपःसामर्थ्येन या गा इह भूमौ चक्रुः स्थापितवन्तः, हे पर्जन्य जलदेवताभ्यो गोभ्यो महि शर्म यच्छ महत्सुखं देहि।

अथ तृतीयामाह—

या देवेष्विति। या गावो देवेषु निमित्तभूतेषु तनुवं शरीरमैरयन्त भूमौ प्रवर्तितवत्यः, सोमो देवो यासां गवां विश्वा रूपाणि शुक्लकृष्णादीनि बहुक्षीराल्पक्षीरादीनि च सर्वाणि रूपाणि वेद जानाति, हे इन्द्र पयसा पिन्वमानाः स्वकीयेन क्षीरेण प्राणिजातं प्रीणयन्तीः प्रजावतीर्बहुवत्सोपेतास्ता गा अस्मभ्यमस्मदर्थं गोष्ठे रिरीहि गोशालायां प्रापय।

अथ चतुर्थीमाह---

प्रजापतिरिति । यः प्रजापतिः सोऽयं मह्यं यजमानायैता उक्तलक्षणा गा रराणः प्रयच्छन्विश्वैः सर्वैर्देवैः पितृभिश्च संविदान ऐकमत्यं गतस्ताः शिवाः सतीर्बहुक्षीरादिप्रदानेन कल्याणरूपाः सतीरेता गा नो गोष्ठमस्मदीयगोशालामुपाकरुपाकरोतु प्रापयत्वित्यर्थः । वयं तासां गवां प्रजया वत्सरूपया संसदेम संगतास्तिष्ठामः (ष्ठेम) ।

अथ चत्वारि यजूंष्याह---

इह धृतिः स्वाहेति । एतानि च विभूर्मात्रेत्यनुवाकेऽश्वस्य पादचतुष्टयस्थानविषयत्वेन व्याख्यातानि ।

अथ द्वयोर्ऋचोः प्रतीके दर्शयति-

महीमिति । एतच्चोभयं वैश्वानरो न ऊत्येत्यत्र व्याख्यातम् । एतैर्दशभिर्गव्याख्यैर्मन्त्रैरन्नहोमाञ्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः) ।

किꣳ स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः । किꣳ स्विदासीत्पिशङ्गिला किꣳ स्विदासीत्पिलिप्पिला । द्यौरासीत्पूर्वचित्तिरश्व आसीदबृहद्वयः । रात्रिरासीत्पिशङ्गिलाऽविरासीत्पिलिप्पिला । कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महत् । सूर्य एकाकी चरति (१) चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् । पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा

(अश्वमेधाङ्गमन्त्रकथनम्)

वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम।
वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम्। सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम (२)॥

(सूर्य एकाकी चरति षट्चत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः)।

सप्तदशे गव्यारूयहोम उक्तः। अष्टादशे ब्रह्मोद्यमुच्यते।

कल्पः—'अभितोऽग्निष्टं ब्रह्मोद्याय पर्युपविशेते दक्षिणो ब्रह्मोत्तरो होता किꣳ स्विदासीत्पूर्वचित्तिरित्येतस्यानुवाकस्य पृष्टानि होतुः प्रतिज्ञातानि ब्रह्मणः' इति।

एकविंशतियूपेषु मध्यवर्ती यूपोऽग्निष्टः। ब्राह्मणयोरुक्तिप्रत्युक्तिरूपेण संवादो ब्रह्मोद्यम्। पृष्टानि प्रश्नवाक्यानि। प्रतिज्ञातानि प्रत्युत्तरवाक्यानि(णि)।

तस्मिन्ब्रह्मोद्ये पृष्टामृचमाह—

किꣳ स्विदासीदिति। हे ब्रह्मन्पूर्वचित्तिः किं स्विदासीत्। चित्तिर्ज्ञानम्। पूर्वं(र्वं) चित्तिर्जन्मप्रभृति ज्ञानमुत्पन्नानां यस्यां विद्यते सा पूर्वचित्तिः। तादृशं(श)ज्ञानं किं नामाऽऽसीदित्यर्थः। सोऽयमेको होतुः प्रश्नः। कान्त्यर्थाद्दीधातोर्वय(यः)शब्दनिष्पत्तिः। अत्यन्त कमनीयं यस्तु किं नामाऽऽसीदिति द्वितीयः प्रश्नः। पिशङ्गिला मिश्रवर्णा किं नामाऽऽसीदिति तृतीयः प्रश्नः। पिलिप्पिलात्यन्त प्रकाशमाना श्वेता किं नामाऽऽसीदिति चतुर्थः प्रश्नः। सामान्याभिप्रायेण किमिति नपुंसकनिर्देशः।

अथ द्वितीयामाह—

द्यौरासीदिति। तान्येतानि ब्रह्मण उत्तराणि। येयं द्यौः सैव पूर्वचित्तिः। पूर्वप्रवृत्त हि ज्ञान तत्रास्ति, तत्रत्यानां देवाना जन्मप्रभृतिज्ञानोपेतत्वात्। तदिदं प्रथममुत्तरम्। अश्वोऽत्यन्त कमनीयं वस्तु। अत एव हि राजानः सर्वप्रयत्नेनाप्यश्वान्संपादयन्ति। तदिद द्वितीयमुत्तरम्। रात्रिर्मिश्रवर्णाऽन्धकारस्य नक्षत्र-

(अश्वमेधाङ्गमन्त्रकथनम्)

चन्द्रमकाशस्य च विद्यमानत्वात् । तदिदं तृतीयमुत्तरम् । अश्नुते सर्वं प्राणिजातमिति श्रीरविः । सैवातिप्रकाशा । अत एव ब्राह्मणे ' श्रीर्वै पिलिप्पिला ' इत्याख्यातम् ।

अथ तृतीयामाह—

व एते होतुः प्रश्नाः । को नामात्र लोके सहायान्तरनिरपेक्ष आलस्यरहितः सर्वदा चरति । को नाम पुनः पुनः शुक्लपक्षे जायते । किं नाम वस्तु शैत्यलक्षणस्योपद्रवस्यौषधम् । किं नाम स्थानं बहूनां बीजानामावापायोपयुक्तं विशालम् ।

अथ चतुर्थीमाह—

सूर्य एकाकीति । तान्येतानि ब्रह्मण उत्तराणि स्पष्टार्थानि ।

अथ पञ्चमीमाह—

पृच्छामि त्वेति । होतुः प्रश्नाः । हे ब्रह्मंस्त्वां पृथिव्याः परमन्तं पृच्छामि । यतः परमुत्कृष्टप्रदेशोऽन्यो नास्ति सोऽयं परोऽन्तः । तथा चक्रस्य नाभिरिव सर्वस्य भुवनस्य नाभिस्थानीयं वस्तु पृच्छामि । तथा वृष्णः पुंस्त्वाधिक्यस्याश्वस्य रेतस्थानीयं सारं वस्तु पृच्छामि । तथेवाक्षरात्मिकाया वाचः परमं व्योम विशेषेण रक्षक स्वरूपं वस्तु पृच्छामि ।

अथ षष्ठीमाह—

वेदिमाहुरिति । तान्येतानि ब्रह्मण उत्तराणि । येयं यागे वेदिस्तामेव पृथिव्याः परमन्तं याज्ञिका आहुः । नहि वेद्या अधिकः कश्चिद्भूप्रदेशोऽस्ति । अत एव हि सोमप्रकरणे श्रुतम्—' एतावती वै पृथिवी । यावती वेदिः ' । इति । तथा यज्ञं सर्वस्य लोकस्य नाभिस्थानीयमाहुः । यथा नाभिमाश्रित्य सर्वं चक्रं परिवर्तते तथा यज्ञाधीनः सर्वेषां प्राणिनामिहलोकपरलोकसंचारः । तथाऽश्वस्य रेतोवदत्यन्तं सारभूतः सोमः । अश्वमेधेन हि त्रिरात्रेण यागेन ब्रह्महत्यादिकं सर्वं निवर्तते । यदेतन्मन्त्रसघातरूपं ब्रह्म तदेतदक्षरात्मिकाया वाचः परमं व्योम । तेन हि मन्त्रजातेन प्राणिनो विशेषेण रक्ष्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमाष्टके चतुर्थप्रपाठक एकोनविंशोऽनुवाकः।

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वकः। सुभगे काम्पीलवासिनि सुवर्गे लोके सं प्रोर्णवावहै। आऽहमजानि गर्भधमा त्वमजासि गर्भधम। तो सह चतुरः पदः सं प्र सारयावहै। वृषा वाꣳ रेतोधा रेतो दधातूत्सक्थ्यो-र्गुदं धेह्यञ्जिमुदञ्जिमन्वञ्ज। यः स्त्रीणा जीवभो-जनो य आसासू (१) बिलधावनः। प्रियः स्त्रीणामपीच्यः। य आसा कृष्णे लक्ष्मणि सर्दि-गृदिं परावधीत्। अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः। उर्व्वामेनामुच्छ-यताद्वेणुभारं गिराविव। अथास्या मध्यमेधताꣳ शीते वाते पुनर्निव। अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः। यद्धारिणी यवमत्ति न (२) पुꣳ पशु मन्यते। शूद्रा यदर्य-जारा न पोषाय धनायति। अम्बे अम्बाल्यम्बि-के न मा यभति कश्चन। ससस्त्यश्वकः। इयं यका शकुन्तिकाऽऽहलमिति सर्पति। आहतं गभे पसो नि जल्गुलीते धाणिका। अम्बे अ-म्बाल्यम्बिके न मा यभति कश्चन। ससस्त्य-श्वकः। माता च ते पिता च तऽग्रे वृक्षस्य रो-हतः (३)। प्र सुलामीति ते पिता गभे मुष्टि-मतꣳसयत्। दधिक्राव्णो अकारिषं जिष्णोर-श्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण

(अश्वनेवाङ्गमन्त्रकथनम्)

आयूꣳषि तारिषत् । आपो हि ष्ठा मयोभुवस्ता
न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः
शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव
मातरः । तस्मा अरं गमाम वो यस्य क्षयाय
जिन्वथ । आपो जनयथा च नः (४) ॥

(आसामग्ने न रोहतो जिन्वथ चत्वारि च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकोनविंशोऽनुवाकः) ।

अष्टादशे ब्रह्मोद्यमुक्तम् । अथैकोनविंशे राजपत्नीना विलापरूपो मृताश्वोपचारोऽभिधीयते ।

कल्पः—' अम्बे अम्बाल्यम्बिक इति प्रतिप्रस्थाता पत्नीरुदानयति ' इति ।

तत्र पाठस्तु—

अम्बे अम्बालीति । उत्तमा मध्यमाऽधमा चेत्यं त्रिविधा राजपत्न्यः । तासुत्तमाभिर्मातृवाचकैः पदैः प्रतिप्रस्थात्रा संबोध्यन्ते । एवं संबोध्याऽऽहूतानां तिसृणा मध्ये प्रधानभूता महिष्युत्तरं वक्ति—कश्चिदपि पुमान्मां भोगार्थं रहसि नैव नयति । एषोऽश्वकः ससस्ति निद्रां करोति । भोगाभावदुःखेनैवैनं गर्हते । गर्हार्थोऽयं कप्रत्ययः । कुत्सितोऽश्व इत्यर्थः ।

कल्पः—' सुभगे काम्पीलवासिनीति क्षौमेण वाससाऽश्वयुर्मंहिषीमधं च प्रच्छाद्य ' इति । पाठस्तु—

सुभगे काम्पीलेति । हे सुभगे शोभनभगे महिषि हे काम्पीलवासिनि, काम्पीलशब्देन श्लाघ्यो वस्त्रविशेष उच्यते । तं वस्त्र आच्छादयतीति काम्पीलवासिनी तादृशे, त्वमयमश्वोभौ सुवर्गे लोके स्वर्गसदृशेऽस्मिन्स्थाने संप्रोर्णवाथामिदं क्षौमं वस्त्र सम्यगाच्छादयतम् । आच्छाद्यमाना च तेनाश्वेन सहैवं ब्रूहि—हेऽश्व गर्भधं गर्भधारिणं त्वामहं महिष्याजान्याभिमुख्येन प्रापयानि । त्वमपि गर्भधं गर्भधात्रीं मामाजास्याभिमुख्येन प्राप्नुहि ।

(अश्वमेधाङ्गमन्त्रकथनम्)

तौ सहेति । कल्पः—' तौ सह चतुरः पदः संप्रसारयावहा इति पदः संप्रसारयेते ' इति । हेऽश्व यस्त्वं या चाहं महिषी तावावामुभौ मदीयं पादद्वयं त्वदीयं पश्चाद्भागवर्ति पादद्वयमित्येवं चतुरः पादान्संप्रसारयावहै संगताः परस्परं भिन्ना यथा भवन्ति तथा मस्तूनाकरवाव ।

कल्पः—' वृषा वामित्यभिमन्त्रयते ' इति ।

पाठस्तु—

वृषा वामिति । वां युवयोर्मध्ये वृषा सेवकोऽश्वः तिग्मशृङ्गित्यश्वाग्रः । रेतोधा वीर्यधारिणी त्वदीयं रेतो धारयतु ।

कल्पः—' उत्सक्थ्योर्गृदं धेहीति प्रजनने प्रजननꣳ संनिधाय ' इति ।

पाठस्तु—

उत्सक्थ्योरिति । हेऽश्व गृदं त्वदीयगुदसमीपवर्तिनं पाश्चात्यं भागं सक्थ्योर्महिषीसंबन्धिनोरूर्वोरुद्धेहि ऊर्ध्वं स्थापय । अज्यते स्त्रीत्वमभिव्यज्यतेऽनेनेत्यञ्जिर्योनिः । तथा पुंस्त्वमभिव्यज्यतेऽनेनेति मेढोऽप्यञ्जिः । सर्वोन्नतश्चासावञ्जिर्मेढ्युदञ्जिः । हेऽश्व महिषीसंबन्धमञ्जिमनुलक्ष्य त्वदीयमुदञ्जिमज प्रेरय । कीदृश उदञ्जिः, जीवात्मना भुज्यते प्रीतिपूर्वकमनुभूयत इति जीवभोजनो य उदञ्जिः स्त्रीणा जीवभोजनः, स्त्रीजीवो ह्यस्मिन्नुदञ्जौ प्रीतिमनुभवति । यश्चोदञ्जिरासां स्त्रीणा बिलधावनो बिलं योनिं प्रति धावति सहसा प्रविशतीति बिलधावनः । किंचायमुदञ्जिः स्त्रीणा प्रियः सन्नपीच्यो भवति, अपीच्यतेऽत्यादरेण प्राप्यत इत्यपीच्यः । यश्चोदञ्जिरासा स्त्रीणा कृष्णे लक्ष्मणि यत्कृष्णवर्णमसावारणं लक्षणभूतं स्त्रीव्यञ्जनं तस्मिन्तार्दिगृदिं शुक्रपातस्थानविशेषं पराबधीद्देगेन ताडयामास । येन ताडनेन शुक्रपातो भवति तत्करोति । अन्तर्बहिःप्रदेशभेदेन स्थानत्रयं स्त्रीव्यञ्जनं विद्यते । अत एवान्यत्राऽऽम्नातम्—' त्रिवृत्प्रजननम् । उपस्थो योनिर्मध्यमा ' इति । तत्र येयं मध्यमा गर्भधारिणी सा तार्दिगृदिः ।

कल्पः—' अम्बे अम्बाल्यम्बिक इति महिष्यर्थं गर्हते ' इति ।

पाठस्तु—

अम्बे अम्बालीति । सा महिषी भोगाभावदुःखेन विलपन्ती स्वदुःखसंज्ञापनाय स्वकीयां मातरं त्रिः संबोध्य स्वदुःखं कथयति । लोके ह्यतिनिहिता माता स्वकीयापदेशायां संबोध्यते । बाल्ये मातुरेव सर्वापत्तिनिवारकत्वेन तस्यां

बोधनस्य पठितत्वादन्यद्राऽपि तत्संबोधनमेव सहसा जिह्वायामायाति । 'तां संबोध्यैवं ब्रूते—रिरंसुं मां कोऽपि न यमति । अयमधकस्तु निद्राति ।

कल्पः—' ऊर्ध्वामेनामुच्छ्रयतादिति पत्नयोऽभिमेधन्ते ' इति ।

पाठस्तु—

ऊर्ध्वामेनामिति । स्वदुःखख्यापनार्थमम्बादिशब्दैर्मातरं संबोधयन्तीमेनां महिषीं प्रति वस्त्राच्छादनाद्बहिरेव स्थिता इतरा राजपत्न्यो बुद्धिप्रदानं कुर्वन्ति—हे महिषि एनां त्वदीया योनिमूर्ध्वामुच्छ्रयतादूर्ध्वाभिमुखं कृत्वोन्नतामवस्थापय। तत्र दृष्टान्तः—यथा लोके कश्चिद्वैरी वेणून्खण्डयित्वा स्वगृहे नेतुं प्रौढभारमारोप्य प्रथमं भूमावूर्ध्वमुच्छ्रयति तद्वदेनामुच्छ्रय । अथोच्छ्रयणानन्तरमस्या योनेर्मेध्यस्थानमेधता स्वाभिमतप्राप्त्याऽभिवर्धताम् । वृद्धिरत्र हर्षविशेषः । तत्र हर्षे दृष्टान्तः—' शीते वाते पुनन्निव ' । यथा लोके कश्चित्खलपूरुहूतेन शूर्पेण धान्यं पुनन्व्यापारबाहुल्येन श्रान्तः स्विन्नगात्रः शीते वाते प्रवृत्ते सति हृष्यति तद्वत् ।

कल्पः—' त्रिर्महिष्यधं गर्हते त्रिः पत्नयोऽभिमेधन्त उत्तरोत्तरयर्चा ' इति ।

तत्र प्रथमां गर्हार्थामृचमाह—

अम्बे अम्बालीति । अथ प्रथमामभिमेधनार्थामृचमाह—

यद्धरिणीति । यद्यदा कदाचिद्धरिणी मृगी रात्रौ समागत्य क्षेत्रे फलितं यवं भक्षयति, तत्र क्षेत्रे भक्षयित्वा पुनरप्यरण्ये गतं पशुं पुष्टमपि न मन्यते न जानाति । हे महिषि तथा त्वमपि देवतारूपेण त्वामनुभूयान्तर्हितमधं न जानासि । भोगस्तु तव जात एवेति पत्नीनामभिप्रायः । किं च यद्यदा शूद्रा काचिद्दासी कदाचिदर्थः स्वकीयः स्वामी जारो यस्याः सेयमर्थजारा भवति, तदानीं सा दासी स्वामिस्वीकारमात्रेणात्यन्तं हृष्यति, न तु स्वकीयकुटुम्बपोषाय धनायाति धनमात्मन इच्छति । नहि स्वामिस्वीकाराद्धनमधिकं मन्यते । तथा मनुष्यशरीरा त्वमपि देवतारूपस्याश्वस्य स्वीकारादेव परितुष्टा भव, नतु तुच्छमिमं मानुषं भोगमपेक्षस्वेत्यभिप्रायः ।

अथ द्वितीया गर्हार्थामृचमाह—

अम्बे अम्बालीति । अथाभिमेधनार्थां द्वितीयामृचमाह—

इयं यकेति । इयं प्रत्यक्षतो दृश्यमाना यका शकुन्तिका या काचित्पक्षिणी विद्यते । आहलशब्दः पक्षिध्वनेरनुकरणम् । इत्येतादृशं शब्दं कुर्वती

(अश्वमेधाङ्गमन्त्रकथनम्)

सा शकुन्तिका सर्पति पुमांसं पक्षिणं पृष्ठतो गच्छति, न तृप्ता क्वचिदवतिष्ठते। हे महिषि एवं त्वमपि न तृप्यसि, तदेतदयुक्तमित्यभिप्रायः। किंच धाणिका गर्भस्य धारयित्री योषिद्भग आहतं पसो निजल्गुलीति। गभशब्दे पसशब्दे च वर्णव्यत्ययो द्रष्टव्यः तथा सति योनिं सपजन्यं रेतश्च शब्दद्वयेनाभिधीयते। निजल्गुलीति निगिरति। यथा लोके गर्भधारिणी स्त्री योनावाहितं रेतो निगिरति गर्भरूपेणान्तर्धृत्वा संतुष्यति एवं त्वमपि देवतारूपाश्वस्वीकारेण संतोष्टुमर्हसीत्यभिप्रायः।

अथ गर्हार्थां तृतीयामृचमाह—

अम्बे अम्बालीति। अथाभिमेधनार्थां तृतीयामृचमाह—

माता च ते पितेति। हे महिषि ते तव या माता तथा तव यः पिता तावुभावपि वृक्षस्याग्रं वृक्षस्य कस्यचिच्छाखया निर्मितं तल्पं रोहत आरुह्य शयाते तदानीं ते पिता प्रसुलापि प्रवेशयामीत्येवमुक्त्वा गभे योनौ मुष्टिं मुष्टिसदृशं मेढ्रमतंसयत्प्रावेशयत्। एवमयमप्यश्वश्चकार। अतो हे महिषि त्वमुत्तिष्ठेत्यभिप्रायः।

कल्पः—' दधिक्राव्णो अकारिषमिति सर्वाः सुरभिमतीमृचमन्ततो जपित्वा ' इति।

पाठस्तु—

दधिक्राव्ण इति। दधि क्रामति प्राप्नोतीति दधिक्रावा। एतन्नामको दधिप्रियः कश्चिद्देवविशेषः। अग्निरित्यन्ये। तस्य देवस्याकारिषमहं कर्म कृतवानस्मि। कीदृशस्य, जिष्णोर्जयशीलस्याश्वस्य व्यापिनो वाजिनोऽन्नवतः। स देवो नोऽस्माकं मुखं सुरभि करत्कर्पूरादिद्रव्यसमृद्धिप्रदानेन सुगन्धोपेतं करोत्वस्माकमायूंषि च प्रतारिषत्प्रवर्धयतु।

कल्पः—' आपो हि ष्ठा मयोभुव इति तिसृभिर्मार्जयित्वा ' इति।

तत्र प्रथमामाह—

आपो हि ष्ठेति। हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा। हे आपो यूयमेव मयोभुवः स्थ सुखस्य भावयित्र्यो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातन, अस्मान्परतत्त्वसाक्षात्कारयोग्यान्कुरुतेत्यर्थः।

(अश्वमेधाङ्गमन्त्रकथनम्)

अथ द्वितीयामाह—

यो वः शिवतम इति । वो युष्माकं शिवतमः शान्ततमः सुखैकहेतुर्वो रसोऽस्ति, इहास्मिन्कर्मणि नोऽस्मांस्तस्य भाजयत तं रसं प्रापयत । तत्र दृष्टान्तः—उशतीरिव मातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयं स्तन्यरसं प्रापयन्ति तद्वदित्यर्थः ।

अथ तृतीयामाह—

तस्मा अरमिति । यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ, तस्मै रसाय वो युष्मानलं भृशं प्राप्नुमः । किंच हे आपो यूयं नोऽस्माञ्जनयथ प्रजोत्पादकान्कुरुथ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके विंशोऽनुवाकः) ।

मूर्भुवः सुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतꣳ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः । लाजीꣳश्छाचीꣳश्शो ममाꣳम् । यज्ञायैं गव्यायै एतद्देवा अन्नमत्तेतदन्नमद्धि प्रजापते । युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः॥ रोचन्ते रोचना दिवि । युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा । केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः (१) ॥

(ब्रध्नं पञ्चविꣳशतिश्च) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके विंशोऽनुवाकः)।

एकोनविंशेऽश्वस्य मरणोत्तरकालीन उपचारोऽभिहितः। विंशे तु पूर्वकालीन उपचारोऽभिधीयते।

भूर्भुवः सुवरिति। कल्पः—' पत्नयोऽश्वमलंकुर्वन्ति महिषी वावाता परिवृक्तीति शतꣳ शतमेकैकस्याः सचिवा राजपुत्रीर्धात्रीश्चोग्राणामराज्ञां सूतग्रामण्या इति सहस्रꣳ सहस्रं मणयः सु(सौ)वर्णर(रा)जतसामुद्रा वालेषु मणीनाबध्नन्ति भूरिति सौवर्णान्महिषी प्रोग्वहाद्भुव इति राजतान्वावाता प्रत्यग्वहात्याक्स्रोणेः सुवरिति सामुद्रान्परिवृक्ती प्रत्यक्स्रोणेः ' इति।

अत्रोक्ता भूर्भुवः सुवरित्येतास्तिस्रो व्याहृतयो लोकत्रयवाचिन्यः। तथा सति सौवर्णराजतशङ्खमणयः क्रमेण भूम्यादिलोकत्रयरूपा इति सूत्राणामर्थः। तैरेतैर्मन्त्रैर्मुखमध्यपाश्चात्यभागेषु महिषी वावाता परिवृक्त्याख्या उत्तममध्यमाधमा राजपत्न्योऽश्वस्य केशेषु मणीन्योजयेयुः।

कल्पः—' अथाँस्य स्वदेशानाज्येनाभ्यञ्जन्ति वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसेति गौल्गुलवेन महिषी रुद्रा इति कौसुम्भेन वावाताऽऽदित्या इति मुस्ताकवेन परिवृक्ती ' इति।

पाठस्तु—

वसवस्त्वेति। हेऽश्वाष्टौ वसवो गायत्रेण च्छन्दसा युक्ता गुग्गुलुजन्येन तैलेन मुखभागे त्वामञ्जन्तु। एकादश रुद्राः कुसुम्भजन्येन तैलेन त्वां मध्यभागे त्रिष्टुप्छन्दोयुक्ता अञ्जन्तु। द्वादशाऽऽदित्या जागतच्छन्दोयुक्ता मुस्तामूलजन्येन तैलेन पाश्चात्यभागे त्वामञ्जन्तु। एतदेव तैलं सूत्र आज्यशब्देन व्यवहृतम्।

कल्पः—' यदावो अपो अगमदिति प्रदक्षिणमावर्तते यतः प्रयाति तदवभृथे ' इति।

---

१ ख. °त्रीर्दाराश्चो°। २ च. °र्धात्र्यश्चो°। ३ ख. °ग्राणां रा°। ४ ख. °द्रान्वाळे°। ५ ख प्राग्वाहा°। ६ ख. °त्यग्वाहा°। ७ ख. °थाश्वस्य देहाना.। ८ ख. °तैयते।

रथयुक्तोऽयमश्वो यतो रथशालायाः प्रयातः पुनः प्रादक्षिण्येनाऽऽवृत्तस्तस्या-मेव रथशालायामवतिष्ठते ।

पाठस्तु—

यद्वातो अप इति । यद्येन पथा पुरा वातो वायुरपो जलानीन्द्रस्य प्रियां तनुवं पर्जन्यरूपामगमत्प्रापयत् । हे स्तोतः स्तुतिकर्तस्त्वमश्वप्रेरणार्थं शब्दं कुर्वन्नेतेन पूर्वसिद्धेन पथा मार्गेणैतमश्वं नोऽस्मान्प्रत्यावर्तयास्यावृत्तं कुरु ।

कल्पः—' लाजी३ऽच्छाची३न्यशो ममा३मिति पत्नयोऽध्वर्यवान्नपरिशेषानु-पयन्ति ' इति ।

पाठस्तु—

लाजी३ऽच्छाचीःइति । रात्रौ यैर्दर्शभिरन्नैर्होमाः कृतास्तदन्नशेषेषु लाजा अपि विद्यन्ते, तानयमश्वो भक्षयति । अतो लाजा अस्य सन्तीति लाजी । भक्षयितुं शक्या अन्नविशेषाः शाचास्ता अस्य सन्तीति शाची । अश्वो हि स्वामिनो यशः कीर्तिं संपादयति, तद्विवक्षया यशो ममेति वाक्यमे-तन्नामत्वेन प्रयुज्यते । तैरेतैर्लाज्यादिभिस्त्रिभिर्नामभिरश्वं संबोध्य तिस्रः पत्न्य आह्वयन्ति । दूरादाह्वातुमेते प्लुताः । एवं सबोध्याश्वशरीरगतान्देवान्प्रत्येवं ब्रुवते—हे देवा एतदन्नमस्माभिर्दीयमानमश्वरूपेणात्त भक्षयत । हे प्रजापते देव-स्वामिंस्त्वमप्येतदन्नमद्धि भक्षय ।

कल्पः—' युञ्जन्ति ब्रध्नमिति दक्षिणस्यां युगधुर्यं तमश्वं युनक्ति ' इति ।

पाठस्तु—

युञ्जन्ति ब्रध्नमिति । ब्रध्नमादित्यरूपमरुषमग्निरूपं चरन्तं वायुरूपमिम-मश्वं तथा परितस्थुषः परितोऽवस्थितांस्त्रींल्लोकानेतदश्वस्य(स्व)रूपान्युञ्जन्ति देवाः सर्वे रथे योजयन्ति । तथा दिवि द्युलोके वर्तमानानि रोचना प्रकाश-रूपाणि नक्षत्राणि रोचन्तेऽश्वमेतं प्रकाशयन्ति । अयमर्थः सर्वोऽपि ब्राह्मणे स्पष्टमुच्यते—' असौ वा आदित्यो ब्रध्नः । अग्निर्वा अरुषः । वायुर्वै चरन् । इमे वै लोकाः परितस्थुषः । नक्षत्राणि वै रोचना दिवि ' इति ।

कल्पः—' युञ्जन्त्यस्य काम्येनि प्रष्टी ' इति ।

तस्याश्वस्य सहायभूतावितरौ द्वावश्वौ युनक्ति ।

पाठस्तु—

युञ्जन्त्यस्येति । अस्याश्वस्य सहायभूतौ हरी द्वावश्वौ युञ्जन्ति देवा रथे

(अश्वमेधाङ्गमन्त्रकथनम्)

योजयन्ति। कीदृशा हरी, काम्या कमनीयौ, विपक्षसा विशेषेण पक्षे रथस्य पार्श्वे वर्तमानौ, शोणेषलोहितौ, धृष्णू शत्रुधर्षणक्षमौ, नृवाहसा मनुष्यवाहिनौ।

कल्पः—'केतुं कृण्वन्नकेतव इति रथे ध्वजमुपगूहति' इति।

पाठस्तु—

केतुं कृण्वन्निति। मर्या मनुष्या अकेतवे पूर्वं ध्वजरहिताय रथाय केतुं कृण्वन्ध्वजं कुर्वन्तु। अपेशसे सुवर्णालंकाररहिताय रथाय पेशः सुवर्णालंकारं कुर्वन्तु। हे रथ त्वमुषद्भिर्ज्वालासदृशैः सुवर्णरश्मिभिः समजायथाः संगतो जातोऽसि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके विंशोऽनुवाकः॥ २०॥

(अथ सप्तमाष्टके चतुर्थप्रपाठक एकविंशोऽनुवाकः)।

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा सर्वेभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१)॥

(प्राणायाष्टाविंशतिः)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठक एकविंशोऽनुवाकः॥ २१॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकविंशोऽनुवाकः)।

विंशेऽनुवाके जीवतोऽश्वस्योपचार उक्तः। एकविंशे त्वन्नहोमशेषोऽभिधीयते। तथा च ब्राह्मणम्—'प्राणाय स्वाहा व्यानाय स्वाहेति संततिहोमाञ्जुहोति' इति।

पाठस्तु—

(अश्वमेधाङ्गमन्त्रकथनम्)

प्राणाय स्वाहेति । स्नावसूत्पन्नाः शाखा नाड्यः संतानाः । तासूत्पन्ना उपशाखा नाड्यः परिसंतानाः । एतैश्चतुर्दशभिर्मन्त्रैरग्नहोमेषु संतत्यार्थं होमं कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वाविंशोऽनुवाकः) ।

सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वश्चते स्वाहा परिवश्चते स्वाहा संवश्चते स्वाहाऽनुवश्चते स्वाहोद्वश्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा (३) ॥

(सितायाष्टात्रिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

बृहस्पतिः श्रद्यथा वा कृक्षा वै प्रजापतिर्यज्ञेन द्वे वावाऽऽदित्या वसिष्ठः संवत्सरायं सुवर्गं ब्रह्मवादिनो ज्योतिष्टोमं मेषः कूर्म्याम्योऽद्भ्यो यो अर्वन्तं नमो राज्ञे मयोभूः किꣳ स्विदम्बे भूः प्राणायं सिताय द्वाविꣳशतिः ॥ २२ ॥

बृहस्पतिः पतिं तिष्ठन्ति वै दशरात्रेण सुवर्गं यो अर्वन्तं भूस्त्रिपञ्चाशत् ॥ ५३ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः)।

अथ द्वाविंशोऽन्नहोमेष्वेव प्रमुक्त्याख्या होमा उच्यन्ते। तथा च ब्राह्मणम्—सिताय स्वाहाऽसिताय स्वाहेति प्रमुक्तीर्जुहोति' इति।

पाठस्तु—

सिताय स्वाहेति। सितादीन्यश्वविशेषणानि। सितासितशब्दाभ्यामारोहणकालीनबन्धाबन्धौ विवक्षितौ। अविहितानभिहितशब्दाभ्यां **रशनायुगुलेबन्धाबन्धौ**। युक्तादिचतुष्टयेन रशनोजनविशेषाः। विमुक्तप्रमुक्तशब्दाभ्यां **मोचनविशेषौ**। वश्चनादिशब्दपञ्चकेन गमनप्रकारविशेषाः। उपर्यारूढेन **प्रेरिता वश्चनादयः**। यतादिशब्दैस्तु स्वेच्छाकृता इति विशेषः। एतैरेकोनविंशति**मन्त्रैः प्रमुक्त्याख्यहोमः कार्यः**।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

चतुर्विंशतिरात्रौ द्वौ चतुर्थाद्यद्वितीययोः।
त्रिंशद्रात्रस्तृतीये स्याद्द्वात्रिंशद्रात्र उत्तरे ॥ १ ॥
त्रयस्त्रिंशदहोऽन्यस्मिन्नष्टात्रिंशद्रात्र उत्तरे।
एकोनपञ्चाशदहः सप्तमे समुदीरितः ॥ २ ॥
संवत्सराख्यसत्रस्य दीक्षाकालोऽष्टमे श्रुतः।
दीक्षाश्चोपसदोऽन्यस्मिन्दशमे प्रायणीयकम् ॥ ३ ॥
मासा एकादशेऽश्वाश्वमेधमन्त्रा उदीरिताः।
मेषो नवमाप्यहोमा अवन्तीः परियान्ति हि ॥ ४ ॥
कूप्याभ्यो विंशतिश्चाद्भ्यो द्वादशानां तु होमकाः।
यो अर्व श्वप्रहारः स्यात्तरोऽवस्पृक्संस्थितिः ॥ ५ ॥
अहं ब्रह्मा स्वामिहस्ते धृत्वाऽभिक्रेति वाचयेत्।
एते मन्त्रास्तु चत्वारो मध्यहोमा नमो नव ॥ ६ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

मयोऽष्टौ स्युर्गव्यहोमाः किं ब्रह्मोद्ये षडीरिताः ।
पत्नीमुदानयेदम्बे सुभेत्याच्छादयेदुभौ ॥ ७ ॥
तौ संप्रसारयेत्पादान्बृषेत्यश्वयुर्मन्त्रयेत् ।
उत्सक्थ्नीति गुह्ये द्वे ह्यम्बे अश्वं विगर्हयेत् ॥ ८ ॥
ऊर्ध्वामन्या बोधयेयुस्त्रिरेवं स्यात्पुनः पुनः ।
दधि सर्वा जपित्वा हि मार्जयन्ते त्रिभिर्जलात् ॥ ९ ॥
अम्ब इत्यनुवाकेऽस्मिन्मन्त्रा अष्टादशेरिताः ।
भूस्त्रि पत्न्योऽश्ववालेषु कीलेयुस्त्रिविधान्मणीन् ॥ १० ॥
वसाभ्यङ्क्तीति पत्न्योऽश्वमेतमा(श्वं यद्वेत्या)वर्तयेदृगुणा(दृगुहा)न् ।
लाज्यर्क्चशेष आहार्यो युञ्जन्युञ्ज्यादथेऽश्वकम् ॥ ११ ॥
युञ्जान्यो योजयित्वाऽथ केतुं बध्नीयो रथे ध्वजः ।
भूर्भुवः सुवरित्यस्मिन्मन्त्रा एकादशेरिताः ॥ १२ ॥
प्राणा संततिहोमाः स्युस्तत्र मन्त्राश्चतुर्दश ।
सितापमुक्तिहोमाः स्युर्मन्त्रा एकोनविंशतिः ॥ १३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

---

१ ख. °र्जलैः । अ° ।

(संवत्सरसत्रकथनम्)

(अथ सप्तमाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

गावो वा एतत्सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नरात्स्मेत्यथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गोसत्रं वै (१) संवत्सरो य एवं विद्वाꣳसः संवत्सरमुपयन्त्यधुध्नुवन्त्येव तस्मात्तूपरा वार्षिको मासौ पत्वा चरति सत्राभिजित्ꣳ ह्यस्ये तस्मात्संवत्सरसदो यत्किं च गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये संवत्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स ततः उदेति संवत्सरः (२) वै समुद्रस्तस्यैतत्पारं यदतिरात्रौ य एवं विद्वाꣳसः संवत्सरमुपयन्त्यर्ता एवोद्यं गच्छन्तीयं वै पूर्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्विꣳशः प्रायणीयो भवति चतुर्विꣳशतिरर्धमासाः (३) संवत्सरः

प्रयन्त एव संवत्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रय उभे एव संवत्सरस्य रूपे आप्नुवन्ति ते सꣳस्थित्या अरिच्या उत्तरैरहोभिश्चरन्ति षड्हा भवन्ति षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्ति गौश्चाऽऽयुश्च मध्यतः स्तोमौ भवतः संवत्सरस्यैव तन्मिथुनं मध्यतः (४) दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं लोकं यन्ति ब्रह्मवादिनो वदन्त्यामंते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव (५) तत्पथा यन्ति समानꣳ साम भवति देवलोको वै साम देवलोकादेव न यन्त्यन्याꣳअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्या अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमासीव वीर्यं दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति (६) ॥

(सवत्सरसत्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

— —

(अथ सप्तमकाण्डे पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
सत्र संवत्सरात्मं यत्तच्चतुर्थे समीरितम्।
विशेषः पञ्चमे तस्य वत्सराख्यस्य वर्ण्यते ॥

तत्राऽऽदौ तावत्संवत्सरसत्रं विधत्ते—

गावो वा एतदिति। यद्यपि गावस्तिर्यक्त्वान्न कर्मविकारिण(ण्य)स्तथाऽपि तदभिषानिदेक्षाऽऽन्न गोशब्देन विवक्षिता। अभिमन्तव्यानां शृङ्गभावाभावौ स्वस्मिन्नारोप्य गोभिः सह तादृशबुद्ध्या व्यवहरन्ति। पुरा शृङ्गरहिताः सत्यो गावः शृङ्गोत्पत्तिं कामयित्वैतत्सवत्सराय दीक्षिष्यमाणा इत्याद्यनुवाकोक्तं सत्रमन्वातिष्ठन्। तासां शृङ्गकामयितानामनुष्ठाने प्रवृत्तानां गवां दश मासा निर्गता अभूवन्। अथ मासदशकादूर्ध्वं शृङ्गाण्युत्पन्नानि। तदानीं ता गावोऽपेक्षितेन फलेन समृद्धाः स्म इति मत्वा तस्मात्सत्रादुत्थिताः। अथैतस्मिन्काले कासांचिद्गवां शृङ्गाणि नोत्पन्नानि, ताः पुनरपि मासद्वयमनुष्ठाय संवत्सरसंपूर्तिं कृत्वा समृद्धाः स्म इत्येवं मत्वा तस्मात्सत्रादुत्थिताः। तदेवं यासां शृङ्गाण्युत्पन्नानि यासां च नोत्पन्नानि ता उभयविधा अपि गावो वयं समृद्धा इत्येवं मत्वोत्थिताः। यस्माद्गोभिरनुष्ठितं तस्माद्गोसत्रमित्येवायं संवत्सराख्यः कर्मविशेषोऽभिधीयते। ये यजमाना एवं विद्वांसः सांवत्सराख्यं कर्मविशेषमनुतिष्ठन्ति ते समृद्धिं प्राप्नुवन्त्येव।

यदुक्तमर्थवादे यासां गवां शृङ्गाण्यजायन्त, यासां च नाजायन्त ता उभयोऽप्यृद्धिं गता इति, तत्र जातशृङ्गाणां शृङ्गजन्मैवार्धिः। इतरासां तु कथं सा समृद्धिरित्याशङ्क्य तां दर्शयति—

तस्मात्तूपरा इति। यस्मादजातशृङ्गास्तूपराः सत्रेण समृद्धिं गतास्तस्मादृषिं वर्षर्तुसंबन्धिनौ मासौ पत्वा प्रीतिं प्राप्यारण्ये चरति। वार्षिकयोर्हि

मासयोररण्ये संचरन्तीनां दीर्घशृङ्गयुक्तानां गवां महान्क्लेशो जायते । प्रबलवायूपेतया तीव्रवृष्ट्या मुखे प्रतिहताः सत्यो मुखमर्वाग्भूतं कृत्वा शृङ्गभारेण पीडयन्ते । तूपरायास्तु नास्त्ययं क्लेशः । यथा केशश्मश्रुपूर्णशिरस्कानां पुरुषाणां सत्यपि सौन्दर्याभिमानकृते सुखे नदीस्नानघृतभोजनादौ महान्क्लेशस्तद्वत् । यदेतदस्यै तूपरायै गोर्वर्षासु प्रीतिसंपादनं तदेतत्सत्राभिजितं सत्रानुष्ठानलब्धम् ।

अथ प्रकारान्तरेण सत्रानुष्ठानं प्रशंसति—

तस्मात्संवत्सरेति । यस्मात्सत्रं प्रशस्तं तस्मात्संवत्सरसदः संवत्सरसत्रमनुष्ठितवतो यजमानस्य गृहे यत्किंच क्रियते यत्किमप्यग्निहोत्रादिकमङ्गविकलमप्यनुष्ठीयते तदाप्तमङ्गसंपूर्णमेव भवति । तथाऽवरुद्धमकाले कृतमपि स्वकाले कृतं भवति । अभिजितं फलापेक्षारहित्येऽपि संपादितफलं भवति । अत एव शास्त्रन्यायाभिज्ञा आहुः—'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति ।

अथैतस्य सत्रस्य प्रायणीयोदयनीयावहर्विशेषौ विधत्ते—

समुद्रं वा एत इति । ये यजमानाः संवत्सरसत्रमुपक्रमन्त एते यजमानाः समुद्रमेव बाहुभ्यां तरितुमुद्युञ्जते । सत्रस्य समुद्रवदतिप्रभूतत्वात् । एवं सति यः पुरुषः समुद्रस्य पारं परतीरं न पश्यति स पुरुषः समुद्रादुद्गन्तुं न शक्नोति । अयं च संवत्सरस्तेन समुद्रेण समानः । तस्मादस्य समाप्तिपरिज्ञानाभावे तत उत्थातुमुत्साहो न भवेत् । तस्मात्समाप्तिरूपमहर्विज्ञेयम् । तस्य च समुद्रसमस्य संवत्सरस्य पारावारतीरभूतावतिरात्रौ । एतदभिज्ञाय यजमाना अनार्ता मनस्युद्वेगरहिता एवोदृचमुत्तमां समाप्तिसबन्धिनीमृचं गच्छन्ति । तस्मादतिरात्रावुभावनुष्ठेयावित्यर्थः । यदि ब्रह्मवादिनो वदन्त्यतिरात्रः परम इत्यनुवाक एव प्रायणीयोऽतिरात्रो विहितः, तर्ह्युदयनीयातिरात्रेण सह निर्देष्टुमत्र पुनरुपन्यासः ।

तावेतावतिरात्रौ बहुधा प्रशंसति—

इयं वै पूर्व इति । पूर्वः प्रायणीयोऽतिरात्रः प्राग्भ्यसाम्येन पृथिव्यादिरूपः । उदयनीयस्तु पश्चाद्भावित्वेन द्युलोकादिरूपः । प्रबोधनं लौकिकस्य वैदिकस्य वा व्यापारस्य प्रारम्भः ।

यावेतावतिरात्रौ सामान्येनोक्तौ तयोर्विशेषाकारेण स्वरूपं विधत्ते—

ज्योतिष्टोम इति । योऽयमतिरात्रः स ज्योतिष्टोमरूपः । स च वैश्वानरेण

(संवत्सरसत्रकथनम्)

दृष्टः । तदनुष्ठानेन स्वर्गमार्गे पुरस्ताज्ज्योतिर्दधते । तच्च स्वर्गप्रकाशनाय भवति ।

यदुक्तं सूत्रकारेण—' प्रायणीयमतिरात्रमुपेत्य चतुर्विꣳशमुक्थ्यमारम्भणीयमुपयन्ति ' इति, तदिदं विवक्षते—

चतुर्विꣳश इति । यदेतदारम्भणीयमहस्तदेतत्पूर्वोक्तादतिरात्रादुत्तरभाविन्येऽपि वक्ष्यमाणेभ्योऽभिप्लवषडहावृत्तिरूपेभ्यो मासेभ्यः प्रथमभावित्वात्प्रायणीय इत्युच्यते । स चाहर्विशेषश्चतुर्विꣳशस्तोमयुक्तः कार्यः । तथा सति संख्यासाम्यादर्धमासद्वारा संवत्सरः संपद्यते । तत्संपत्तौ सत्यां प्रारभमाणा एव यजमानाः संवत्सरसत्रानुष्ठाने स्थिरा भवन्ति । किंचैतस्याहन उक्थ्यरूपत्वादुक्थ्यस्य च पञ्चदशस्तोत्रयुक्तत्वादेकैकस्मिन्स्तोत्रे चतुर्विंशतिसंख्याकास्वृक्षु स्तोत्रीयासु सतीषु मिलित्वा षट्चोत्तरशतत्रयपरिमिताः स्तोत्रीया भवन्ति । एवं सति संवत्सरस्य यदिदं चतुर्विंशत्यर्धमासात्मकं रूपं यच्च षट्चोत्तरशतत्रयरात्र्यात्मकं रूपं ते उभे अपि रूपे संख्यासाम्येन प्राप्नुवन्ति ।

अनन्तरभावीन्यहानि विवक्षते—

ते सꣳस्थित्येति । अनुष्ठितप्रायणीयारम्भणीयास्ते यजमानास्तत ऊर्ध्वं संस्थित्या अग्निष्टुचे सत्रसमाप्तिरविनाशायोत्तरैर्ज्योतिर्गौरायुरित्यादिभिरहोभिरनुतिष्ठेयुः । अत्र यानि पूर्वप्रपाठकविहितानि तेषां स्तुत्यर्थोऽनुवादः । यानि त्वविहितानि तेषामत्र विधिरिति विवेकः ।

ज्योतिरादीनामभिप्लवषडहता विवक्षते—

षडहा भवन्तीति । ज्योतिर्गौरायुरायुर्गौर्ज्योतिरित्येवं षडहत्वम् ।

उक्ते षडहे मध्यवर्त्यहर्द्वयं प्रशंसति—

गौश्चाऽऽयुश्चेति । योऽयं गोष्टोमो यश्चाऽऽयुष्टोमस्तावुभौ षडहस्य मध्ये कर्तव्यौ । तत्तेन संवत्सरसत्रस्य मध्ये मिथुनं संपादयन्ति । तच्च प्रजननाय भवति ।

षडहस्याऽऽद्यन्तावहर्विशेषौ प्रशंसति—

ज्योतिरभित इति । षडहस्याऽऽद्यन्तयोर्ज्योतिष्टोमः कार्यः । तदेतदादौ ज्योतिष्टोममनुष्ठाय पुनरप्यन्ते ज्योतिष्टोमस्यानुष्ठानमुपक्रमे निरुद्धस्य विमोचनरूपमानं भवति । तेन ज्योतिर्गौरायुरित्येतत्त्रयरूपाणि च्छन्दांसि गायत्र्यादीन्येषु

विमोकं प्राप्नुवन्ति । अपि च पार्श्वद्वये ज्योतिर्युक्तेन द्वीपद्वयसमानेन षडहेन प्रकाशितं स्वर्गं सुखेन प्राप्नुवन्ति ।

अथ प्रश्नोत्तराभ्यां ज्योतिरादिकं प्रशंसति—

ब्रह्मवादिन इति । ये यजमाना आसते सत्रमनुतिष्ठन्ति ते यजमानाः केन पथा स्वर्गं गच्छन्तीति ब्रह्मवादिना प्रश्नः । तत्राभिज्ञो देवयानेन पथा गच्छन्तीत्युत्तरं ब्रूयात् । येन देवा यान्ति सोऽयं देवयानः पन्थाः । सोऽपि कीदृश इति चेच्छ्रूयताम्—गायत्र्यादीनि च्छन्दांस्येव मार्गसाधनत्वाद्देवयानः पन्था इत्युच्यन्ते । इह तु ज्योतिष्टोमादीन्येव गायत्र्यादीनि । तस्माद्देवेषामनुष्ठानेन तत्तेनैव पथा गच्छन्ति ।

अत्र सर्वेष्वहःसु पृष्ठस्तोत्रे सामैक्यं विधत्ते—

समानꣳ सामेति । बृहदेव वा रथंतरमेव वा सर्वेष्वहःस्वेकमेव साम पृष्ठस्तोत्रे गायेत् । देवलोकेषु हि पक्षपातराहित्येन सर्वसमत्वात्सामरूपः । अत एकविधेन साम्ना कदाचिदपि देवलोकान्न निर्गच्छन्ति ।

तस्य साम्न आधारभूतानामृचामेतेष्वहःसु भेदं विधत्ते—

अन्याअन्या इति । ऋचो हि मनुष्यलोकस्वरूपाः । साम्न आधारभूतत्वात् । यथा कर्मानुष्ठानद्वारा देवलोकस्याऽऽधारभूतो मनुष्यलोकस्तद्वत् । अन्यमन्यमिति मञ्चम्यर्थे द्वितीया । ऋचामन्यत्वे सत्यूयूषादन्यस्मादन्यस्मान्मनुष्यलोकादेवलोकमभ्यारोहन्तो यजमानाः सुखं प्राप्नुवन्ति । नानाविधकर्माधारत्वान्मनुष्यलोकस्य नानाविधत्वम् । यद्वाऽन्यमन्यं देवलोकं कर्मवैचित्र्येण फलवैचित्र्यमित्यर्थः ।

प्राकृतं साम बाधितुं सामान्तरं विधत्ते—

अभिवर्त इति । ब्रह्मणः संबन्धि यत्साम तदभिवर्तनामकं कार्यम् । तच्च स्वर्गलोकस्याभितः प्राप्त्यै भवति ।

अहरन्तरं विधत्ते—

अभिजिद्भवतीति । विषुवदाख्यं यत्प्रथममहस्तस्मात्पूर्वं स्वरसामाख्यास्त्रयोऽहर्विशेषाः तेभ्योऽपि पूर्वमभिजिदाख्यमेकमहः कर्तव्यम् । तच्च स्वर्गाभिजयाय भवति ।

पुनरप्यन्यदहर्विधत्ते—

(संवत्सरसत्रकथनम्)

विश्वजिद्भवतीति । विषुवदाख्यादह्न ऊर्ध्वभाविनो ये त्रयः स्वरसामानोऽहर्विशेषास्तेभ्य ऊर्ध्वं विश्वजिदाख्यमहः कर्तव्यम् । तच्च विश्वस्य जयाय भवति ।

प्रतिमासमभिप्लवषडहेभ्य ऊर्ध्वं पृष्ठ्यं षडहमतिग्राह्यनियमं च विधत्ते—

मासिमासि पृष्ठानीति । प्रतिमासानुष्ठानेन तस्मिंस्तस्मिन्मासि वीर्यं संपद्यते ।

पृष्ठ्यस्य षडहस्य मासेषूर्ध्वभागं स्थानत्वेन विधत्ते—

उपरिष्टादिति ।

अत्र मीमांसा ॥

सप्तमाध्यायस्य तृतीयपादे द्वितीयाधिकरणे चिन्तितम्—

गवामयन आद्येऽह्नि प्रायणीयेति नाम यत् ।
तद्द्वादशाहिकादह्नो धर्मानतिदिशेन्न वा ।
पूर्वन्यायेनातिदेशो मैवं प्रथमता द्वयोः ।
अह्नोस्तुल्येति मुख्यत्वं समं नातिदिशेदतः ॥

द्वादशाहे प्रथमस्याह्नः प्रायणीयमिति नाम । तथा गवामयनेऽपि तत्राग्निहोत्रनामन्यायेनातिदेश इति चेन्नैवम् । प्रायणीयशब्दप्रवृत्तिनिमित्तस्य प्राथम्यस्य द्वयोस्तुल्यत्वेनोभयत्र मुख्यत्वेऽप्यनेकार्थत्वाप्रसङ्गात् । प्रारम्भायति गच्छति प्रवर्तते कर्मानेनेति प्रायणीयम् । अतो नैतन्नाम धर्मानतिदिशति ।

तत्रैव चतुर्थपादे तृतीयाधिकरणेऽन्याच्चिन्तितम्—

गावामयनिके ज्योतिरादौ किं द्वादशाहिकी ।
ऐकाहिकी वाऽनुमानाद्याद्योऽन्त्यो नामबाधनात् ॥

गवामयने ज्योतिर्गौरायुरि[1] ज्योतिरादिनामकास्त्रयो यागा विहिताः । तेषु द्वादशाहिकीतिकर्तव्यता युक्ता [2]नः । अनुमितवाक्येन तत्प्रापणात् । गवामयनं हि द्वादशाहविकृतिरिति व[3] । अतस्तत्संबन्धिलिङ्गेन तदीयधर्मप्रापकश्चोदकोऽनुमीयत इति प्राप्ते [4]—सन्ति ज्योतिरादिनामकास्त्रय एकाहाः । तदीयधर्मा गावामयनिकेषु [5]तरादिषु ज्योतिरादिभिस्त्रिभिस्त्रिभिर्नामभिः प्राप्ताः । नाम चाऽऽनुमानिक[6]कात्प्रबलं, प्रत्यक्षश्रुतत्वात् । अतश्चोदकस्य बाधितत्वादेतेष्वैकाहिकीतिकर्तव्[7]ता प्राप्ता ॥

---

१ क. ख. ङ. °शेत्तत. । २ [illegible]°भिर्ना° । ३ क. ख. घ. ङ. °श्रुतित्वा° ।

(संवत्सरसत्रस्य दशमाससाध्यप्रयोगेण सह विकल्पकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः) ।

गावो वा एतत्सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नरात्सोत्तिष्ठामाव तं काममरुत्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रवन्नर्धा वा यावतीर्वाऽऽसामहा एवेमौ द्वादशौ मासौ संवत्सरꣳ संपाद्योत्तिष्ठामेति तासाम् (१) द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन्याश्च शृङ्गाण्यसंवन्याश्चोर्जमवारुन्धतर्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन्तद्वा एतद्यज्ञमर्थनं तस्मादेतद्वोसानि (२) ॥

(तिष्ठामेति तासां तस्माद्द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वितीयेऽनुवाकः) ।

प्रथमेऽनुवाके गवामयननामकं संवत्सरसत्रं कैश्चिद्विशेषैः सह विहितम् । सोमयागा द्विविधाः--आवृत्ता अनावृत्ताश्च । ते चानावृत्ता एकाहाः । आवृत्ता

(सवत्सरसत्रस्य दशमाससाध्यप्रयोगेण सह विकल्पकथनम्)

अपि द्विविधाः—अहीनरूपाः सत्ररूपाश्च । द्विरात्रमारभ्यैकादशरात्रपर्यन्ता अहीनाः । एकादशरात्रद्वादशरात्रौ तु द्विविधौ—अहीनरूपौ सत्ररूपौ च । त्रयोदशरात्रमारभ्योपरितनानि सत्राण्येव । तान्यपि द्विविधानि—रात्रिसत्राण्यय-नात्मकसत्राणि च । तत्र शतरात्रपर्यन्तानि रात्रिसत्राणि । संवत्सरसत्रमारभ्यो-परितनान्ययनरूपाणि । तेषां च सर्वेषां प्रकृतिभूतमिदं गवामयनम् । तस्य च संवत्सरकालसाध्यः प्रयोगः पूर्वानुवाकेऽभिहितः । अथ द्वितीये दशमासतासाध्येन प्रयोगेण सह विकल्पोऽभिधीयते ।

तमेतं विधातुं पूर्वोक्तमेवार्थवादं कस्यचिद्विशेषस्य विवक्षया पुनः पठति—

गावो वा एतदिति । पुरा शृङ्गरहिताः सत्यो गावः शृङ्गाणि सिषा-सन्तीः तानितुं लब्धुमिच्छन्त्य एतदुच्यमानं सत्रमन्वतिष्ठन् । तासां गवां दश मासा अनुष्ठिता अभवन् । अथास्मिन्काले शृङ्गाण्युत्पन्नानि । ताश्चोत्पन्नशृङ्गाः परस्परमिदमब्रुवन्—येन शृङ्गविषयेण कामेन व्यषदाम सत्रानुष्ठानार्थं वयमेकत्र स्थाने निषण्णास्तं शृङ्गविषयं काममरुत्स्महि वयं संपादितवत्यः । एवमुक्त्वा काश्चिद्गावः कृतार्थबुद्ध्या सत्रादुत्थिताः । ता उदतिष्ठन्निति पूर्वस्मिन्नर्थवादे श्रवणात् ।

तत्रैव यदन्यदुक्तम्—'अथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदातिष्ठन्' इति, तत्र विवक्षितं विशेषं दर्शयति—

तासामु त्वेति । या गावः सत्रमनुतिष्ठन्ति तासामु त्वै तासामेव मध्ये जातशृङ्गासूत्थाय गतास्ववशिष्टा अर्धा वा काश्चिदेव गावः परस्परमेवमब्रुवन् । एतास्वर्धरूपासु गोषु मध्ये राशिद्वयम् । तत्र काश्चिच्छृङ्गकामाः । अपरास्तु किमेभिः शृङ्गैरूर्जमेवोदरपूरणक्षमां संपादयाम इति मन्यन्ते । एवं सति शृङ्ग-कामा अशृङ्गकामाश्च यावतीर्वा यावत्यः सन्ति ताः सर्वा अपि मिलित्वा पर-स्परमेवमब्रुवन् । किमब्रुवन्निति तदुच्यते—इमौ संवत्सरावशिष्टौ द्वादशसंख्या-पूरणौ मासावासामहा एव सर्वदाऽप्यनुतिष्ठाम । ततः संवत्सरं पूरयित्वा पश्चा-दुत्तिष्ठामेति । तासां संवत्सरं पूरयन्तीनां गवां मध्ये यासां शृङ्गश्रद्धाऽस्ति तासां तयैव श्रद्धया द्वादशे मासि शृङ्गाण्युत्पन्नानि । यासां तु श्रद्धा नास्ति ता अश्रद्धयैवेमाः संपन्ना असंपन्नशृङ्गाः । या लोके तूपराः शृङ्गरहिता

---

१ ख. °रमा° ।

(वृष्ट्यषडहाविषयाविकल्पाभिधानम्)

ह्रियन्ते । एवं सति या गावः शृङ्गाण्यलभन्त, याश्चान्यास्तच्छृङ्गारहिताः स्वापेक्षितामूर्जमेवालभन्त, ता उभयविधा अपि स्वस्वप्रयोजनसिद्ध्या समृद्धिमताः । अत्र दशमासानुष्ठानेन शृङ्गमात्राम् । द्वादशमासानुष्ठानेन रमणीयशृङ्गत्वं, कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायात् ।

तदेवमर्थवादेन दशमासानुष्ठानं द्वादशमासानुष्ठानं च प्रशस्य विकल्पितं पक्षद्वयं विधत्ते—

ऋध्नोतीति । यो यजमानः प्रकारद्वयं वेत्ति सोऽयं स्वेच्छयाऽन्यतरं प्रकारमनुतिष्ठन्समृद्धिं प्राप्नोति ।

ननु द्वादशसु मासेषु संपूर्णानुष्ठानत्वादस्तु फलम् । दशमासपक्षे तु कथमित्याशङ्क्योपपादयति—

पदेन खल्विति । एते दशमासानुष्ठायिनो यजमानाः कालाल्पत्वेऽपि पदेन खलु वै यन्ति शास्त्रीयेण मार्गेणानुतिष्ठन्ति । लोकेऽपि पदेन यन्राजमार्गेण गच्छन्पुरुषः स्वल्पस्खलनेऽपि ग्रामप्राप्तिं लभत एव । तद्वदत्रापि फलप्राप्तिर्ध्रुवा ।

उपपादितं पक्षद्वयमुपसंहरति—

तद्वा एतदिति । यदेतद्गवामयनं यद्यदि दशसु मासेषु समाप्यते, यदि वा द्वादशसु, सर्वथाऽप्यृद्धं फलप्रदमेव । यस्मादयनस्य महिमा भूयांस्तस्मादेतदयनं गोसनि गवां तिर्यग्जातीनामप्यभिमतलाभहेतुः । किमु वक्तव्यं विशिष्टब्राह्मणानामित्यभिप्रायः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः) ।

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यो वै त्रिरेकस्याह्न उपसीदन्ति दह्रं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ

(पृष्ठ्यषडहविषयविकल्पाभिधानम्)

कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति संवत्सरꣳ संपाद्योत्तमे मासि सकृत्पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते समुद्रं वै (१) एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्ति यद्बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुत्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान्कामानव रुन्धते (२) ॥

(समुद्रं वै चतुस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

द्वितीये दशमासद्वादशमासविकल्पोऽभिहितः । अथ तृतीये पृष्ठ्यषडहविषयो विकल्पोऽभिधीयते ।

यत्पूर्वं " विहितं मासिमासि पृष्ठान्युपयन्ति " इति, तत्र पक्षान्तरं विधत्ते—

प्रथमे मासीति । सर्वेषु मासेषु पृष्ठ्यः षडहो नानुष्ठेयः, किंतु प्रथममध्यमोत्तमेषु त्रिष्वेव मासेष्वित्ययमेकः पक्षः ।

पुनरपि पक्षान्तरं विधत्ते—

तदाहुर्यामिति । लोके दोग्धारः पुरुषा एकस्याह्नो मध्ये यां गां दोग्धुं त्रिवारं प्राप्नुवन्ति सा गौः प्रथमपर्याये प्रभूतं क्षीरं प्रयच्छति । अपराह्णे द्वितीयतृतीयदोहनपर्यायाभ्यां दह वै दुहेऽल्पमेव क्षीर दोग्धि । एवं सति यां गामकस्मिन्दिने द्वादशकृत्वो दोग्धुमुपयन्ति सा गौः कुतो धोक्ष्यते । नहि क्षीराभावे दोहनमुचितम् । तस्माद्द्वादशमासानस्य पृष्ठ्यषडहस्यापि मासत्रयानुष्ठानमनुचितम् । किमु वक्तव्यं द्वादशमासानुष्ठानेऽप्यनुचितत्वमित्येवम् । तदाहुस्तस्मिन्पृष्ठ्यषडहविषयेऽभिज्ञाः कथयन्ति । तस्मात्संवत्सरमनुष्ठायान्ते मासि सकृ-

(उत्तरपक्षःप्रकारविशेषाभिधानम्)

देव पृष्ठ्यः षडहोऽनुष्ठेयः । इतरेषु तु मासेषु पञ्चभेनाभिप्लवषडहेनैव मासपूरणं कर्तव्यम् । तथा सति यजमानाः पृष्ठ्यषडहस्य ससारत्वाद्यज्ञं संपूर्णं प्राप्नुवन्ति ।

यत्पूर्वं विहितं " समानꣳ साम भवति " इति तदेतदेवात्र विशेषाकारेण विधत्ते—

समुद्रं वा एत इति । पारावारे परावाची तीरे । ये यजमानाः संवत्सरसत्रमनुतिष्ठन्ति एते तीरद्वयरहितं समुद्रं बाहुभ्यां तरितुमिच्छन्ति, तच्चाशक्यम् । यदि वत्र बृहद्रथतरे सामनी अनुक्रमेण पृष्ठस्तोत्रे संपादयेयुस्तदानीं यथा समुद्रस्य मध्ये तरणसाधनं प्लव संपादयेयुस्तादृक्तद्भवति । तस्मादनुत्सर्गं कदाचिदप्यपरित्यज्य बृहद्रथंतराभ्यामित्वा स्तोत्र प्राप्य प्रतिष्ठां यज्ञसमाप्तिं गच्छन्ति । अन्यदीयेनापि वत्सेन दोग्धु शक्या गोः संधिरित्युच्यते । सा च संधिः सर्वेभ्यः कामेभ्यो दुहे यथा यथा क्षीरमपेक्षित तथा तथा यं कांचिद्वत्समादाय दोग्धुं शक्यते । तत्तथा सत्यत्रापि यजमाना अन्यदीयाभ्यां प्रकृतिगवाभ्यां बृहद्रथंतराभ्यां तत्तद्दिने प्रयुज्यमानाभ्यां सर्वान्कामान्प्राप्नुवन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः) ।

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यत्साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगती वै छन्दाꣳसि प्रत्यवरोहन्त्याग्रयणं ग्रहा बृहत्पृष्ठानि त्रयस्त्रिꣳशꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान्प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदि-

(उत्तरपक्ष-प्रकारविशेषाभिधानम्)

त्यः (१) गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योन्यो गृह्यते मिथुनत्वाय प्रजात्या अवान्तरं व दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उद्दङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिः (२) ॥

(आदित्यस्तस्यैव द्वे च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीये पृष्ठ्यषडहविषयप्रकारविशेषोऽभिहितः । अथ चतुर्थ उत्तरे पक्षसि प्रकारविशेषोऽभिधीयते । द्वे हि संवत्सरसत्रस्य पक्षसी । एतच्चान्यत्र समाम्नातम्—' यथा शालायै पक्षसी । एवꣳ संवत्सरस्य पक्षसी ' इति । तत्र प्रथमषण्मासात्मके पूर्वस्मिन्पक्षसि सामैक्यमृचा नानात्वं [च] पूर्वमभिहितम् । इदानीं द्वितीयषण्मासात्मक उत्तरस्मिन्पक्षसि पूर्ववैपरीत्येन ऋगैक्यं सामनानात्वं चाभिधीयते ।

तत्राऽऽदावृगैक्यं विधत्ते—

समान्य ऋच इति । मनुष्यलोके हि कर्म कृत्वा पश्चाद्देवलोकं गच्छन्ति । एवमाधारभूतामृचमभ्यस्य पश्चात्तस्या साम गायन्ति । तस्मादमी मनुष्यलोकस्वरूपाः । ताश्च समान्य एकरूपाः कर्तव्याः । एकस्मिन्नहनि वा ऋचस्ता एवान्यस्मिन्प्रयोक्तव्याः । एवं सति ऋगात्कान्मनुष्यलोकात्कदाचिदपि नापगच्छन्ति । अपत्यादिसंतानाविच्छेदात् ।

अथ सामनानात्वं विधत्ते -

(उत्तरपक्षःप्रकारविशेषाभिधानम्)

अन्यदन्यादिति । साम्नः पश्चाद्भावित्वसाम्येन देवलोकत्वम् । तादृशं च साम पूर्वस्मिन्दिने यद्भवति ततोऽन्यदुत्तरस्मिन्नहनि कर्तव्यम् । लोकेऽपि देवलोकान्निर्गच्छन्तः पुरुषा अन्यमन्यं मनुष्यलोकप्रदेशं गच्छन्ति । यद्वाऽन्यमन्यमिति पञ्चम्यर्थे द्वितीया । अन्यस्मादन्यस्माद्देवलोकात्कर्मफलानां तारतम्योपेतत्वेन विविधत्वात्तदा तदा विलक्षणाद्देवलोकात्प्रत्यवरोहन्तो यजमाना मनुष्यलोकं प्राप्नुवन्तीत्यर्थः ।

विशेषान्तरं विधत्ते—

जगतीमग्र इति । पूर्वस्मिन्पक्षसि गायत्री प्रथममनुष्ठिता । उत्तरस्मिंस्तु जगती प्रथममनुष्ठेया । तथा सति जगतीं प्रत्यन्यानि सर्वाणि च्छन्दांस्यवरोहं प्राप्तानि भवन्ति ।

पुनरपि विशेषत्रयं क्रमेण विधत्ते—

आग्रयणमिति । यथा गायत्र्यादिच्छन्दःसु पूर्वस्मात्पक्षसो विपर्ययेणोत्तरस्य पक्षसोऽनुष्ठानमेवं ग्रहसामस्तोमेष्वपि द्रष्टव्यम् । तत्राऽऽग्रयणोऽन्ने गृहीत इह त्वादौ । तथा सति ग्रहाः प्रत्यवरूढा भवन्ति । तथा तत्र रथंतरं पृष्ठं पूर्वेद्युरनुष्ठितम् । इह तु बृहत्पृष्ठं पूर्वमनुष्ठेयम् । तथा सति सर्वाणि पृष्ठस्तोमाणि प्रत्यवरूढानि भवन्ति । तथा तत्र त्रयस्त्रिंशस्तोमोऽन्तेऽनुष्ठितः । इह तु आद्यावनुष्ठेयः । तथा सति सर्वे स्तोमाः प्रत्यवरूढा भवन्ति । यस्मादत्र प्रौढत्रयस्त्रिंशः प्रथममाह्यर्वाञ्चस्त्रिंशदैकविंशादयः पश्चाद्भाविनस्तस्माल्लोकेऽपि ज्यायांसं पितरं पितामहं वा प्रति कनीयान्पुत्रः पौत्रो वा वाहनादश्वादेरवरोहति ।

अथातिग्राह्यद्वयं विधत्ते—

वैश्वकर्मण इति । वाचस्पतिं विश्वकर्माणमित्यनेन गृह्यमाणोऽतिग्राह्यो वैश्वकर्मणः । तेनातिग्राह्येण सर्वाण्यपि कर्माणि यजमानाः प्राप्नुवन्ति । महीमू षु मातरमित्यनेन गृह्यमाणोऽतिग्राह्य आदित्यः । भूमेरदितित्वात् । तेनातिग्राह्येण भूमौ प्रतितिष्ठन्ति ।

अत्र सूत्रकारः—' वैश्वकर्मणमतिग्राह्याणामष्टमं गृह्णाति वाचस्पतिं विश्वकर्माणमूतय इति भोभूत आदित्यं महीमू षु मातरमिति तावेवमेव व्यत्यासं गृह्णात्या महावतात् ' इति, तमिमं व्यत्यासं विधत्ते—

---

१ ख. °य क्रमेण वि ।

(मात्स्यप्रवृत्तगवामयनद्वयेविशेषाभिधानम्)

अन्योन्य इति । अन्योन्य एकैकः । यस्मिन्दिने वैश्वकर्मणो गृह्यते ततः परेद्युरादित्यः । ततोऽपि परेद्युर्वैश्वकर्मणः । पुनरपि परेद्युरादित्यः । एवं सति द्वित्वेन मिथुनरूपत्वात्प्रजोत्पत्तये संपद्यते ।

अथ द्वादशाहीयं दशरात्रं विवरते—

अवान्तरमिति । एतच्च वाक्यं " द्वे वाव देवसत्रे " इत्यत्र व्याख्यातम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमे पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

यदि सोमौ भ॰संतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात्पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दा॰सि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्प्रातःसवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखे सवनमुखे कार्यमिति सवनमुखात्सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दा॰सि वै संवेश उपवेशश्छन्दोभिरेवैषाम् (१) छन्दा॰सि वृङ्क्ते सजनीय॰ शस्यै विहव्य॰ शस्यमगस्त्यस्य कराशुभीय॰ शस्यमेतावद्वा अस्ति यावदेतद्यावद्देवास्ति तदेषां वृङ्क्ते यदि प्रातःसवने कलशो दीर्यत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन्यद्वै यज्ञः स्यातिरिच्यते विष्णुस्तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिवि-

ष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनै-
वातिरिक्तमाप्त्वाऽवं रुन्धते यदि मध्यंदिने दीर्यत
वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य
प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन
एतदेव (२) ॥

(छन्दोभिरेवैषामेवैकान्नविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाक उत्तरे पक्षसि विशेषोऽभिहितः । अथ पञ्चमे मात्सर्येण प्रवृत्तयोर्द्वयोर्गवामयनयोर्विशेषोऽभिधीयते[1] ।

तमिमं विधत्ते-

यदि सोमाविति । यदि कदाचिद्यजमानसंघयोरुभयोः परस्परमात्सर्येण गवामयनगतौ सोमौ संभूयाभिषुतौ स्यातां तदानीं महारात्रे बुद्ध्वा प्रातरनुवाकनामकस्य शस्त्रस्योपाकरणं कुर्यात् । प्रातर्यावभ्यो देवेभ्य इत्यादिसंप्रैषमध्वर्युः पठेदित्यर्थः । यो यजमानसंघः पूर्वं प्रवृत्तः सन्नुपाकरोति सोऽन्यस्य संघस्य वागादीन्वृङ्क्त आदत्ते ।

तस्मिंश्च प्रातरनुवाके ऋग्विशेषं विधत्ते-

वृषण्वतीमिति । प्रकृतावापो रेवतीः क्षयथा हि वस्व इत्येषा प्रथमा । इह तु तां परित्यज्य वृषन्शब्दवतीमन्यामृचं प्रथमां कुर्यात् । तथा सति स एवान्येषां यजमानानां देवतारूपमिन्द्रं प्रातःसवनादपनयति ।

पक्षान्तरमाह-

अथो खल्वाहुरिति । त्रयाणामपि सवनानां प्रारम्भे सेयं वृषण्वती पठनीयेत्येवं केचिदाहुः । तथा सति परेषां सर्वसवनारम्भादिन्द्रमपसारयति ।

अथ तत्राभिभूतिहोममन्त्रान्पश्च पठति-

---

१ क. °ते-य° ।

(मात्सर्यप्रवृत्तगवामयनद्वयविशेषाभिधानम्)

संवेशायेति। संवेशाय गायत्र्यादीनां छन्दसां स्वकीययज्ञे सम्यक्प्रवेशाय। उपवेशाय प्रविष्टानां चात्र स्थिरावस्थितये। गायत्र्या अभिभूत्यै परकीयस्य गायत्रीछन्दसोऽभिभवाय स्वाहुतामिदमस्तु। त्रिष्टुभ इत्यादिभिश्चतुर्भिः पदैरुत्तरे चत्वारो मन्त्रा भिद्यन्ते। तेषु संवेशायोपवेशायेत्येतदनुषञ्जनीयम्। प्रथममन्त्रे त्वभिभूत्यै स्वाहेत्येतदनुषज्यते।

मन्त्राणां तात्पर्यं व्याचष्टे—

छन्दाꣳसि वा इति। योऽयं संवेशो यश्चोपवेशस्तावुभौ छन्दोविषयत्वाच्छन्दांस्येव तथा सति स्वकीयैश्छन्दोभिरितरेषां छन्दांसि विनाशयति।

अथ शस्त्रविशेषान्विधत्ते—

सजनीयमिति। यो जात एव प्रथमो मनस्वानिति सूक्ते स जनास इन्द्र इत्येवं सजनशब्दस्य विद्यमानत्वात्तत्सूक्तं सजनीयम्। निष्केवल्यशस्त्र इन्द्रस्य नु वीर्याणीत्यस्य स्थाने सजनीयसूक्तं शंसनीयम्। ममाग्ने वर्चो विहवेष्वस्त्विति सूक्ते विहवशब्दसद्भावात्तद्विहव्यम्। तच्च महावैश्वदेवशस्त्र आ नो भद्रा इत्यस्य स्थाने शंसनीयम्। कया शुभा सवयस इत्येतत्सूक्तमगस्त्येन दृष्टत्वादगस्त्यस्य कयाशुभीयं मरुत्वतीयशस्त्रे जनिष्ठा उग्र इत्यस्य स्थाने शंसनीयम्। यद्वा तत्तच्छस्त्रादौ शस्त्रात्पुरा यथोक्तं सूक्तजातं पठनीयम्। एतदुक्तं सूक्तत्रयं यावदस्त्येतावदेव सारम्। एतत्पाठे तु परेषां यावत्सारमस्ति तत्सर्वं विनाशयति।

अथ नैमित्तिकं स्तोत्रविशेषं विधत्ते—

यदि प्रातःसवन इति। यदि प्रातःसवनकाले द्रोणकलशो दीर्येत विदीर्णो भवेत्तदानीं स्तोतारः सामगा विष्णुदेवताकासु शिपिविष्टशब्दयुक्तास्वृक्षु स्तुतिं कुर्युः। यज्ञस्य संबन्धि यदङ्गमतिरिच्यते शस्त्रीयं क्रममुल्लङ्घ्य वर्तते तदङ्गं शिपिविष्टगुणविशिष्टं विष्णुमभिलक्ष्यातिरिक्तं भवति। पशवः शिपिरिति श्रुत्यन्तराच्छिपिशब्दः पशुवाची। तेषु स्वामित्वेन प्रविष्टः शिपिविष्टः। तच्चातिरिक्तमङ्गं शिपिविष्टो विष्णुरेव। तत्स्वामिकत्वात्। ततो वैष्णवीषु स्तुतौ[1] सत्यामतिरिक्तस्वामिन्येव विष्णावतिरिक्तमङ्गं स्थापयति। अपि चातिरिक्तस्वामिनैव विष्णुनाऽतिरिक्तमयथाशास्त्रमङ्गमाप्त्वा शास्त्रीयं कृत्वा सत्रफलं लभते।

---

१ क. ध. ङ. च. °तौ तस्याम°।

अथ द्वितीयतृतीयसवनयोर्विशेषं विधत्ते-

यदि मध्यंदिन इति । द्वितीयतृतीयसवनयोर्दोणकलशे भिद्येते यदि वषट्कारनिधनं साम कुर्युः । निधनं साम्नः पञ्चमो भागः । वषट्शब्दो निधनं सामभक्तिविशेषो यस्य साम्नस्तादृशं साम कुर्युः । वषट्कारो हि हविर्यज्ञसाधनत्वाद्यज्ञस्य समाप्तिस्थानम् । तद्युक्तसामगानेनैव प्रतिज्ञामेवैनत्तत्र गमयन्ति अनेकल्येन समापयन्ति । यदि तृतीयसवने कलशो भिद्येत तदाऽप्येतदेव । अथ वत्साम तस्यैतदेव वषट्कारनिधनमेव साम कुर्युः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाक) ।

षड्भिर्मासान्त्संपाद्याहरुत्सृजन्ति षड्भिर्हि मासान्त्संपश्यन्त्यर्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासेभिर्हि मासान्त्संपश्यन्त्यमावास्यया मासान्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति यो वै पूर्णं आसिञ्चति परा स सिञ्चति यः पूर्णादद्यति (१) प्राणमस्मिन्त्स दधाति यत्पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तत्प्राणं दधाति तदनु सत्रिणः प्राणन्ति यदहर्नोत्सृजेयुर्यथा हातिरुपनद्धो विपतत्येव॰ संवत्सरो वि पतेदार्तिमार्छेयुर्यत्पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधाति तदनु सत्रिण उत् (२) अनन्ति नाऽऽर्तिमार्छन्ति पूर्णमासे वै देवानाॅ॰ सुतो यत्पौर्ण-

(गवामयनगुणविकारस्योत्सर्गाभिधानम्)

मास्था मासान्त्संपाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति यत्षडहसंततꣳ सन्तमथाहरुत्सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एतं सर्वनाम्नेऽहः (३) उत्सृजन्ति तुरीयं खलु वा एतत्सवनं यत्सौनाभ्यं यत्सौनाभ्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतत्सोमपीथा ह्येतर्हि यथायतनं वा एतेषाꣳ सवनभाजो देवता गच्छन्ति येऽहरुत्सृजन्त्यनुसवनं पुरोडाशानिर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्धतेऽष्टाकपालान्प्रातःसवन एकादशकपालान्माध्यंदिने सवने द्वादशकपालाꣳस्तृतीयसवने छन्दाꣳस्येवाऽऽप्त्वाऽवं रुन्धते वैश्वदेवं चरुं तृतीयसवने निर्वपन्ति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति (४) ॥

(उदचत्युद्येऽहंराप्त्वा पञ्चदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाके गवामयनप्रसङ्गेन सत्रविषये मासस्थविशेषोऽभिहितः । अथ षष्ठे गवामयनस्य गुणविकाररूप उत्सर्गोऽभिधीयते—

षडहैर्मासानिति । येऽभिप्लवषडहास्तैः पञ्चकृत्व आवृत्तैरेकं मासमनुष्ठायान्तरे मासे प्रथमदिने कर्तव्यं ज्योतिरात्र्यमहरुत्सृजेयुः । यदा चतुर्भिरभ्यस-

वैरेकेन पृष्ठ्येन च मासं समाप्योत्तरमहरुत्कृष्टव्यम् । यस्माल्लोकेऽपि पञ्चभिः षडहैस्त्रिंशद्दिनानि गणयित्वा सावनमासोऽयमिति निश्चिन्वन्ति ।

पक्षान्तरं विधत्ते—

अर्धमासैरिति । पूर्वस्मिन्पक्षे प्रायणीयारम्भणीयावहर्विशेषौ द्वौ परित्यज्य तृतीयदिने षडहस्याऽऽरम्भः । तदाऽऽरभ्य त्रिंशद्दिनात्मके सावनमासे गते सति तत ऊर्ध्वमहरुत्सृष्टव्यम् । इदानीं प्रायणीयादिनमारभ्य पञ्चदशदिनात्मकाभ्यां द्वाभ्यामर्धमासाभ्यामेकं मासं समाप्य तदनन्तरमाद्यहरुत्सृष्टव्यम् । लोके हि द्वाभ्यामर्धमासाभ्यामेको मासो निष्पद्यत इत्येवमर्धमासैरेव मासस्वरूपं निश्चिन्वन्ति । तदिदं पक्षद्वयं सावनमासाभिप्रायम् ।

अथ चान्द्रमासाभिप्रायेण पक्षद्वयम् । तत्रैकं पक्षमाह—

अमावास्ययेति । चान्द्रमसदर्शिन केचिदमावास्यया माससमाप्तिं निश्चिन्वन्ति । अतोऽत्रापि तथैव मास समाप्य शुक्लप्रतिपदि यदहरनुष्ठेयं तत्परित्याज्यम् ।

चान्द्रमसमाश्रित्यैव पक्षान्तरमाह—

पौर्णमास्येति । शुक्लप्रतिपदमारभ्यामावास्यान्तश्चान्द्रो मास इत्यतीतः पक्षः । कृष्णप्रतिपदमारभ्य पौर्णमास्यन्त इत्ययं पक्षः । एतस्मिन्पक्षे कृष्णप्रतिपदि यदहः प्राप्तं तदुत्सृष्टव्यम् ।

एतमेव पक्षं प्रशंसति—

यो वै पूर्ण इति । लोके हि यः कोऽपि पुरुषो घृतक्षीरादिना पूर्णे पात्रे पुनरप्युपरि तद्द्रव्यमासिञ्चति, स भूमौ पातयित्वा तद्द्रव्यं विनाशयति । यस्तु धीमान्पूर्णात्पात्रादुदचति स्वल्पमुद्धरति सोऽस्मिन्पात्रे प्राणरूपं वायुं दधाति । सति ह्यवकाशे वायुः संचरति । एवं सति यदि यजमानास्तत्तत्पौर्णमास्यां तं तं मासं पूरयित्वा कृष्णप्रतिपदि कर्तव्यमहरुत्सृजेयुः, तदानीं संवत्सरसत्ररूपपुरुषार्थं प्राणवायुं तस्मिन्दिने स्थापयन्ति । तत्संवत्सरप्राणस्थापनमनु सत्रिणो यजमाना अपि श्वासनिरोधाभावेन जीवन्ति ।

अथ व्यतिरेकमुखेनै(जै)तमेव पक्षं प्रशंसति—

यदहरिति । उक्तन्यायेनाहन्यनुत्सृष्टे सत्युदकपूर्णो दृतिर्दृढं बध्यमानोऽपि यथा द्वैधीभावेन नश्यति, एवं संवत्सरात्मकः क्रतुर्विनश्येत्, यजमानाश्च मरणं प्राप्नुयुः । तत्परिहारार्थमहन्युत्सृष्टे सति तेनोत्सर्गेण संवत्सरसत्रस्याविनाशार्थं

(गवामयनगुणविकाररूपोत्सर्गाभिधानम्)

प्राणसंचारस्थानीयमुदानं संपादयन्ति । तत्संपादनमनु सत्रिणोऽप्युदनन्ति उच्छ्वसन्ति ततो नाऽऽर्तिं गच्छन्ति ।

पुनः प्रकारान्तरेणैतमेव पक्षं प्रशंसति—

पूर्णमास इति । पौर्णमास्यामेव प्रकृतौ देवानां संबन्धी सोमोऽभिषुतो भवति । अतः पौर्णमास्यां मासं पूरयित्वा पश्चादहरुत्सर्गे सति देवानां संबन्धिना तेन पूर्वयागेन(ण) संयोजयितुमिमं यज्ञं यजमानाः प्रत्यवरोहन्ति ।

यस्मिन्दिने कर्तव्यमहरुत्सृज्यते तस्मिन्दिने कर्तव्यमन्यद्विधत्ते—

वि वा एतद्यज्ञामिति । षडहैरभिप्लवषष्ठ्यरूपैः सातत्येन वर्तमानं यज्ञमुपेत्य यद्यहरुत्सृजेयुरेतेन यज्ञं विच्छिन्दन्त्येव, तत्परिहाराय प्राजापत्यं मशुमालभेरन् । प्रजापतिश्च स्रष्टृत्वात्सर्वदेवतात्मकः । अतो देवताभिरेव यज्ञं संतर्तं कुर्वन्ति ।

अथ तत्र कर्तव्यान्तरं विधत्ते—

यन्ति वा एत इति । ये यजमाना अहरुत्सृजन्ति ते सवनादपगच्छन्ति । प्रातःसवनादेरनुष्ठानाभावात् । तत्र क उपाय इति तदुच्यते—यत्सांनाय्यमस्ति तत्प्रातःसवनादिभ्यस्त्रिभ्योऽप्यतिरिक्तचतुर्थसवनस्थानीयम् । अतः सांनाय्येऽनुष्ठिते सवनान्नापगच्छन्ति ।

तस्य सांनाय्यशेषस्य सोमवदुपाह्वानपूर्वकं भक्षणं विधत्ते—

समुपहूयेति । उत्सृष्टेऽह्नि मुख्यसोमाभावादेतस्मिन्काले यजमाना एतत्सोमपीथा एतदेव सांनाय्यशेषभक्षणं सोमपीथः सोमपानं येषां ते तादृशाः । तस्मात्सोमवत्परस्परमभिज्ञाप्य भक्षयेयुः ।

पुनरपि कर्तव्यान्तरं विधत्ते—

यथायतनमिति । ये यजमाना अहरुत्सृजन्ति, एतेषां संबन्धिन्यः सवनभाजो देवताः सवनाभावान्निराशाः सत्यः स्वस्वस्थानं गच्छन्ति । अतस्तस्मा भूदिति तत्तत्सवनस्थाने पुरोडाशान्निर्वपेयुः । तेन तत्तत्स्थानात्तास्ता देवताः प्राप्नुवन्ति ।

तेषु पुरोडाशेषु विशेषं विधत्ते—

अष्टाकपालानिति । अष्टत्वादिसंख्यासाम्याद्गायत्र्यादिच्छन्दःप्राप्तिः ।

पुनरपि कर्तव्यान्तरं विधत्ते—

(अहरुत्सर्गविशेषाभिधानम्)

वैश्वदेवं चरुमिति । तृतीयसवनस्य वैश्वदेवत्वमन्यत्र स्पष्टमाम्नातम्—'ब्रह्मणां प्रातःसवनꣳ रुद्राणां माध्यंदिनꣳ सवनं विश्वेषां देवानां तृतीयसवनम्' इति । अतो वैश्वदेवचरुणा तृतीयसवनान्नापगच्छन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टक पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

उत्सृज्यां ३ नोत्सृज्या ३मिति मीमाꣳसन्ते ब्रह्मवादिनस्तदाहुरुत्सृज्यमेवेत्यमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि यज्ञं वहत इति ते त्वाव नोत्सृज्ये इत्याहुर्ये अवान्तरं यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष वै मासो विशीर इति नाऽऽदिष्टम् (१) उत्सृजेयुर्यदादिष्टमुत्सृजेयुर्याद्दशे पुनः पर्याप्लावे मध्ये षड्हस्यं संपद्येत षड्हैर्मासान्त्संवाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुस्तदमये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालममेर्वै वसुमतः प्रातःसवनं यदमये वसुमते पुरोडाशमष्टाकपालं निवपन्ति देवतामेव तद्भागिनीं कुर्वन्ति (२) सवनमष्टाभिरुपयन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न व्यावयन्तीन्द्रस्य वै मरुत्वतो माध्यंदिनꣳ सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति

(अहरुत्सर्गविशेषाभिधानम्)

देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभि-
रुप यन्ति विश्वेषां वै देवानामभूमतां तृतीयस-
वनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता
एव तद्भागिनीः कुर्वन्ति सवनं द्वादशभिः (३)
उप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै
प्रजापतिर्यज्ञस्यानुसर्गायाभिवर्त इतः षण्मासो
ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव त-
त्सुवर्गं लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव
ह्येतः सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता
पुत्रेभ्यो यथा । शिक्षा नो अस्मिन्पुरुहूत यामनि
जीवा ज्योतिरशीमहीत्यमृतं आयताꣳ षण्मासो
ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्यो-
तिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति
(४) ॥

(नाऽऽदित्यं कुर्वन्ति द्वादशमिरिति विꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाकेऽहरुत्सर्ग उक्तः । सप्तमे तत्रैव विशेषोऽभिधीयते ।
तत्र निर्णयाय कंचिद्विचारं दर्शयति—

उत्सृज्यामिति । उत्सर्गपक्षे यज्ञविच्छेदः, अनुत्सर्गपक्षे श्वासनिरोध इति दोषद्वयं मनसि निधाय बलवादिनो विचारयन्ति । प्लुतिर्विचारार्था । तत्रा-
भिज्ञाः प्राजापत्यपश्वादिभिर्विच्छेदस्य समाधातुं शक्यत्वाच्छ्वासनिरोधपरिहा-
रायोत्सर्जनपक्षमेवात्र निश्चितवन्तः ।

तमेव दिनविशेषं दर्शयति—

अमावास्यामिति । एतयोरमावास्यापौर्णमास्योर्यज्ञवाहित्वं प्रसिद्धम् । तथाचान्यत्र स्पष्टमाम्नायते— 'ते अब्रूतां वरं वृणावहा आवं देवानां भागधे असाव' इति । अतस्तयोस्तिथ्योर्यदहर्यदहः प्राप्तं तदुरुसृज्यमित्येषां निर्णयः।

अथान्येषां पक्षमाह—

ते त्वाहेति । ये पौर्णमास्यमावास्ये अवान्तरं यज्ञं भेजाते ते सर्वथैव नोत्सृज्ये । न केवलमेते प्रकृतिरूपं दर्शपूर्णमासकर्मैव निष्पादयतः, किं त्वपनादिगतमवान्तरं कर्मापि । तस्मात्तयोरुत्सर्गो न युक्त इति ।

तर्हि कस्मिन्दिनेऽहरुत्सर्ग इत्याशङ्क्य तेषां वचनं दर्शयति—

या प्रथमेति । व्यष्टकाशब्देन कृष्णपतिपदुच्यते, राजसूयप्रकरणे व्युष्टिद्विरात्रे पौर्णमास्या सह निर्देशात् । तथा चाऽऽम्नायते—'पौर्णमास्यां पूर्वमहर्भवति । व्यष्टकायामुत्तरम्' इति । तत्र या व्यष्टकाया यत्प्राप्तमहस्तदुत्सृज्यम् । एष दिनविशेषो विशरो विशीर्णो मासः, पौर्णमास्यामेव पूर्वमासस्य समाप्तत्वात् । अतो मासविच्छेदाभावाच्च युक्त उत्सर्गः । तस्यास्तु व्यष्टकायाः प्राथम्यं कृष्णप्रतिपदादित्वादुपपद्यते ।

क्वचिदुत्सर्गमपवदति—

नाऽऽदिष्टमिति इति । विषुवान्महाँ अनिति नामग्रहणपुरःसरं विशेषाकारेण यदुच्यते तदादिष्टम् । तत्रोत्सृष्टव्यम् । यत्तु षडहादिद्वारा सामान्यतः प्राप्तं तदेवोत्सृष्टव्यम् । यदाऽनुत्सर्गपक्षमेव वै मास इत्यादिना स्थिरी करोति । योऽपमुत्सर्गः स एव विशरो मासो भवति । अहरुत्सर्गे सति मासस्यापूर्णत्वान्मासस्य विशीर्णत्वम् । इतिशब्दो हेत्वर्थः । यस्मान्मासवैकल्यं प्रामोति तस्मादादिष्टं शास्त्रेणोपदिष्टमहरेकमपि नोत्सृजेयुरितिपक्षान्तरस्वीकारः । अत एव सूत्रकारः पक्षद्वयस्वीकारमुपन्यस्योत्सर्गपक्षेऽनुष्ठेयविशेषमुदाजहार—' उत्सृज्या३ नोत्सृज्या३मित्युक्तं यद्यहान्युत्सृजेयुः प्रथमं पृष्ठं संस्थाप्य ' इत्यादिना ।

तमिमं विशेषं वक्तुमत्राप्युत्सर्गं पाक्षिकं पुनर्विशदयति—

यदादिष्टमिति । यदि शास्त्रोपदिष्टस्याप्युत्सर्गापेक्षा तदानीमपि यादृशे यादृशमहर्ज्योतिरादिकं पुनः पुनः पर्यावर्तमाने षडहस्य मध्ये संपद्यते, तादृशमेवोत्सृजेत् । नतु प्रतिपदोक्तं विषुवदादिकमित्यभ्याहरणीयम् । तस्मादभिप्लव-

(अहरुत्सर्गविशेषाभिधानम्)

पृष्ठ्याख्येः षड्हैर्मांसं पूरयित्वा पृष्ठ्यषडहादूर्ध्वभावि यत्सप्तममहस्तस्मिन्नहनि प्राणं ज्योतिर्याग्मुत्सृजेत्।

इत्थमुत्सर्गं विशदीकृत्य तत्रानुष्ठेयं विशेषं विशदयति—

तदग्नये वसुमत इति। तत्तस्मिन्नुत्सर्गदिने चत्वारि हवींषि निर्वपेयुः।

तत्र प्रथमं हविः प्रशंसति—

अग्नेर्वा इति। देवतां वसुमन्तमग्निं, कपालगताष्टत्वसंख्यया गायत्रीद्वारा सवनप्राप्तिः।

द्वितीयं हविः प्रशंसति—

यदैन्द्रं दधीति। अथ तृतीयं हविः प्रशंसति—

इन्द्रस्येति। यथा वसुमानग्निः प्रातःसवनस्य स्वामी तथा मरुत्वानिन्द्रो माध्यंदिनस्य सवनस्य स्वामी। वसुमतोऽग्नेस्तत्स्वामित्वं श्रुत्यन्तरदृष्टयादवगन्तव्यम्—'तꣳ स्तुतं देवताश्चाऽऽगृह्णन, अग्निः प्रातःसवनम्, इन्द्रो माध्यंदिनꣳ सवनं, विश्वे देवास्तृतीयसवनम्' इत्येका श्रुतिः। 'यद्वसूनां प्रातःसवनम्' इत्यपरा श्रुतिः। 'यस्मिन्निन्द्रो माध्यंदिनसवनस्वामी स तु मरुत्वान्। 'इन्द्र मरुत्व इह पाहि सोमम्' इति श्रुत्यन्तरात्। तत्राग्नेर्यथा प्रथमेन हविषा भागित्वमेवमिन्द्रस्याप्यनेन हविषा भागित्वम्। कपालगतैकादशसंख्यया त्रिष्टुब्द्वारा सवनप्राप्तिः।

अथ चतुर्थं हविः प्रशंसति—

विश्वेषां वा इति। विश्वेषां देवानां तृतीयसवनस्वामित्वं पुरोदाहृतम्। प्रभुमत्त्वमप्यूभूर्णां तृतीयसवनदेवत्वादवगन्तव्यम्। तच्च तृतीयस्य सवनस्यभूमतो विभुमत इत्यादिमन्त्रादवगम्यते। ताश्च देवता अनेन हविषा भागिन्यः। कपालगतद्वादशसंख्यया जगतीद्वारा सवनप्राप्तिः।

अथ पूर्वानुवाकोक्तं प्राजापत्यं प्रशंसति—

प्राजापत्यमिति। यज्ञस्य प्रजापतिसृष्टत्वात्तद्रूपत्वम्। अननुत्सर्गोऽपरित्यागः। उत्सृष्टेऽप्यहनि प्राजापत्येन यज्ञोऽपरित्यक्तो भवति।

अथ पूर्वस्मिन्पक्षासि ब्रह्मसाम विधत्ते—

अभिवर्त इत इति। गवामयनविकृतित्वादस्याप्युत्सर्गेणामयनस्य द्वे पक्षसी। तत्र प्रथमेन पक्षसा स्वर्गप्राप्तिः। द्वितीयेन पक्षसा पुनर्भूलोकप्राप्तिः।

(सामविशेषकथनम्)

एवं व्यवस्थायां सत्यामितो भूलोकादभिगंस्य स्वर्गं गच्छतां यजमानानामानुकूल्येन पूर्वे पक्षसि षडपि मासाञ्छैरन्तर्येण प्रतिदिनमभिवर्तारूपं बलसामं भवेत्। तथा सत्यभिवर्तसाम्नो बलरूपत्वाद्बलसामत्वेन च स्वर्गाभिमुख्यं गच्छन्तः स्वर्गं प्राप्नुवन्ति।

अथोत्तरस्मिन्पक्षस्यन्यद्बलसाम विधत्ते—

इन्द्र क्रतुं न इति। अमुतः स्वर्गलोकादायतां भूलोकं प्रत्यागच्छतां यजमानानामानुकूल्येनोत्तरस्मिन्पक्षसि षडपि मासाञ्छैरन्तर्येण प्रतिदिनमिन्द्र क्रतुं न इत्यस्यामृचि यदुत्पन्नं तद्बलसामं भवेत्। तस्या ऋचोऽयमर्थः—हे इन्द्र नोऽस्मदर्थमिमं क्रतुमाहर। तत्र दृष्टान्तः—यथा लोके पिता पुत्रेभ्यो भागमाहृत्य प्रयच्छति तद्वत्। हे पुरुहूतेन्द्रास्मिन्ननुष्ठीयमाने यागनि क्रतुविशेषरूपे निषत्ते शिक्ष हितोपदेशं कुरु। वयं त्वत्प्रसादाज्जीवा जीवन्तो ज्योतिः प्रकाशरूपं मनुष्यलोकमशीमहि प्राप्नुयामेति। अस्यामृचि ज्योतिःशब्देन भूलोकस्वभावप्रकाशविवक्षिताः। तथा सत्येतदीयसामप्रयोगेणेमं भूलोकं ज्योतिषा पश्यन्तः प्राप्नुवामेति वाचा वदन्तश्चाऽऽगच्छन्ति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः)।

देवानां वा अन्तं जग्मुषामिन्द्रियं वीर्यमपाक्रामत्तत्कोशेनावारुन्धत तत्कोशस्य कोशत्वं यत्कोशेन चात्वालस्यान्तं स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं वीर्यमव रुन्धते सत्रस्यर्ष्याऽऽहवनीयस्यान्तं स्तुवन्त्यग्निमेवोपद्वारं कृत्वर्धिमुप यन्ति प्रजापतेर्हृदयेन हविर्धानेऽमुतः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति श्लोकेन पुरस्तात्सदसः (१) स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लो-

(सामविशेषकथनम्)

कृभाजो भवन्ति नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दधत्यप्रतिहताभिरुद्गायति तस्मात्पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यञ्चति शिर एव न पञ्चदश स्यंतरं भवतीन्द्रियमेवार्ध रुन्धते सप्तदशम् (२) बृहद्रथन्तरयोरवरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशं भद्रं द्विपदासु प्रतिष्ठित्यै पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा असृजत सोऽकामयताऽऽमाꣳहꣳ राज्यं परीयामिति तासाꣳ राजनेनैव राज्यं पर्यैत्तद्राजनस्य राजनत्वं यद्राजनं भवति प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविꣳशं भवति प्रजापतेः (३) आप्त्यै पञ्चाभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना मनुष्यलोकमेवाभि जयन्ति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयाऽस्तुतया समार्यन्ति दिग्भ्य एवान्नाद्यꣳ सं भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यम् (४) संभृत्य तेज आत्मन्धत्ते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिरः उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामु-

(सामविशेषकथनम्)

क्षमा भवन्त्यासन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कुर्ग्वावध्वर्युर्बन्धनस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रतिं तिष्ठन्त्यथो आक्रमणमेव तत्सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्टयै (५) ॥

(सदसः सप्तदशं प्रजापतेर्गायति दिग्भ्य एवान्नाद्यं प्रत्येकादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

उत्तर्णिग्रामयनं सप्तमे भीमांसया निर्णीतम् । तावता विकृतिं समाप्याथ प्रकृतावेव गवामयने यन्महाव्रतमस्ति तस्मिन्ननानुवाकत्रयेण विशेषाः केचिदुच्यन्ते । तत्रास्मिन्नष्टमे सामविशेषाः केचिदुच्यन्ते ।

प्रथमं तावत्कोशाख्यं साम विधत्ते—

देवानां वा अन्तमिति । पुरा कदाचिद्देवानां सत्रसमाप्तिं प्राप्तवतामिन्द्रियं तत्सामपूर्वं चापक्रान्तम् । तच्च देवाः कोशाख्येन साम्ना पुनः प्राप्तवन्तः । कुश आह्वान इत्यस्माद्धातोरुत्पन्नः कोशशब्द आह्वानसाधनमाचष्टे । तस्मादुपगतवीर्यस्याऽऽह्वानसाधनत्वादेतस्य साम्नः कोश इति नामधेयम् । तेन कोशाख्येन साम्ना चात्वालसमीपे स्तुतिं कुर्युः । तेन यज्ञसमाप्तिं प्राप्येन्द्रियसामर्थ्यं प्राप्नुवन्ति ।

अथ सत्रस्य ऋद्धिनामकं सामान्तरं विधत्ते—

सत्रस्यर्ध्नोति । यत्सत्रस्यर्धिनामकं साम तेनाऽऽहवनीयसमीपे स्तुतिं कुर्युः । तथा सत्यग्निमेव स्तुतेः साक्षिणं कृत्वा समृद्धिमेव प्राप्नुवन्ति ।

सामान्तरं विधत्ते—

प्रजापतेरिति । प्रजापतेर्हृदयमिति कस्यचित्साम्नो नामधेयम् । तेन हवि-

(सामविशेषकथनम्)

धानस्यान्तः स्थित्वा स्तुतिं कुर्युः । तेन च स्तोत्रेणास्य प्रजापतेः प्रीतिं गच्छन्ति ।

अन्यत्सामद्वयं विधत्ते—

श्लोकेन पुरस्तादिति । श्लोकानुश्लोकशब्दौ सामविशेषनामनी । ताभ्यां सदस उभयतः स्तुतिं कुर्युः । तेन च यज्ञमाप्तिं प्राप्य कीर्तिभाजो भवन्ति ।

तत्रानुश्लोके कंचिद्विशेषं विधत्ते—

नवभिरिति । अस्य साम्न आधारभूताः स्तोत्रिया ऋचो नवसंख्याकाः । गानकर्ता चाध्वर्युर्न तूद्गाता । पुरुषशरीरे नवच्छिद्रवर्तित्वेन प्राणानां नवसंख्याकत्वात्तान्सर्वान्यजमानेषु स्थापयति ।

तास्वृक्षु कंचिद्विशेषं विधत्ते—

सर्वा ऐन्द्रिय इति । इन्द्रो देवता यासां ता ऐन्द्रियः । तथाविधा एव नवसंख्याकाः सर्वा अपि कार्याः । तेन प्राणेषु सामर्थ्यं स्थापयन्ति ।

तास्वृक्षु प्रतिहारभागं निषेधति—

अप्रतिहृताभिरिति । ऋचि गीयमानस्य साम्नः पञ्च भागा हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्याः । तेषु प्रतिहारभागं वर्जयित्वा तदर्हिताभिरेव पूर्वोक्ताभिर्नवभिर्गायेत् । यस्मादत्र प्रतिहारो वर्जितस्तस्माल्लोकेऽपि पुरुषः शरीरव्यतिरिक्तानि हस्तपादादीन्यङ्गानि प्रत्यचति प्रत्याहृतानि संकुचितानि करोति । शिर एव त्वेकं संकुचितं न करोति । न हि हस्तपादिवदेतद्गर्दभिवच्छिरः प्रतिहर्तुं शक्यते । तस्माच्छिरस्थानीयाध्वर्युगाने प्रतिहारो वर्जनीयः ।

अथ तस्य गानस्याभितः स्तोमद्वयविशिष्टं सामद्वयं विधत्ते—

पञ्चदशमिति । पञ्चदशस्तोमकं रथंतरं साम्नैकतो गायेयुः । तेन पञ्चदशस्थेन्द्रेण सहोत्पन्नत्वादिन्द्रियप्राप्तिर्भवति । तथा सप्तदशस्तोमयुक्तं बृहदन्यतो गायेयुः । सप्तदशस्यान्नप्रजाहेतुत्वात्तत्प्राप्तिः । यथा पक्षिणो द्वौ पक्षावेवमेतद्गानद्वयं द्रष्टव्यम् । अत एवान्यत्राऽऽम्नातम्—'पञ्चदशोऽन्यः पक्षो भवति । सप्तदशोऽन्यः' इति ।

अथ स्तोमसामविशेषमृग्विशेषेषु विधत्ते—

एकविꣳशं भद्रमिति । एकविंशः स्तोमविशेषः । भद्रशब्दः सामविशेषस्य नामधेयम् । पादद्वयोपेता ऋचो द्विपदाः । तेन पादद्वित्वेन पविष्टा भवति ।

एतस्य मद्रसाम्नः समीपे पत्नीगानं विधत्ते—

पत्नय उपेति। यजमानानां याः पत्नयस्ताः सर्वा भद्रारूपसामगानस्य समीपे स्वयमपि गायेयुः। पुरुषाणां पत्नीनां च गानेन मिथुनं(नत्वे) पत्न्याः प्रजोत्पत्तिर्भवति।

अथ सामान्तरं विधत्ते—

प्रजापतिरिति। राजनमिति सामविशेषस्य नामधेयम्। राज्यसाधनत्वात्तस्य राजनत्वम्। तत्सामप्रयोगेण यजमाना राज्यं प्राप्नुवन्ति।

तत्रैव स्तोमविशेषं विधत्ते—

पञ्चविꣳशमिति। प्रजापतेः पञ्चविंशस्तोमसृष्टृत्वात्तेन तत्प्राप्तिः।

तस्मिन्नेव पञ्चविंशस्तोमे कंचिद्विशेषं विधत्ते—

पञ्चमिरिति। पञ्चविंशाख्यस्तोमे या आद्याः पञ्च स्तोत्रियास्ता ऋत्विभिरुत्थितैः पठनीयाः। याश्चानन्तरभाविन्य ऋसंख्यास्ता आसीनैर्गातव्याः। तेन लोकद्वयप्राप्तिः। दशसंख्यया विराड्द्वाराऽन्नप्राप्तिः।

आसीनगाने कंचिद्विशेषं विधत्ते—

पञ्चधेति। पञ्चभिः प्रकारैः स्थानविशेषेषूपविश्य स्तुवन्ति। ऊर्ध्वया सह दिशां पञ्चत्वाद्दिक्षु प्रतिष्ठा।

तत्रैवान्यं विशेषं विधत्ते—

एकैकयेति। पञ्चसु स्थानेषूपवेशनकाले कश्चिदुद्गाता प्रथममुपविशति। तदानीमितरे सर्वेऽप्यस्तुतया स्तोत्रियया समुद्गातारं समागत्योपविशन्ति। एवं तत्तत्स्थानेषु प्रथममेवोद्गातर्युपविष्टे सति तत्तदृचां स्तुतेः प्रागेव सर्वेऽप्युद्गातारमुपगच्छेयुः। तथा सति सर्वाभ्यो दिग्भ्योऽन्नं संपादयन्ति।

इतरेष्वागतेषूद्गातृकृत्यं विधत्ते—

ताभिरुद्गातेति। यां स्तोत्रियां पुरस्कृत्योद्गातारमागच्छन्ति तया स उद्गाता गायेत्। तथा सति दिग्भ्यः संहृतमन्नं तेजोरूपं सर्वेऽपि स्वात्मन्येव स्थापयन्ति। यस्मादत्र सर्वेषु स्थितेष्वेक एवोद्गाता गायति तस्माच्छरीरमध्येऽप्येक एव प्राणः सर्वाण्यङ्गानि रक्षति। अपि च यथा कश्चित्क्षिविशेष आकाश उत्पतिष्यन्स्वकीयं शिर ऊर्ध्वं कुरुते, एवमेव तेनोद्गातृगानेन प्रजानां मध्ये यजमाना उत्तमा भवन्ति।

अथ यजमानमृत्विजामाधारविशेषान्विधत्ते—

(सामविशेषकथनम्)

आसन्दीमिति। आसन्दी चतुर्भिः पादैरुन्नतैरुपेता खट्वाकारा। उद्गातुस्त्वदारोहणेन तर्हि यजमानाः साम्राज्यं देशाधिपत्यं गच्छन्ति। प्लेङ्खो दोला, वां होता तमारोहति। तेन सर्वेऽपि स्वर्गमारोहन्ति। कूर्चौ दर्भविशेषौ, तावध्वर्युरारोहति। तेन ब्रध्नस्याऽऽदित्यस्य विष्टपं स्थानं गच्छन्ति। साम्राज्यस्वर्गादित्यस्थानरूपा ये लोका एतावन्त एवापेक्षिता देवलोकास्तेष्वनुक्रमेण प्रतितिष्ठन्ति। अपि च तेनाऽऽरोहणेन स्वर्गसमुद्रस्याऽऽक्रमणसाधनं सेतुं यजमानाः कुर्वते। तच्च स्वर्गप्राप्त्ये भवति।

अत्र मीमांसा। दशमाध्यायस्य चतुर्थपादे षष्ठाधिकरणे चिन्तितम्—

*ऋत्विजामुपगानं किमृत्विजां तन्निवर्तयेत्।
तेषामुच्चितं वा गानस्य शारीरत्वान्निवर्तनम्॥
स्वराभिव्यञ्जनं गानं ग्रहवत्तद्विधीयते।
वादित्रोपचयः साम्यात्सान्निध्याच्च समुच्चयः॥

महाव्रते श्रूयते—'पत्नय उपगायन्ति' इति। प्रकृतौ श्रूयते—'ऋत्विज उपगायन्ति' इति। तदेतदृत्विगुपगानं पत्न्युपगानेन निवर्तते। ननु प्रकृतावुद्गात्रा साम्नि गीयमाने सत्यृत्विजोऽन्ये सामैवोपगायन्ति। इह तु पत्नयो वादित्रं वादयन्तीति भिन्नविषयत्वान्नास्ति निवृत्तिः। नैवं, गानशब्दस्य शारीरे प्रसिद्धत्वात्। तस्मादृत्विजो निवर्त्य पत्नयः सान्निध्यादुपगायेयुरिति प्राप्ते ब्रूमः—गानशब्दस्य नाक्षरोच्चारणमर्थः, किंतु स्वराभिव्यञ्जनं, तच्च शरीरेण वादित्रेण वा सिध्यति। अत एव गानतत्त्वज्ञा आहुः—'दारवी गात्रवीणा च द्वे वीणे गानजातिषु' इति। तच्च गानं ग्रहन्यायेनापूर्वक्रियाविधानान्न प्रकृतिलिङ्गं स्यात्। एवं तर्हि गानोपचयवाचिन उपशब्दस्य वैयर्थ्यमिति चेन्न। वादित्रोपचयसंभवात्। अस्ति हि तत्र वादित्रनादः, 'दिक्षु दुन्दुभयो नदन्ति' इति श्रुतेः। पत्न्युपगानं च वादित्रनादः। 'काण्डवीणाभिरुपगायन्ति' इति श्रुतेः। अतः सादृश्यात्सान्निध्याच्च तदुपचयो युक्तः। तस्मादनिवृत्तेरुपगानयोः समुच्चयः।

तत्रैवान्यच्चिन्तितम्—

पाठ्यं श्लोकादिनाऽऽद्यादि न वाऽऽद्यः स्तुतिलिङ्गतः।
देशसाम्नोर्विधौ भेदो वैशिष्ट्यात्स्यात्समुच्चयः॥

---

* न्यायमालाविस्तरे त्वेताहृश्यानुपूर्वी न मिलति।

(शततन्तुवीणादिकथनम्)

महाव्रते श्रूयते—' श्लोकेन पुरस्तात्सदसः स्तुवन्त्यनुश्लोकेन पश्चात् ' इत्यादि । तत्र श्लोकानुश्लोकनामकैः सामभिः प्राकृतान्याज्यपृष्ठादिस्तोत्रगतानि रथंतरवामदेव्यादिनामकानि सामानि बाध्यानि । कुतः, स्तुवत इति प्रकृतिलिङ्गदर्शनात् । प्रकृतावाज्यैः स्तुतो पृष्टैः स्तुवत इति हि श्रुतम् । नैतत्सारम् । किमत्र स्तुतिमनूद्य देशसामगुणो विधीयते, किंवा गुणद्वयविशिष्टा स्तुतिः । नाऽऽद्यो वाक्यभेदापत्तेः । द्वितीये तु कार्यभेदेन बोधाभावात्समुच्चयः स्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः) ।

अर्कर्यण वै श्लक्ष्णाशः प्रजापतिः प्रजा असृजत ताभ्य इन्द्रेन्देरा लूतामवारुन्ध यदर्कर्यं भवति प्रजा एव यद्यजमानाः सृजन्त इन्द्रेन्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां लूतामव रुन्धते तस्माद्या२ समा२ सत्र२ समृद्धं क्षोधुकास्ता२ समाः प्रजा इष२ ह्यासामूर्जमादर्दते या२ समा२ व्यृद्धमक्षोधुकास्ता२ समाः प्रजाः (१) न ह्यासामिषमूर्जमादर्दत उत्कोदं कुर्वते यथा बन्धान्मुमुचाना उत्कोदं कुर्वत एवमेव तद्यजमानादेवबन्धान्मुमुचाना उत्कोदं कुर्वत इषमूर्जमात्मन्दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं धावन्त्यनभि-

---

१ ख. बाध्यामा° ।

(शततन्तुवीणादिकथनम्)

जितस्याभिजित्यै दुन्दुभीन्त्समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव (२) वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यवेमां वाक्प्राविशत्तामेवाव रुन्धतेऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वामां वाचमवरुद्ध्या आर्द्रे चर्मन्व्या यच्छते इन्द्रियस्यावरुद्ध्या आऽन्यः क्रोशति प्रान्यः शꣳसति य आक्रोशति पनायैवैनान्त्स यः प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च (३) वा एते देवकृतं च पूर्वैर्मासैरवं रुन्धते यद्भूतच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाय संवत्सरꣳ सपयन्त्यन्तर्वेदि मिथुनो सं भवतस्तेनैव मिथुनान्न यन्ति (४) ॥

(व्यृद्धमक्षोधुकास्ताꣳ सर्वा प्रजाः परमामेव च त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः)।

अष्टमे क्रोशसामादीन्युक्तानि । नवमे शततन्तुवीणादिकमुच्यते । तत्राऽऽदौ तावत्सामद्वयं विधत्ते—

अर्क्येण वा इति । अर्क्यमिति कस्यचित्साम्नो नामधेयं तेन प्रजापतिः पुरा बहुविधाः सहस्रसंघरूपाः प्रजा असृजत । इलान्दमिति सामान्तरस्य नामधेयम् । तेन साम्ना स्वसृष्टप्रजार्थं लुप्तामिरां पूर्वं विच्छिन्नमन्नमवारुन्ध पुनरप्यविच्छेदेन संपादितवान् । तद्यजमाना अपि सामद्वयेन प्रजाः सृष्ट्वा तदर्थमन्नं संपादयन्ति । यस्मादस्मिन्सत्रे साम्नाऽन्न संपाद्यते तस्माद्यां सभां सत्रं समृद्धं यस्मिन्संवत्सरे नैरन्तर्येण सत्रं समृद्धं प्रवृत्तं तां सभां प्रजाः क्षोधुकास्त-

(शततन्तुवीणादिकथनम्)

स्मिन्संवत्सरे नैरन्तर्येण क्षुधिताः प्रजाः सत्रिणां समीपे सर्वदिग्भ्यः समागच्छन्ति । सत्रिणो ह्यासां प्रजानां नानाविधमन्नं रसं च समादाय प्रयच्छन्ति । यस्मिंस्तु संवत्सरे सत्रं व्यूढं न प्रवृत्तं तस्मिन्संवत्सरे प्रजा अक्षोधुकाः क्षुधिताः काश्चिदपि नाऽऽगच्छन्ति । यस्मादासां प्रजानां व्रीह्याद्यन्नं क्षीरादिरसं च नैवाऽऽदाय प्रयच्छन्ति तस्मादनागमनम् ।

अथान्यदनुष्ठेयं विधत्ते—

उत्क्रोदं कुर्वत इति । हर्षनिमित्तो ह्यत्युच्चध्वनिरुत्क्रोदः । सर्वे यजमानाः सत्रसमाप्त्या संतुष्टा उत्क्रोदं कुर्युः । यथा लोके चिरं शृङ्खलाबद्धाः पुरुषास्तद्विमोके गच्छन्तो हर्षेणोत्क्रोदं कुर्वन्ति, एवमेव यजमानाश्चिरकालानुष्ठेयसत्ररूपाद्देवबन्धाद्विमोकं प्राप्नुवन्तः सत्रसामर्थ्येनान्नं रसं च स्वात्मनि संपादयन्ति । अत उत्क्रोदं कुर्वते ।

यदुक्तं सूत्रकारेण—' औदुम्बरस्य वीणादण्डस्य दशातिमथितान्येकैकस्मिन्नतिमथिते दश दश मौञ्जांस्तन्तून्प्रवयति स वाणः शततन्तुः ' इति, तदेवद्विधत्ते—

वाणः शततन्तुरिति । दशेन्द्रियाणां दशसंख्याकासु नाडीषु वृत्तिभेदेन शतसंख्या ।

उत्साहोपेतानां यजमानानां कांचिन्मर्यादां कृत्वा तत्पर्यन्तं धावनं विधत्ते—

आजिं धावन्तीति । यत्पूर्वमनभिजितमसंपादितं फलं तस्य संपादनायेदं धावनम् ।

उत्साहद्योतकमन्यद्विधत्ते—

दुन्दुभीनिति । दिक्षु स्थापिता ये दुन्दुभयस्तान्तम्बगाहन्युः । तोऽयं दुन्दुभिध्वनिः सर्वध्वनीनामुत्तमोऽत्युच्चत्वात् । तद्वादनेन तमारब्धमज्ञानां परमां वाचं प्राप्नुवन्ति ।

यदुक्तं सूत्रकारेण—' अपरेणाऽऽग्नीध्रमण्डपं भूमिदुन्दुभिमवटं खनन्त्यर्धमन्तर्वेद्यर्धं बहिर्वेदि तमार्द्रेण चर्मणोत्तरलोम्ना वितत्य शङ्कुभिः परिनिहत्याहैतत्पुच्छकाण्डमाहननार्थं निदधाति ' इति । तत्र तेन पुच्छकाण्डेनाऽऽहननं विधत्ते—

---

१ ग. सत्र समाप्य स° । २ ख. °स्तस्माद्बन्धाद्वि° ।

(शततन्तुवीणादिकथनम्)

भूमिदुन्दुभिमिति । भूमिदुन्दुभ्याद्यैस्तेन पार्थिवेषु द्रव्येषु परस्परसंघट्टनेन जन्याः शब्दविशेषाः स्वाधीना भवन्ति ।

यदुक्तं सूत्रकारेण—' उपाकृते पाह्नेन्द्रस्य स्तोत्रे सर्वा वाचो वदन्त्युत्कोदं यजमानाः कुर्वतेऽपघाटलकास्तुम्बुरुणा पिच्छोला इति पत्नयो वादयन्ति वीणाः शकुन्या नालोरुपाहिताः ' इति, तदेतद्विधत्ते -

सर्वा वाच इति । अपघाटादिकृताघातजन्या विशेषजन्या मनुष्यगवाश्वादिशब्दजन्याश्च ये शब्दविशेषास्ते सर्वेऽपि प्राप्नुवन्त्वित्यर्थः ।

अथ ब्राह्मणशूद्रयोश्चर्मनिमित्तं कलहं विधत्ते—

आर्दे चर्मन्निति । तेनाऽऽर्द्रचर्मनिमित्तेन कलहेन सामर्थ्यसंपत्तिर्भवति । कलहमकारस्तु सूत्रे विस्पष्टमुक्तः—' शूद्रार्यौ चर्मकर्ते व्यायच्छेते आर्दे श्वेते परिमण्डलेऽन्तर्वेदि ब्राह्मणो बहिर्वेदि शूद्र आक्रोशति शूद्रः प्रशंसति ब्राह्मण इमेऽस्तुरिमे सुभूतमक्रन्निति ब्राह्मण इम उद्वासीकारिण इमे दुर्भूतमक्रन्निति शूद्रस्तं ब्राह्मणः संजित्याऽऽग्नीध्रे चर्माध्यस्यति ' इति ।

तमाऽऽक्रोशं प्रशंसां च क्रमेण विधत्ते—

आऽऽभ्यः क्रोशतीति । इमे तत्रानुष्ठायिनो यजमाना द्रव्यव्ययं कृत्वा सर्वशून्यकारिणोऽतो दुर्व्यापारमकुर्वन्नित्येवमन्य एकः शूद्र आक्रोशति निन्देत् । इमे यजमानाः समृद्धिं गताः तदव्यापारमकुर्वन्नित्येवमन्य एको ब्राह्मणः प्रशंसेत् । तयोर्मध्ये शूद्र आक्रोशति स एनान्यजमानाञ्शोधयित्वा निष्पापान्करोति । यो ब्राह्मणः प्रशंसति स च पूतेषु यजमानेष्वर्थं संपादयति ।

अथ कांश्चित्सामविशेषान्विधत्ते—

ऋषिकृतं चेति । योऽयमृषिभिर्मनुष्यैः कृत उपकारो यश्च देवैः कृत उपकारस्तदुभयप्राप्त्यर्थान्महाव्रतादृग्वामपश्यगतादुपान्त्यादृचः पूर्वमनुष्टुभेवोत्तरेण यजमानाः प्राप्नुवन्ति । अतो महाव्रतेऽपि तदुभयप्राप्त्यर्थं भूतेच्छयामकानामुपरीमां संबन्धीनि वैरूपाणि सामानि गातव्यानि ।

अथ ब्रह्मचारिपुंश्चल्योर्मिथुनीभावं विधत्ते—

यन्ति वा एत इति । ये यजमानाः संवत्सरसत्रमनुतिष्ठन्ति ते चिरकाल-

---

१ ख. °तेऽपघा° । २ ख. वीणा पि° । ३ ख. °कुलावली° । ४ ख. °रुपहि° । ५ ख. अपघा° ।

(दासीनृत्यकथनम्)

ब्रह्मचर्याभ्यात्मानमिथुनशक्तेरपगच्छन्ति । अतः पुनस्तच्छक्तिप्राप्त्यर्थं वेदिमध्ये ब्रह्मचारिपुंश्चलीरूपौ मिथुनावयवौ संभवं कुर्यातां, तेन संभवेन यजमाना मिथुनशक्तेर्नापगच्छन्ति । अन्तर्वेदिदेशश्च सूत्रकारेण दर्शितः—' उत्तरस्यां वेदिश्रोण्यां पुंश्चल्यै मागधाय च परिश्रयन्ति ' इति । मगधदेशोत्पन्नो ब्रह्मचारी मागधः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः) ।

चर्मावं भिन्दन्ति पाप्मानमेवैषामेवं भिन्दन्ति माऽयं रात्सीर्माऽतिं व्यात्सीरित्याह संप्रत्येवैषां पाप्मानमेवं भिन्दन्त्युदकुम्भानाधिनिधायं दास्यो मार्जालीयं परिं नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो मधुवै देवानां परममन्नाद्यं परममेवान्नाद्यमवं रुन्धते पदो नि घ्नन्ति मह्रीयामेवैषु दधाति (१) ॥

(चर्मैकान्नपञ्चाशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः) ।

नवमेऽनुवाक उत्कोदादिकमुक्तम् । अथ दशमे दासीनृत्यमुच्यते[1] ।

तत्राऽऽदौ तावच्चर्मवेधन विधत्ते—

चर्मावं भिन्दन्तीति । अत्र भेद्यं चर्म सूत्रकारेण विस्पष्टमुक्तम्—' उत्तरेणाऽऽग्नीध्रं कटसंघाते तेजनसंघाते वाऽऽर्द्रं चर्म[2] वेधनार्थं वितत्योच्छ्रयन्ति '

---

१ क. ग. ङ. च °ते—च° । २ ख वेध्य । ३ क. ङ °र्मं व्यध° । घ. च °र्मं व्यधना ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति। वेधनप्रकारश्च तेनैव स्पष्टमुक्तः—' विपरियन्त्येतच्चर्म क्वचिनस्तेषामेकैकं संशास्ति माऽपरात्सीर्माऽतिव्यात्सीरिति तत्तो विद्धा नातिपादयन्ति ' इति। तेन चर्मवेधनेनैषां यजमानानां पाप्मानमेव भिन्दन्ति।

अथ वेधनात्पूर्वं क्वचिष्वध्वर्योः शास्त्रं विधत्ते—

माऽप रात्सीरिति। हे कार्चिश्चर्मवेधनाय प्रवृत्तस्य बाणस्य **स्खलनरूपमपराधं मा कार्षीः**। अस्खलन्नपि चर्म भित्त्वा परतो बाणगमनरूपमतिव्यथनं **मा कार्षीरित्येवमध्वर्युर्ब्रूयात्**। एवं सत्येषां यजमानानां पाप्मानं **सम्यगेव भिन्दन्ति**।

अथ नृत्यं विधत्ते—

उदकुम्भानिति। अत्र दासीसंख्यां सूत्रकारो दर्शयति—' मार्जालीयस्यान्तेऽष्टौ दासकुमार्य उदकुम्भैर्विकम्पन्ते ' इति। ता एतास्तान्कुम्भान्शिरसि धृत्वा मार्जालीयस्य विष्टपस्य परितो नृत्यन्ति नृत्यं कुर्वन्ति। **कीदृश्यो दास्यः**, पदो निधनादीक्षिगान्पादान्भूमौ ताडयन्त्यः। इदं मधित्येतं शब्दं गायन्त्यः। अथवा इदमेव सारव मधित्यादिमन्त्रं गायन्त्यः। मधु च देवानामत्यन्तं प्रियमतस्तद्गानेन परममत्र प्राप्नुवन्ति। योऽयं पादघातस्तेनैषु यजमानेषु मलीमसां पूजां संपादयन्ति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः॥ १०॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः)।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै

---

१ ख. °ग्यिन्त्ये°। २ ख. °कैकशः स°। ३ क. विधाना°। ४ ख. °व्यधनं°।

(अश्वमेधाङ्गमन्त्रकथनम्)

स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रꣳ स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते (१) स्वाहाऽनुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोदग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहाऽऽतप्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा (२) ॥

(संवर्षते रैभीभ्यः स्वाहा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः) ।

दशमे दासीनृत्यमुक्तम् । तावता महाव्रतं समाप्तम् । अथोत्तरेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते । तत्रापि द्वयोरनुवाकयोरादौ मन्त्राः ।

तन्मध्ये प्रथमानुवाकगतान्मन्त्रानाह—

पृथिव्यै स्वाहेति । पृथिव्यादयस्त्रयो लोकाः । मेघोत्पादनाय धूमज्योतिःसलिलमरुतां सांनिपातः संभवः । स च त्रिविधः—आगामी वर्तमानो भूतश्च । अत एव सर्वात्मकप्रजापत्यभिन्नत्वात्तत्तद्रूपेण निर्दिश्यते । धूमादित्रयस्यापि भविष्यद्वर्तमानातीतदशापन्ना मेघोत्पत्तिस्त्रिविधा । त्रिष्वप्यनुगताकारो मेघः ।

(अथ मेघादिकृत्यमन्त्रकथनम्)

मेघनिष्पत्तेरूर्ध्वं द्रप्सपतनं नीहारः। द्रप्सानां बाहुल्येनेषदन्धकारापादनं निहाका। तदीयशैत्येनावयवसंकोचः प्रातचः। संकोचादूर्ध्वं पलायनं प्रचलाका। तत ऊर्ध्वं भविष्यदादिरूपेण त्रिविधा विद्युत्। तथा गर्जनस्याप्यवस्थात्रयम्। वृष्टेरपि तद्वदवस्थात्रयम्। तत्र तृतीयस्यामवस्थायां चत्वारो भेदाः—वायुवशादाभिमुख्येन वर्षणमभिवर्षणं, परितो मण्डलाकारेण वर्षणं परिवर्षणम्, ऋजुधारारूपं संवर्षणम्, गच्छतः पुरुषस्य पृष्ठतो वर्षणमनुवर्षणं चेति वृष्टिक्लिन्नस्य पुरुषस्य त्रिविधा शैत्यावस्था शीकायनम्। घर्मकाले संतप्तायां भूमौ प्रथमवृष्टेरवसाने समुत्थित ऊष्मा प्रोषः। सोऽपि दशात्रयापन्नः। वृष्टेरुपरम उद्भेदः, तदपि त्रिविधम्। तत ऊर्ध्वं मेघलेशानामपगमनं विष्टवः। सोऽपि त्रिविधः। मेघलेशेष्वपगतेषु सूर्यप्रकाशसंचार आतपः। सोऽपि त्रिविधः। पादबद्धा मन्त्रा ऋचः। अस्थिरपठितानि यजूंषि। गीत्यात्मकानि सामानि। अङ्गिरोभिर्मुनिभिर्दृष्टाश्चतुर्थवेदोत्पन्ना आङ्गिरसः। विधिभागैः सहितास्ते सर्वे वेदाः। देवताविषयाख्यानपरा मन्त्रा गाथाः। मनुष्यविषयाख्यानपरा ऋचो नाराशंस्यः। रेभः शब्दरुद्भिस्तद्विषया ऋचो रैभ्यः। अनुकसंग्रहार्थः सर्वशब्दः। एतैः पञ्चाशन्मन्त्रैः रात्रावन्नहोमाः कार्याः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः॥ ११॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वादशोऽनुवाकः)।

द्रप्सवते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्षण्वते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते

---

१ क. घ ङ च °द्भ्रप्रणीता°।

स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने स्वाहा (१) अमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वकाय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा माꣳसन्वते स्वाहाऽमाꣳसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहाऽस्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मने स्वाहा सर्वस्मै स्वाहा (२) ॥

(मनस्विने स्वाहाऽनात्मने स्वाहा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः) ।

अथ शरीरहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम्—'दत्वते स्वाहाऽदन्तकाय स्वाहेति शरीरहोमाञ्जुहोति' इति ।

पाठस्तु—

दत्वते स्वाहेति । दन्ता अस्य सन्तीति दत्वान् । न विद्यन्ते दन्ता यस्यासावदन्तकः । एवं सर्वत्र निषिनिषेधौ योजनीयौ । जगति हि जीवा द्विविधाः—उत्तरदवयवोपेतास्तद्विकलाश्चेति । अश्वस्य प्राजापत्यत्वेन सर्वात्मकत्वाभिप्रेत्यैतानि विशेषणान्युच्यन्ते । तत्र दन्तयुक्ता जीवाः प्रसिद्धाः । अत्यन्तं बाला वृद्धास्तद्रहिताः । प्राणिनो जङ्गमा अप्राणिनः स्थावराः । वदनवाना

(अश्वमेधाङ्गमन्त्रकथनम्)

भिषेधास्तत्तदवयवराहित्येन वा सत्यप्यवघे तदसौकर्येण वोदाहरणीयम्। त्वग्विष्किरं, चर्म तदाधारभूतं गोलकम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके त्रयोदशोऽनुवाकः)।

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाऽऽराद्घोषाय त्वा प्रद्योत्यै त्वा (१) ॥

(कोऽष्टाविꣳशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः)।

अवीवयोरनुवाकयोः पञ्चाशन्मन्त्रैरेकपञ्चाशन्मन्त्रैश्च सहाग्नहोमा उक्ताः। अथ परिधिमन्त्रा उच्यन्ते।

कल्पः—'कस्त्वा युनक्ति स त्वा युनक्त्विति परिधिमन्त्रेण [illegible] मह्यꣳ संनत्या इति सर्वत्रानुषजति' इति।

पाठस्तु—

कस्त्वा युनक्तीति। हे मध्यमपरिधे कः प्रजापतिस्त्वां युनक्ति वह्नि-समीपे योजयति। हे दक्षिणपरिधे स प्रजापतिस्त्वां युनक्तु। हे उत्तरपरिधे विष्णुस्त्वां युनक्तु। किमर्थम्, अस्य यज्ञस्य समृद्ध्यर्थम्। तथा मह्यं संनत्यै मां प्रति सर्वेषां प्राणिनां संनमनाय, अमुष्मै प्रजादिरूपाय कामाय, आयुष

(अश्वमेधाङ्गमन्त्रकथनम्)

आयुर्युज्ञे त्वामहं युनज्मि । एवं सर्वत्राभ्याहारः । प्राणापानव्यानाः पशवः । व्युष्टिः प्रभातम् । रायिर्धनम् । राधोऽन्नम् । घोषः कीर्तिः । पोषः पश्वादिपुष्टिः । आरादूघोषो दूरशब्दवाचित्वम् । प्रच्युतिः सर्वदुःखनिवृत्तिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्दशोऽनुवाकः) ।

अग्नये गायत्राय त्रिवृते राथंतराय वासन्ताया-ष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागते-भ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशक-पालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्यांꣳ शारदाभ्यां पयस्या बृहस्पतये पा-ङ्क्ताय त्रिणवाय शाक्कराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरु-रग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः क्राय एककपालः (१) ॥

(अग्नये गायत्रायादित्या अनुमत्यै चरुः सप्तचत्वारिꣳशत्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

---

१ ख. °ङ्घोष आराच्छब्द इह दूरशब्दवाची । प्र° । २ ख. °ङ्गमादित्व°

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः)।

यदुक्तं सूत्रकारेण—'अग्नये गायत्रायेति दशहविषः सर्वपृष्ठां निर्वपति' इति, तदिदं विधत्ते—

अग्नये गायत्रायेति। अत्र षट्सु हविःषु च्छन्दसा स्तोमेन साम्नर्तुना च देवता विशेष्यंते। पयसि भवाऽऽमिक्षा पयस्या॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः॥ १४॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके पञ्चदशोऽनुवाकः)।

यो वा अग्नावग्निः प्रहियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्ची-यते यत्संचितेऽग्नावेतानि हवीꣳषि न निर्वपे-देष एव रुद्रोऽशान्त उपोत्थायं प्रजां पशून्यज-मानस्याभि मन्येत यत्संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेनैनैवैनꣳ शमयति नास्य रुद्रो-ऽशान्तः (१) उपोत्थाय प्रजा पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा नाभि-र्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठत्युतु-भिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्य-देतानि हवीꣳषि निर्वपत्युतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सृषवाणेनं (२) अभि-जित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दि-शामभिजित्या एतया वा इन्द्रं देवा अयाजयन्त-

(अश्वमेधाङ्गमन्त्रकथनम्)

स्माद्दिन्द्रसव एतया मनु मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै (३) ॥

(अशान्तः सुषुवाणेनैकचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः) ।

एतेषां हविषामुत्पत्तिमभिधाय प्रयोगं विधत्ते—

यो वा इति । आधानसिद्धेऽग्नौ योऽन्योऽग्निर्मथित्वा प्रहियते, योऽपि सोमो राजा वल्लीरूपः स्थापितस्तयोरुभगोर्योऽयमग्नीषोमीयः पशुरेष पशाऽऽविष्यत् । तेन तत्कारेण तावुभौ तुष्टौ । अथ योऽयमग्निश्चयनेन निष्पाद्यते स एष रुद्रः क्रूरो वर्तते । यदि तस्मिन्संचितेऽग्नावेतानि यथोक्तानि हवींषि न निर्वपेत्तदानीमेव क्रूरोऽतिक्रुद्धः सन्समीपमागत्य यजमानस्य प्रजां पशूंश्छिन्द्यात् । यत्रिर्वपे तु स्वकीयभागेन तुष्टो न हिनस्ति ।

पाठसाप्तां हविःसंख्यां प्रशंसति—

दश हवींष्यिति । देवताविशेषणानि प्रशंसति—

ऋतुभिर्वा एष छन्दोभिरिति । ऋतवो वसन्ताद्याः । छन्दांसि गायत्र्यादीनि । स्तोमास्त्रिवृदादयः । पृष्ठानि रथंतरादीनि । एतेषां देवताविशेषणत्वेनोपात्तत्वादृत्वादिभिरेवाग्निश्चितो भवति ।

अथ हवींषि प्रशंसति-

दिशः सुषुवाणेनेति । सुषुवाणेन सोमं सुषुवाणेन दिशो जेतव्याः । पाच्यादीनां चतुर्दिशामाग्नेय्यादीनां चतुर्दिशामूर्ध्वाधोदिशोश्च मिलित्वा दशत्वसंख्योपेतत्वाद्दशभिर्हविर्भिस्तासामभिजयः ।

अथ दशहविःसंघातरूपामेतां सर्ववृष्टेष्टिं प्रशंसति—

एतया वा इति । सूयत ऐश्वर्यं प्राप्यते येनासौ सवः । इन्द्रस्यैश्वर्यहेतु

(अश्वमेधाङ्गमन्त्रकथनम्)

रिन्द्रतवः । एवं मनुसवोऽप्ययं यज्ञः । तेन यजमानस्ताभ्यामुभाभ्यां तदश्वमेधस्यं पामोति ।

एतेषु दशसु हविष्षु समिद्दिशामाशया न इत्यनुवाकोक्ता दिक्शब्दयुक्ता वाज्यानुवाक्या विधत्ते—

दिग्वतीरिति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः ।)

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा (१) ॥

(यः प्राणतो द्यौरादित्योऽष्टाविंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः)

कल्पः—' यः प्राणतो य आत्मदा इति महिमानौ जुहोति राजवेन पूर्वं सौवर्णेनोत्तरम् ' इति ।

तत्र पूर्वस्य महिमारूपग्रहस्य मन्त्रं दर्शयति—

यः प्राणत इति । यः प्रजापतिरेक इत्स्वयमेक एव प्राणतः श्वासयुक्तस्य निमिषतश्चक्षुर्निमेषयुक्तस्य च जगतो महित्वा स्वमहिम्ना राजा बभूव, यश्च प्रजापतिरस्य द्विपदो मनुष्यादेश्चतुष्पदो गवादेश्चेशे स्वामी भवति, कस्मै देवाय

(अश्वमेधाङ्गमन्त्रकथनम्)

[illegible] हविषा परिचरेम । हे प्रजापते तस्य ते तादृशस्य तव द्यौर्महिमा [illegible] महिमाख्यमहो दृश्यमानानि नक्षत्राणि तव रूपम् । आदित्यस्थानीयं देवः । हे ग्रह त्वां तस्मै तादृशाय महिम्ने महिमयुक्ताय प्रजापतये जुहोमि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्ण-यजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चम-प्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः) ।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ १७ ॥

(य आत्मदा यः पृथिव्यामेरेकान्नचत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः) ।

अथ द्वितीयग्रहमन्त्रं पठति-

य आत्मदा इति । यः प्रजापतिरात्मदाः सर्वेषां शरीरप्रदः, यश्च [illegible] शरीरे बलप्रदः, यस्य प्रजापतेः प्रशिषं प्रकृष्टं शासनं विधे सर्वेऽप्यासते [illegible] देवा अपि यस्य प्रशिषमासते, यस्यामृतं छायेव स्वाधीनं, तथा [illegible] मृत्युरपि यस्य स्वाधीनस्तादृशाय कस्मै केनाप्यविज्ञातस्वरूपाय देवाय प्रजापतये हविषा परिचरेम । हे ग्रह त्वमुपयामेन पार्थिवपात्रेण गृहीतोऽसि,

(अश्वमेधाङ्गमन्त्रकथनम्)

प्रजापत्यर्थं त्वां गृह्णामि। हे प्रजापते तादृशस्य ते तव पृथिवीरूपो महिमाख्यो ग्रहः। ओषधयो वनस्पतयश्च तव विचित्रं रूपम्। अग्निस्त्वदीयं तेजः। हे ग्रह त्वां तस्मै महिमयुक्ताय प्रजापतये जुहोमि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः।)

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् (१) ॥

(आ ब्रह्मन्नेकचत्वारिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः)।

अथान्नहोममन्त्राः। तथा च ब्राह्मणम्—'आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि ब्रह्मवर्चसानि जुहोति' इति।

पाठस्तु—

आ ब्रह्मन्ब्राह्मण इति। ब्रह्मन्ब्राह्मणजातौ ब्रह्मवर्चसी श्रुताध्ययनसंपन्नो ब्राह्मण आजायता सर्वत उत्पद्यताम्। एतदेकं वाक्यमेको मन्त्रः। एवमुत्तरत्रापि। इषव्यो बाणाद्यायुधेषु कुशलः। धेनुरित्यादिष्वाजायतामित्यनु-

(अश्वमेधाङ्गमन्त्रकथनम्)

वर्तते । सप्तिरश्वः । आशुः शीघ्रगामी । पुरवासिभिर्ध्यायत इति पुरन्धिः, रूपवतीत्यर्थः । अस्य यजमानस्य जिष्णुत्वादिगुणविशिष्टः पुत्र आजायताम् । नोऽस्माकं यदा यदाऽपेक्षा तदा तदा पर्जन्यो वर्षतु । ओषधयश्च बहुफलयुक्ताः पच्यन्ताम् । अलब्धस्य लाभो योगः । लब्धस्य परिपालनं क्षेमः । योगसहितः क्षेमो योगक्षेमः । सोऽस्माकं संपद्यताम् । एतैर्दशभिर्मन्त्रैर्बलवर्चसनामकं होमं कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः) ।

आऽक्रान्वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाऽक्रान्वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रꣳस्त सूर्यं युजमकृत वाज्यर्वाऽग्निस्ते वाजिन्युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारय वायुस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सम् (१) पारयाऽऽदित्यस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह व्यानधृगसि व्यानं मे दृꣳहापानधृगस्यपानं मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुर्मयि धेहि (२) ॥

(वायुस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सं त्रिचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः ॥१९॥

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः)।

अथाश्वानुमन्त्रणम्। तथा च ब्राह्मणम्—' आऽक्रान्वाजी क्रमैरत्यक्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमनुमन्त्रयते ' इति।

एतेषु त्रिषु मन्त्रेषु प्रथमं मन्त्रं पठति—

आऽक्रान्वाजीति। वाजी वेगवानयमश्वः पृथिवीमाक्रानाक्रान्तवान्। **सोऽर्वा तस्यां पृथिव्यामग्निं युजं** योजयितारं व्यवहारनिर्वाहकमकृत। एवमुत्तरत्रापि योज्यम्। हे वाजिन्नग्निस्ते युङ्क्तव योजयिता सहायभूतः। तस्मात्त्वा मन्वारभे। त्वं स्वस्ति विनाशराहित्येन मां संपारय सम्यक्कर्मसमाप्तिं प्रापय। एवमुत्तरत्रापि योज्यम्। प्राण दृंहति दृढो करोतीति प्राणधृक्। हेऽश्व त्वं तादृशोऽस्यतो मे प्राणं दृढो कुरु। एवमुत्तरत्रापि। हेऽश्व त्वं चक्षुरस्यतो मयि चक्षुः स्थापय। एवमुत्तरत्रापि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः)।

जाज्ञि बीजं वर्ष्टा पर्जन्यः पक्वा सस्य॰ सुपिप्पला ओषधयः स्वधिचरणेय॰ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्ष॰ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन्यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासास्त्रि॰शिनो मासाः कल्पन्ता ऋतवः शान्तः संवत्सरः (१)॥

(जज्ञ्येकत्रि॰शत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः॥ २०॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः)

अथान्येऽग्नहोममन्त्रा उच्यन्ते ।

तथा च ब्राह्मणम्—' जज्ञि बीजमिति जुहोत्यनन्तरित्यै ' इति ।

पाठस्तु—

जज्ञि बीजमिति । यदेतद्व्रीह्यादि बीजं तज्जज्ञि जननस्वभावमस्तु । अस्त्विति सर्वत्राध्याहारः । पर्जन्यो वर्षा वृष्टिकारोऽस्तु । सस्यं पक्वा पाकशीलम् । ओषधयश्च सुपिप्पलाः शोभनफलाः । इयं पृथिवी स्वधिचरणा सुखेनाधिष्ठाय चरितुं शक्या । अग्निः सूपसदनः सुखेनोपसत्तुं परिचरितुं शक्यः । अन्तरिक्षं स्वध्यक्षं सुखेनाध्यक्षितव्यं धूमकेत्वाद्युत्पातरहितमित्यर्थः । पवमानो वायुः सुपावोऽनुपद्रवकोरिसंचारयुक्तः । द्यौः सूपस्थाना सुखेनावस्थातुं शक्या, दैविकोपद्रवरहितेत्यर्थः । असावादित्यः शिवमुपद्रवराहित्यं यथा भवति तथा तपन्वर्तताम् । अहोरात्रे यथापूर्वं कल्पादेवाऽऽरभ्य येन क्रमेण प्रवृत्ते तथैवाद्यापि प्रवर्तेताम् । अर्धमासा न्यूनाधिकराहित्येन पञ्चदशदिनयुक्ताः । तथा मासाश्चिंशद्दिनयुक्ताः । ऋतवः कल्प्तास्तत्तल्लक्षणोपेताः । संवत्सरः शान्तः प्रजापीडारहितः । एते पञ्चदशभिर्मन्त्रैरग्नहोमाः कर्तव्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकविंशोऽनुवाकः) ।

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽगच्छेदग्नयेऽग्नहोमुचेऽष्टाकपालः सौर्यं पयो वायव्यं आज्यभागः (१) ॥

(आग्नेयश्चतुर्विंशतिः) ।

---

१ ख. घ ङ च °कारी स° ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः) ।

यथाश्वस्य रोगादिनिमित्ते प्राप्ते प्रायश्चित्तेष्टय उच्यन्ते । तथा च ब्राह्मणम्—' यद्यश्वमुपतपद्विन्देत् । आग्नेयमष्टाकपालं निर्वपेत् ' इत्यादि ।

इदानीं पाठस्तु—

आग्नेयोऽष्टाकपाल इति । मृगारवरेऽधनिवासस्थाने यदि नाऽऽगच्छेत्, तत्रानागमनमेकं निमित्तम् । निमित्तान्तराणि तु ब्राह्मणे द्रष्टव्यानि । तान्येतानि नव हवींषि प्रायश्चित्तरूपाणि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वाविंशोऽनुवाकः) ।

अग्नयेऽहोमुचेऽष्टाकपाल इन्द्रायाहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरुरश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामहोमुग्भ्यां द्विकपालः (१) ॥

(अग्नयेऽहोमुचे त्रिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः) ।

यदुक्तं सूत्रकारेण—' अग्नयेऽंहोमुचेऽष्टाकपाल इति दशहविषं मृगारोष्टि-मनुनिर्वपति ' इति, तदेतद्विधत्ते—

अग्नय इति । अंहसो मोचयतीत्यंहोमुक् । आगसो मोचयत इत्यागोमुचौ । **वायुश्च सविता च वायोसावित्रः, वायुसवितृभ्यामित्यर्थः । धाना भृष्टयवाः । एनसो मोचयन्तीत्येनोमुचः ॥**

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः) ।

अग्नये समनमत्पृथिव्ये समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा (१) वरुणोऽद्भिः सोम्ने समनमद्दृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत्क्षत्त्राय समनमद्यथा ब्रह्म क्षत्त्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु (२) ॥

(अद्भ्यः समनमद्यथा मह्यं चत्वारिं च) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः)।

अथ संनतिहोमा उच्यन्ते। तथा च ब्राह्मणम्—'अग्नये समनमत्पृथिव्यै समनमदिति संनतिहोमाञ्जुहोति' इति।

पाठस्तु—

अग्नये समिति। सर्वोऽपि यजमानोऽग्नये समनमत्संनतिं परिचर्यामकरोत्। तथा पृथिव्यै समनमत्परिचर्यामकरोत्। स च पृथिव्या सहितोऽग्निरर्थात् समनमद्येन प्रकारेण तस्मै यजमानाय संनतिमुपकारमकरोत्, एवमनेन प्रकारेण मह्यं मदर्थं भद्राः संनतयः कल्याणा उपकारा देवकृताः संनमन्तु प्राप्नुवन्तु। एवमुत्तरेष्वपि मन्त्रेषु योजनीयम्। समनमदेव मह्यमित्यादिकं सर्वत्रानुषज्यते। तदर्थमेवान्ते पुनः पाठः। एतैर्दशभिर्मन्त्रैरग्नहोमेषु संनतिनामका होमाः कर्तव्याः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः)।

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि। नमोऽग्नये पृथिविक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि (१)॥

(ये ते चतुश्चत्वारिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः)।

कल्पः—'ये ते पन्थानः सवितः पूर्व्यास इत्यध्वर्युर्यजमानं वाचयति' इति। पाठस्तु—

ये ते पन्थान इति। हे सवितर्देव ते तव संबन्धिनः पूर्व्यासः पूर्वसिद्धा अन्तरिक्षे विततता विस्तृता अरेणवो धूलिरहिता ये मार्गाः सन्ति, सुगेभिः सुष्ठु गन्तुं शक्यैस्तेभिस्तैर्मार्गैरुग्रा वाद्यास्मिन्कर्मणि नोऽस्मान्रक्ष। तथा नोऽस्मान्-धिब्रूहि चाधिकोऽयं यजमान इति देवानामग्रे कथय च।

कल्पः—'नमोऽग्नये पृथिविक्षित इत्येतैश्च यथालिङ्गम्' इति। उपतिष्ठत इत्यनुवर्तते।

पाठस्तु—

नमोऽग्नय इति। पृथिविक्षिते भूनिवासिने लोकस्पृते लोकस्य प्रीणयि-त्रेऽग्नये नमोऽस्तु। अस्मै यजमानाय लोकमुत्तमस्थानं देहि। एवमुत्तरयोरपि योज्यम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-
र्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
चतुर्विंशोऽनुवाकः ॥ २४ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः)।

**यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्ष्णवा-
न्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः
सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा
अवान्तरदिशाः पशवोऽहोरात्रे निमेषोऽर्धमासाः
पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवत्सर
आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका**

(अश्वमेधाङ्गमन्त्रकथनम्)

अस्थानि नर्भो मा॰सान्योषधयो लोमानि वनस्पतयो वालाः अग्निर्मुखं वैश्वानरो व्यात्तम् (१) समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जंजभ्यते तद्वि द्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाग्हवा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवहद्वाऽसुरान्वाजी गन्धर्वानश्वो मनुष्यान्त्समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः * (२) ॥

(व्यात्तमवहद्द्वादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

गावो गावः स्तिपासन्तीः प्रथमे मासि समान्यो यदि सोमौ षडहैकस्तुर्या३ देवानामकर्यणं चर्मावं पृथिव्यै दत्वते कस्त्वाऽग्ने यो वै यः प्राणतो व आत्मदा आ ब्रह्मन्ब्राह्मणो ब्राह्मणाऽक्रान्वाजी जज्ञिर्वीजमाग्नेयोऽष्टाकपालोऽग्नयेऽ॰होमुचेऽष्टाकपालोऽग्नये सवनमध्ये ते पन्थानो यो वा अश्वस्य मेध्यस्य शिरः पञ्चविं॰शतिः ॥ २५ ॥

गावः समान्यः सवनमष्टाभिर्वा एते देवकृतं चाभिजित्या इत्या-
हुर्वरुणोऽद्भिः साम्ने चतुःपञ्चाशत् ॥ ५४ ॥

---

* यद्यप्यत्र सहितायां पदपाठे च बन्धुरिति पदं वैदिका न पठन्ति तथाऽपि भाष्यकारसंमतत्वात् 'व्यात्तमवहद्द्वादश च' इतिवैदिकसम्प्रदायानुरोधिप्रतीकवाक्योक्तद्वादशसंख्यापूरणार्थमावश्यकत्वाच्च स्थापितम् ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः) ।

अथान्तिमेऽनुवाके सर्वजगदात्मकत्वेनाश्वः स्तूयते । अथवा विराडूरूपेणाश्वोपासनप्रतिपादकोऽयमनुवाकः प्रकरणादुत्तरयोपनिषदोर्द्वयोर्द्रष्टव्यः । अत एव वाजसनेयिन एतदर्थप्रतिपादकं ब्राह्मणमुपनिषदादावामनन्ति ।

पाठस्तु—

यो वा अश्वस्येति । यः पुमान्मेध्यस्य यागयोग्यस्याश्वस्य शिरो वेद शिरःप्रभृतीनवयवान्विराडवयवभूतोषःकालादिरूपेणोपास्ते सोऽयं शीर्षण्वानृषः-कालादिरूपैः शिरःप्रभृतिभिर्विराडवयवैर्युक्तो मेध्यो यागफलयोग्यो भवति । कृत्स्नानुष्ठानस्य चोपासनस्य च समानं फलम् । तथा च पञ्चमकाण्डे समाम्नातम्—' सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद ' इति । तत्र कस्मिन्नवयवे को विराडवयवो ध्यातव्य इति तत्सर्वमुच्यते—मेध्यस्याश्वस्य यच्छिरस्तदुषा उषःकालरूपम् । यदश्वस्य चक्षुस्तत्सूर्यः । यस्तदीयः प्राणः सोऽयं वाहो वायुः । यत्तदीयं श्रोत्रं सोऽयं चन्द्रमाः । ये तदीयाः पादास्ताः प्राच्या दिशः । ये पर्शवः पार्श्वास्थिविशेषास्ता इमा आग्नेय्याद्यवान्तरदिशाः । यस्तदीयो निमेष उन्मेषसहितस्ते उभे अहोरात्रे । यानि तदीयहस्तपादगतपर्वाणि ते शुक्लकृष्णपक्षरूपा अर्धमासाः । यानि च पर्वणां संधानानि ते चैत्राद्या मासाः । यानि चानुक्तविशेषाणि खुराद्यङ्गानि ते वसन्ताद्या ऋतवः । य आत्मा मध्यदेहः स संवत्सरकालः । ये तदीयाः केशास्ते सूर्यरश्मयः । यदश्वस्य भास्वररूपं तानि कृत्तिकादिनक्षत्राणि । यान्यनुक्तान्यस्थानि तानि बृहस्पतिशुक्रध्रुवाद्याः प्रौढतारकाः । यानि तत्र तत्र स्थितानि मांसखण्डानि तदेतन्नभः । यानि क्षुद्रलोमानि ता ओषधयः । ये बालाः पुच्छगता दीर्घकेशास्ते वनस्पतयः । यदेतन्मुखं संपद्यतेऽयं लोकप्रसिद्धोऽग्निः । यदस्याक्तं मुखविदारणं सोऽयं वैश्वानरनामको देवताविशेषः । यदुदरं सोऽयं समुद्रः । यः पायुः तदन्तरिक्षम् । यावाण्डौ ते द्यावापृथिव्यौ । यः शेपः

(अश्वमेधाङ्गमन्त्रकथनम्)

सोऽयमभिषवार्थो ग्रावा। यद्वदतः स तोयरतः। यज्जजभ्यते गात्राणि विनामयति तेयं विद्युत्। यद्विधूनुते तच्छब्दं शरीरं कम्पयति तदेवद्गर्जनम्। यदेतन्महनं तेयं वृष्टिः। अस्य हेषाशब्दरूपा या वाक्तेयं वेदरूपा वागेव। जायमानस्य क्रतौ प्रयुज्यमानस्याश्वस्य यः तंज्ञपनात्पुरस्तान्महिमाख्यो राजतग्रहस्तदिदमहरेव। एनं पश्चादेतस्याश्वस्य तंज्ञपनादूर्ध्वं यो महिमाख्यः सौवर्णग्रहः तेयं रात्रिः। एतावेवाभौ महिमानौ ग्रहावश्वमभितः संबभूवतुरश्वस्य तंज्ञपनात्पूर्वं पश्चाच्च व्यवस्थितौ। इयावैवाज्यश्वा अवान्तरजातिविशेषास्तत्तद्रूपेण देवादीन्वहन्ति। एवंविधस्य विराड्रूपस्याश्वस्य समुद्र एव योनिः कारणम्। समुद्रवत्पुत्पद्यते जगदस्मादिति समुद्रः परमात्मा। नह्यन्यस्मादयं विराडुत्पत्तुमर्हति। स एवास्य बन्धुः सम्भः स्थितिहेतुरित्यर्थः। एवमुपासिता पापक्षयद्वारा विराट्रूपं प्राप्नोति। 'तं यथा यथोपासते तथैव भवति' इति श्रुत्यन्तरात्। विराट्प्राप्तिश्च क्रममुक्तिहेतुः। तत्र ज्ञानोत्पत्तौ सत्यां तेन विराजा सह मुच्यमानत्वात्। तथा च स्मृतेः—

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति॥

एतच्च भगवान्व्यासः 'कार्यात्यये तदध्यक्षेणातः परमभिधानात्' इत्यस्मिन्नधिकरणे महता प्रबन्धेन प्रतिपादयामासेत्यशेषमतिमङ्गलम्।

अथास्य प्रपाठकस्य विनियोगसंग्रहः—

विहितं पञ्चमस्याऽऽद्ये गवामयनसत्रकम्।
तद्द्वैविध्यं द्वितीये स्यात्तृतीये पृष्ठनिर्णयः॥
चतुर्थे व्यत्ययः पूर्वपक्षस्यान्त्यस्य पक्षसि।
पञ्चमे संसवः षष्ठे भवेदुत्सर्गसत्रकम्॥
तन्मीमांसा सप्तमे स्यादष्टमे तु महाव्रतम्।
सामानि नवमे प्रोक्ता वीणाद्या दशमे पुनः॥
दासीनृत्यं ततस्तूर्ध्वं मन्त्राश्चैवाश्वमेधगाः।
पृष्ठ्य(ष्ठ्य)ल्होमाः पञ्चाशदेकपञ्चाशदीरिताः॥
दत्वते परिधीनां तु कस्त्वामन्त्रत्रयं भवेत्।
अग्नये सर्वपृष्ठेष्टिः प्रयोगोऽनन्तरे श्रुतः॥

(अश्वमेधाङ्गमन्त्रकथनम्)

कः पाणवो य आत्मेति तावुभौ महिमग्रहौ ।
आ ब्रह्मन्दशभिर्मन्त्रैर्ब्रह्मवर्चसहोमकः ॥
आत्मानमं मन्त्रायेत्र जज्ञीति(प्रश्न)दशभिर्हुतिः ।
अग्ने नैमित्तिका यागा मृगारेष्टिरथाग्नये ॥
अग्न आयूंषि होमाः स्युर्दश ये स्वाभिवाचनम् ।
[* नमस्त्रिभिरुपस्थानं यो वै विधिरुपासने ॥
क्रतुराडश्वमेधोऽयं विराडध्यानमुपास्तिराट्] ।
तास्यामुरुपद्यते ज्ञानं कृतकृत्यो भवत्यतः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराज-परमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराज-परमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिता भाष्ये सप्तमः काण्डः ॥ ७ ॥

---

* अनुग्रिहनान्तर्गतस्थाने क. पुस्तके ' यो वा अश्वोपास्तिरित्थं कर्मविधे प्रप्रच्छिते ' इयमेव विद्यते ।

मूलक्रमेण सप्तमाष्टके –प्र० ५ अ० ९७

भाष्यक्रमेण सप्तमकाण्डे –प्र० ५ अ० ९७

मूलक्रमेणाऽऽदितः समष्टयङ्काः–अष्ट० ७ प्र० ४४ अ० ६३१

भाष्यक्रमेणाऽऽदितः समष्टयङ्काः–का० ७ प्र० ४४ अ० ३२६

समाप्तेयं श्रीमत्सायणाचार्यविरचितभाष्यसमेता
कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ॥